Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीचारित्रस्मारकग्रन्थमाला-ग्रन्थाङ्कः-४८

# श्रीश्रीधरचरित-महाकाव्यम्

कर्ता-

आचार्यश्रीमाणिक्यसुन्दरसूरिः

संपादकः

मुनिज्ञानविजयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीचारित्रस्मारकग्रन्थमाला-ग्रन्थाङ्कः-४८

# श्रीश्रीधरचरित-महाकाव्यम्

कर्त्ता-

आचार्यश्रीमाणिक्यसुन्दरसूरिः

संपादकः

मुनिज्ञानविजयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकाशकः-प्राप्तिस्थानम्
श्री चंदुलाल लखुभाई परीख
नागजी भूधर पोळ, मांडवी पोळ,
अहमदाबाद

विक्रम संवत् २००७ वीर संवत् २४७८
इषु संवत् १९५१ चारित्रकमल संवत् ३

प्रतयः ५००

मूल्यम् रु. ४-८-०

मुद्रकः
गोविन्दलाल मोहनलाल जानी
श्री किशा प्रिन्टरी रतनपोळ,
अमदाबाद

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रास्ताविकम् ।

**ग्रन्थकर्तृ-गुरुवंशः—**

अञ्चलगच्छपट्टावल्यां वर्णनमस्ति यद्—अञ्चलगच्छेशाचार्यमहेन्द्रप्रभसूरिणा स्वपट्टे त्रय आचार्या प्रतिष्ठापितास्ते इमे—

१. प्रथमो मुनिशेखरसूरिः—यतः शेखरशाखा प्रादुर्भूता, अतःपरं तत्परिचयः क्वापि न दरीदृश्यते ।

२. द्वितीयो मेरुतुङ्गसूरिः—तस्य च वि. सं. १४०३ वर्षे नाणाग्रामे जन्म, सं. १४१८ वर्षे दीक्षा, सं. १४२६ वर्षे सूरिपदं, सं. १४७३ वर्षे जीर्णदुर्गे स्वर्प्राप्तिश्च । तेन बालबोधव्याकरण—भावकर्मप्रक्रिया—शतक-भाष्य—जैनीयमेघदूतकाव्य—नमुथुणंस्तुतिटीका—सुश्राद्धकथा—उपदेशमाला-वृत्ति—पट्टावलीप्रमुखा ग्रन्था निर्मिताः, तत्पट्टे च जयकीर्तिसूरिर्जातः तन्महा-प्रभावकोपाध्यायभुवनतुङ्गसूरितः तुङ्गशाखा निर्गता ।

३. तृतीयो जयशेखरसूरिः—महाकविः, यः शारदालब्धप्रसाद आसीत् । तेन दमयन्तीचम्पू—जैनकुमारसम्भवादिमहाकाव्यपञ्चकटीका—सटीकोप-देशचिन्तामणि—कल्पसूत्रसुखावबोधविवरण—प्रबोधचिन्तामणि—धम्मिलचरित—न्यायमञ्जरीप्रमुखा निर्मिता ग्रन्था उपलभ्यन्ते ।

मेरुतुङ्गसूरिशिष्यमाणिक्यसुन्दरसूरिणा ह्येतत् श्रीधरचरितमहाकाव्यं संदब्धम् ।

**ग्रन्थकर्तृ-परिचयः—**

माणिक्यसुन्दरसूरिणा स्वगच्छ—गुरु—विद्यागुरु—सत्तासमय—ग्रन्थरचना—निर्देशः स्वयमेवकृतोऽस्ति, स चैवम्—

**सेवन्तेऽद्भुतकान्तिकीर्तिकमलासौभाग्यभाग्यादयो,**
**भूपाला इव यं गुणाः कलियुगत्रस्ताः शरण्यं नृपम् ।**
**स श्रीअञ्चलगच्छवासरमणिः सूरीन्द्रचूडामणि—**
**भूमीहारनिभश्चिरं विजयतां श्रीमेरुतुङ्गो गुरुः ॥ ११ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषां गुरूणां वात्सल्यभरकेसरिकन्दरः ।
शिष्योऽस्मि भूरिभक्तः श्रीसूरिमाणिक्यसुन्दरः ॥१२॥

स्वोपज्ञव्याख्या—तेषां श्रीमेरुतुङ्गसूरीणां दीक्षागुरुत्वात् शिष्योऽस्मि ।

श्रीजयशेखरसूरीश्वरसुगुरुभ्यो नमोऽस्तु मम तेभ्यः ।
येषां पदप्रसादादहमपि गुम्फं करोम्येवम् ॥ १४ ॥

व्याख्या—येषां विद्यागुरूणाम् ।

( —इति श्रीधरचरितमहाकाव्ये प्रथमसर्गे )

श्रीमेरुतुङ्गसुगुरुप्रणिधानतः श्री—
माणिक्यसुन्दर इमां शुकराजसत्काम् ।
नव्यां कथां रचयति स्म सुविस्मयां श्री—
शत्रुञ्जयाख्यगिरिगौरवगौरवर्णाम् ॥ १ ॥

( —इति श्रीशुकराजकथायां प्रान्ते )

श्रीअञ्चलगच्छेशाः, श्रीमन्तो मेरुतुङ्गसूरीशाः ।
विजयन्तां यद्वाण्या, जिता सिता संयुता पयसा ॥ ४ ॥
गुरुप्रसादान्माणिक्यसुन्दरसूरिरल्पधीः ।
पूजाधिकारे वक्ष्यामि, गुणवर्मकथामहम् ॥ ८ ॥

( —इति गुणवर्मचरित्रे, प्रारम्भे )

आसां कथा व्यरचयच्च गुरूपदेशात् ।
माणिक्यसुन्दरगुरुर्जगतां हिताय ॥ २ ॥
चतुरशीत्यधिकेषु समाचतुर्दशसु तेषु गतेषु च विक्रमात् ॥३॥
श्रीवर्द्धमानजिनभवनभूषिते रचित एष सत्यपुरे ।
ग्रन्थः श्रीमदुपाध्यायधर्मनन्दनविशिष्टसान्निध्यात् ॥४॥
माणिक्याङ्कश्चतुष्पर्वी, शुकराजकथा तथा ।
पृथ्वीचन्द्रचरित्रं च, ग्रन्था एतेऽस्य बान्धवाः ॥ ५ ॥

( —इति गुणवर्मचरित्रे, प्रान्ते )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतत्पाठैः स्पष्टं निश्चीयते यत्, माणिक्यसुन्दरसूरेः गच्छ आञ्चलिकः, गुरुर्मेरुतुङ्गसूरिः, विद्यागुरुर्जयशेखरसूरिः, शिष्याः उपाध्यायधर्मनन्दनप्रमुखाः। सत्तासमयो वैक्रमीयपञ्चदशशताब्द्यन्त्यचरणम्, ग्रन्था माणिक्याङ्कापरनाम श्रीधरचरित-चतुष्पर्वी-शुकराजकथा- पृथ्वीचन्द्रचरित्र-गुणवर्मचरित्र-धर्मदत्तकथा-अजापुत्रकथा—आवश्यकटीकाप्रमुखाः सन्ति, अयं सूरिः सर्वशास्त्रविशारद इति तत्तद्ग्रन्थसंदर्भेणैव स्पष्टं प्रतिभासते।

## श्रीधरचरितमहाकाव्यकथापरिचयः।

**प्रस्तावना वर्णनात्मके प्रथमसर्गे**—प्रथमं कविना मङ्गलाचरणरूपेण युगादिप्रभु—शान्तिनाथ—नेमिनाथ— पार्श्वनाथ—महावीरस्वामि—सर्वजिन—सरस्वती—गौतमस्वामि—सुधर्मस्वामिनां स्तुत्यात्मकानि पद्यानि निर्दिष्टानि। तत्रात्मपरिचयं प्रकटयतः कवेर्गुरुपरम्परायामादौ श्रीसुधर्मस्वामिनश्चन्द्रकुले आर्यरक्षितसूरयस्तेषां पट्टे मेरुतुङ्गसूरयस्तेषां शिष्यः माणिक्यसूरिः, येन निबद्धोऽयं ग्रन्थ इति दर्शितम्। कविः स्वयं स्वविद्यागुरुं श्रीजयशेखरसूरिं प्रणमन् तस्योपकारं स्मारयति यत्, तस्यैव विद्यागुरोः प्रसादाद् ग्रन्थोऽयं रचितो मयेति।

इत्यादि प्रकारेण कविर्मङ्गलाचरणं कृत्वातिप्रसिद्धच्छन्दोलक्षणेन पाण्डित्यसाधनेन चानन्दसाधिका रचना क्रियते मयेति कथयति। दुग्धे शर्करासंयोग इव काव्यरचनायां छन्दोलक्षणप्रथनमिति प्रदर्शयन् कविः साहित्यप्रासादस्य पीठिकेव छन्दोलक्षणस्य गणव्यवस्थादि दर्शयति। वर्णवृत्त उक्तेत्यादिछन्दसां नामानि सूचयति। सर्गस्यान्तिमश्लोकेऽस्य काव्यस्य कथासूचनं कृतमस्ति। तच्चेत्थम्—प्रथमजन्मनि श्रीधरनाम्नो भूपतेः, तृतीये च भवे विजयचन्द्रनामधेयस्य राज्ञः सरसं कथावर्णनमस्मिन् काव्ये गुम्फितम्॥

**द्वितीयसर्गे**—तत्कथां विस्तारयति। जम्बूद्वीपे भारतनाम्नि क्षेत्रेऽलकापुरीसदृशं मङ्गलपुरनामकं नगरमासीत्। तत्र सर्वगुणकलासंपन्नो जयचन्द्रनामा भूपती राज्यं करोति स्म। तस्यैका निर्मलशीलसंपन्ना कलावतीनाम्नी

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्ञी अभूत् । एकदा राजसभायां गगनतलादवतरतः कस्यचित् सिद्धपुरुषस्यागमनं भवति ॥

**तृतीयसर्गे**—प्रथमं कुशलवार्तां पृच्छन् सः सिद्धपुरुषः स्वपरिचयं ददाति । इलापुरेऽग्निमित्रनामा कश्चिद् वेदज्ञः ब्राह्मणोऽस्ति, तस्य रोहिणीति ख्याता पत्नी, तयोर्दुश्चरितो दुर्नयनामा पुत्रः कदाचिदटव्यां भ्रमन् कश्चित् श्रमणं दृष्टवान् । तस्योपदेशं शृण्वन् सः द्वादशव्रतधारी बभूव । अस्मिन्नेव समये मुनिं वन्दितुमागतौ विद्याधरौ सूचितवानयं मुनिः—'अयं तव धर्मबान्धवः' इति । ततः विद्याधरावपि तस्मै विद्यां दत्त्वा विद्याधरं कृतवन्तौ । स एषोऽहं विद्याधरः । यदा तव जिनमन्दिरान्निर्गतं धूम्रं मया दृष्टं तदैवाहं तव दुष्कृतखण्डनार्थं जैनधर्मे च तव प्रीतिं विलोक्यागतः । प्रसन्नस्य सिद्धपुरुषस्य कदाचिदपि दर्शनं विफलं न भवति, अतो वरं वृणु । राज्ञोदितम्—मम सर्वमपि संपन्नं विद्यते, दुर्लभो जैनधर्मोऽपि मयाऽऽसादितः, अतो वरेणालम् । तदैव सिद्धपुरुषः प्रत्युत्तरयति—वेद्म्यहं तव सर्वमस्ति परमेक एव तव कुलदीपको नास्ति, अतो गृहाणेमां गुटिकाम् । अनयाऽद्भुतं सुतं लभितासे । भूपतिना तद्गुटिका पट्टराज्ञ्यै दत्ता ॥

**चतुर्थसर्गे**—कतिचिन्मासान्तरे राज्ञी सर्वलक्षणसंपन्नं विजयचन्द्रं सुतमजनि । लाल्यमानः क्रमशः वर्धितः सन् क्रीडां कर्तुमारब्धवान् । एकदा मित्रैः सह वनमगच्छत् सः । तत्र मुनिमेकमपश्यत् । मुनिस्तं द्वादशव्रतमुपदिष्टवान् । तदवसरे मुनिमपृच्छद् विजयचन्द्रः—किमस्ति फलमहिंसायाः ? मुनिना प्रोक्तम्-मोक्षफलम् । तत्फलं मम कदा भवितेत्यपृच्छत् पुनः । ज्ञानी मुनिरुवाच—त्वं भाग्यवानसि, शृणु ते भवकथाम्—चम्पापुर्यां परमदेवनामा भूपतिरस्ति, तस्य ललिता नाम्नी सुन्दरी वर्तते, तयोः पुत्ररूपेण, तत्पश्चाद् वाराणस्यामश्वसेननृपतेर्वामादेव्यां तव जन्म भविष्यति । तस्मिन् भवे पार्श्वनाथ इति नाम्ना तीर्थङ्कररूपेण तव प्रसिद्धिर्भविष्यति । गृहवासं परित्यज्य, दीक्षितो भूत्वा, कमठं च प्रतिबोधयन् त्वं सर्वत्रावभासिकैवल्यमाप्स्यसि । विहरन् कदाचिच्चम्पायामा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गमिष्यसि । तत्रत्यो वसन्तराजनरेश्वरस्तव समीपे दीक्षां गृहिष्यति । तत्पश्चात् तव मोक्षो भविष्यति ।

इति मुनिवचनं संश्रुत्याहिंसायां दृढप्रतिज्ञोऽभूत् । ततः प्रभृति विजयचन्द्रः श्रीपार्श्वनाथप्रभोः प्रतिमां निर्माप्य तस्याः पूजाप्रकारमतनोत् ।

राजसभायामेकदा केनचित् पुरुषेणैकोऽश्व उपाहृतस्तस्मै । तं परीक्षितुमारूढः कुमारः । तस्य चतुःप्रकारां गतिमधिगन्तुं वल्गामकृषत् । वैपरीत्येन शिक्षितस्यास्याश्वस्य यथा कृषति वल्गां तथैवायमश्वो द्रुततरवेगो भवति । तद्वेगेन कुमारः कस्यांश्चिदटव्यामागात् । खिन्नमानसोऽयं कुमारो यावद् वल्गां मुञ्चति तावदेवाश्वः स्थितः, तस्मादुत्तीर्य पर्याणं दूरीकृतवान् । अश्वस्तत्र प्राणैर्मुक्तः । क्षुत्पिपासार्दितं तं कुमारं दशमे दिने कश्चिन्नरो दृष्ट्वाऽभ्यधात्—भद्र ! पिब नीरमिति । कण्ठगतप्राणो वक्तुमसमर्थः स वारि निपीयापृच्छत्—कस्त्वम् ? पुरुषो जगौ—अतोऽदूरे एव हस्तिनापुरं नाम नगरम् । तत्र गजभ्रमो भूपतिर्वर्तते । तस्य विजयेत्याख्यया पट्टराज्ञी । मृगयाव्यसनी स राजाऽत्रैव वने वर्तते । तस्याहं भृत्यः । अतो मन्नृपान्तिकमेहि । परं कुमारो नोत्तिष्ठति । गजभ्रमेण तद्विज्ञाय भृत्यैरानायि स्वान्तिकं कुमारः । वार्तालापं कुर्वाणयोस्तत्र कश्चिच्चर आगत्योचे नृपम्—गच्छन्त्यमी मृगाः । तान् हन्तुं तौ निर्गतौ । परं कुमारेण ते सर्वेऽपि मृगा मुक्ताः । अतः कुपितो गजभ्रमो जगौ—किं त्वया कृतम् ? कुमारो वदति—एते निर्वैरा मृगाः कथं वधमर्हन्ति ? अस्योत्तरेण रञ्जितो राजा तं प्राशंसत् तस्य च वृत्तमशृणोत् । तद्वृत्तेन गजभ्रमः कथयति—त्वं मम मित्रपुत्रोऽसि ।

ततः सर्वेऽपि हस्तिनापुरं गताः । मृगयानिवृत्तधीः राजाऽऽत्मानं ससुतं मनुते । तं च स्वाङ्गसेवायां प्रायुङ्क्त । एकदा निशीथिन्यां कस्याश्चित् स्त्रियाः करुणक्रन्दनमशृणोत् । केयं रोदिति—इति राजा कुमारं तद्वेत्तुमधिगन्तुं प्राहिणोत् । करवालकरः कुमारस्तत्र गत्वाऽग्निकुण्डसमीपे कन्यकाकबरीं कृन्तन्तं योगिनमपश्यत् । उवाच तम्—रे चाण्डाल ! कस्त्वम् ? किमर्थमनार्यकार्यमिदं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुरुषे ? योगी जगौ—यदर्थमिमां जुहोमि तत्कार्यं मम त्वत्तोऽपि भविष्यति। कुमारेणोक्तम्-मुञ्चेमां कन्याम्, निर्वर्तय तव कार्यं ममाङ्गमांसेन। तत् कर्म विदधानयोस्तयोस्तत्र चेटकः प्रकटीभूतः वक्ति—तव कार्येणालम्, साहसात् तव तुष्टोऽस्मि, अतः समीहितं वरं वृणु। तेनोक्तम्—तव कार्यकृद्योगिनोऽस्य कार्यं सफलीकुरु। चेटकः कथयति—एतत्तव प्रार्थनयाऽलम्, परमहं गारुडं मन्त्रं तुभ्यं ददामि, यदा किञ्चिदपि कार्यं स्यात् स्मर्तव्योऽहं त्वया, अद्य-प्रभृति तव दासोऽस्मीति जानीहि। तदनन्तरं चेटक-कुमारौ तां कन्यां नीत्वा नृपान्तिकं जग्मतुः।

कस्येयं कन्या—इति पृच्छति राजनि निवेदयति चेटकः—तव नगर-निवासिनः दत्तनाम्नः श्रेष्ठिनः कन्येयम्। वसन्तलक्ष्मीनिरूपणार्थं सखीभिः सह वनं गतेयं कन्या योगिना धृता। व्याघ्रमुखाद् हरणीमिवानेन वीरकुमारेण रक्षिता। राज्ञा दत्तश्रेष्ठी आकारितः। वृत्तान्ते निवेदिते दत्तश्रेष्ठी उपसंजहार—मम कन्यायाः रत्नवल्याः पाणिग्रहणमनेन कुमारेण सह भाव्यम्। राज्ञाऽनु-मतस्तस्य लग्नोत्सवोऽपि विदधे। अपरेद्युः क्रीडार्थं स कुमारः रत्नवल्या सह वनं गतः। तत्रावसरे नगरात् कयोश्चिन्नरनार्योः करुणाक्रन्दनं तेन श्रुतम्। तद्वृत्तं ज्ञातुं सेवकं सः प्राहिणोत्। ततः सेवक आगत्य निवेदयति—नय-सारमन्त्रिणः दुहितुः कनकमालायाः सर्पदंशान्मृत्युरजनि, तेनेदं क्रन्दनं श्रूयते। कुमारस्तत्र वेगेनागत्य गारुडमन्त्रेण तस्याश्चेतनं पुनः प्रकटीकृतम्। तेन मन्त्री प्रमुदितः कन्यामादाय गृहमगात्। कुमारोऽपि क्रीडां कृत्वा वनाद् निवर्तितः। अन्येद्युः नयसारः राजसभामागत्य जगौ—अनेन कुमारेण मम दुहिता पुनरजीव्यत, तेन साऽस्य शरणं भजतु। ततः शृङ्गारेण सज्जी-कृतोऽसौ कुमारो हस्तिनमारुह्य विवोढुं नयसारमन्त्रिणः प्रासादमण्डप-मगात्। महता महेन च तत्र लग्नोत्सवः निर्वर्तितः।

तत्पश्चाद् गजभ्रमनृपोऽपि न्यवेदयत् कुमारम्—तव सेवयालम्, प्रीणि-तोऽस्मि, अतः सुखेन वासरान् निर्गमय।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पञ्चमसर्गः**—गजभ्रमराजा कुमाराय राज्यलक्ष्मीं दत्त्वा आर्यरक्षिताचार्य-समीपं दीक्षामगृह्णात् । कुमारोऽपि प्रजां सुखेनापालयत् ।

एकदा वाराणस्या भूपते रुक्माङ्गदस्य कोऽपि दूतः सभामेत्यावोचद् विजयचन्द्रम् – राजन् ! मम स्वामिनो रुक्माङ्गदस्याज्ञामङ्गीकुरु, अन्यथा युद्धाय सज्जीभव । रणशूरोऽसौ विजयचन्द्रस्तमाजुहाव । तस्य वीरवचनं श्रुत्वा दूतो निवर्तितः । अत्रान्तरे नगरे कश्चिद् लुण्टाकः केषाञ्चिन्नागरिकानां धनमाहरत् परं न केनाप्यारक्षकेन महता प्रयत्नेनापि धृतः । अतो विजयचन्द्रः चेटकं सस्मार । चेटक आगत्य तं चौरं गृहीत्वा नृपान्तिकमनैषीत् । अवस्वापिनीविद्यावानसौ चौरस्तत्रागत्य नृपसमीपं सर्वं हृतं धनमदर्शयत् । पश्चादसौ चौरो संसाराद् विरज्य दीक्षां गृहीत्वाऽऽत्मकल्याणमकृत ।

वाराणसीनृपचरा इमां कथां परिज्ञाय रुक्माङ्गदं न्यवेदयन् । तेन विजयचन्द्रस्य शङ्कया भीतोऽसौ रुक्माङ्गदो राजा तस्य मैत्रीं कर्तुं सोपद आजगाम । अन्येऽपि राजानो वाराणसीभूपमनुसृता विजयचन्द्रस्य शरणं प्राप्ताः ।

एकदा कश्चित् पुरुषः विजयचन्द्रसभामेत्य नृपपदोपान्ते लेखमेकं मुक्त्वाऽनमत् । तस्मिन् पितुर्नाम दृष्ट्वा लेखमवाचयत्—"मङ्गलपुरात् जयचन्द्रनरेश्वरो हस्तिनापुर्यां विजयचन्द्रं पुत्रं सस्नेहं सालिङ्गनं चादिशति—आनन्दं वर्ततेऽत्र, तत्राप्याशास्ये, कार्यं विज्ञप्यम् । पुत्र ! तव प्रेम्णा राज्यलक्ष्मी तव दासीवासीत् परं तव वियोगाद् न सा गृहे तिष्ठति वने वा गन्तुं समर्था । तव वियोगदाहेन दग्धा तव माता सदाक्रन्दति नाद्यापि शान्तिमाप्नोति ॥" एतल्लेखं दृष्ट्वा स पित्रोः समीपं गन्तुमुत्सुकोऽभवत् । अविच्छिन्नप्रयाणेन स कियद्दिनान्तरे मङ्गलपुरं प्राप्तः । कैश्चित् पुरुषैः जयचन्द्रनृपो वर्धापितः । तस्यागमनवार्तया पितरौ हर्षपुलकितौ संजातौ । तयोरानन्दपारावारश्चन्द्रदर्शनमिवोल्लसत् । महता महेन तस्यागमनोत्सवं व्यधापयत् । वधूभ्यां सहाग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तोऽसौ विजयचन्द्रः पित्रोश्चरणाननंसीत् । पितृभ्यां ते आशीर्वादैः स्नापिताः। कविरुत्प्रेक्षते यत् तेषां मिलनानन्दस्य वर्णनं वचनातीतम् ।

**षष्ठसर्गे**—जयचन्द्रेण राजसभाऽऽकारिता । सर्वे सभासदः सोपदा-स्तत्रागमन् । अस्मिन्नेव समये रत्नपुरस्य रत्नाङ्गदभूपस्य मन्त्री राजसभामेत्य स्वस्वामिनो वृत्तमचीकथत्। स्वागमनोद्देशं प्रकटयन्नवादीद् दूतः—मम राज्ञः मदनानाम्नी पट्टराज्ञी वर्तते। तस्याः सुलोचनानाम्नी पुत्री विद्यते। सा सर्व-कलाप्रवीणा, तस्याः सौन्दर्ये देवसुन्दर्या अधिकम्, साहित्यशास्त्रे च पण्डिता वर्तते । एतत्पुत्र्याः वरचिन्ताऽस्ति ।

कुत्रचिद् रूपं वर्तते परं न कौलिन्यम्, द्वयोः सत्योः न नैपुण्यं दरी-दृश्यते । अतो एतद्योग्यं वरं दुर्ज्ञेयं ज्ञात्वा तस्याः स्वयंवरोत्सवं कर्तुमचि-न्तयत् स राजा। अतो दूरस्थदेशानामपि राज्ञामामन्त्रणार्थं मामप्रैषीत् । अतोऽत्राजगामाहम् ।

जयचन्द्रोऽवदत्—वृद्धोऽहम्, एतादृग् महोत्सवे औत्सुक्यमपि न वर्तते, परं मम पुत्रं प्रेषयिष्यामि ।

पितुराज्ञया पुत्रो रत्नपुरं गन्तुं सज्जीभूतः। मार्गे गच्छन् विविधवन-प्रदेशानां सौन्दर्यं दृष्ट्वा पुलकितः सञ्जातः। अत्रावसरे कविरष्टापदस्य वर्णनं सातिशयकवित्वपूर्णमुट्टङ्कति । ऋषभदेवस्य श्लेषमयीं स्तुतिं करोति विजय-चन्द्रः। तस्य स्तुत्या इन्द्रस्तत्रागत्य तं प्राशंसीत् । तस्मै अक्षय्यतूणीरं शरीरशृङ्गारं च दत्त्वाऽदृष्टोऽभवदिन्द्रः ।

कियद्दिनावसरे तान् विविधप्रदेशानुल्लङ्घ्य रत्नपुरमधिजगाम विजयचन्द्रः। रत्नाङ्गदभूपस्तं स्वागत्य सम्मानितः ।

अत्र रत्नपुर्यां धवलगृह—उच्चैःशिखरजिनमन्दिरप्रासाद—सरोवरादिवर्णनं कविना कृतमस्ति । तान् प्रेक्ष्य विजयचन्द्रो हर्षप्रफुल्लः सञ्जातः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वयंवरणार्थं कलासौन्दर्येण सज्जितं विशालमण्डपमपि स दृष्टवान् । तत्रासीनेषु सर्वेष्वपि नृपेषु विजयचन्द्र इन्द्रदत्तशृङ्गारेणातीवदेदीप्यमानो दृश्यते ।

**सप्तमसर्गे**—स्वयंवरमण्डपे मगधस्य राजा पुरन्दरः, विदर्भस्य महेन्द्रः, कोशलस्यानन्तः, काशीराजः, रैवतस्य पद्मः, कलिङ्गराजः, मालवराजः, गजपुरस्य मदनः, कम्बोजस्य कीर्तिपालः, मिथिलायाः कमलचन्द्रः, मलयस्य कृपः, काश्मीरस्य प्रतापः, हस्तिनापुर्या इत्यादिनृपास्तत्रागताः । तेषां सर्वेषामपि प्रशसां सखीमुखात् संश्रुत्य सा सुलोचना विजयचन्द्रस्य कण्ठे वरस्रजमारोप्य वलिता ॥

**अष्टमसर्गे**—अत्रान्तरे विजयचन्द्रस्योपरि सर्वे राजानः कोपान्विताः सञ्जाताः । काश्मीरस्य प्रतापभूपस्तत्राग्रणीभूतः, तेन सह योद्धुमारभत । परं दवीसाहाय्येन विजयचन्द्रः युद्धे विजितः । सर्वानपि राज्ञः सम्मान्य रत्नाङ्गदः निर्वर्तितवान् । विजयचन्द्रोऽपि सुलोचनया सह गृहं गन्तुं सज्जीबभूव ।

मार्गे कुत्रचिद्वने विजयचन्द्रः सैन्यं न्यवेशयत् । मध्याह्ने पूजावसरे कश्चिच्चारणस्तत्रागत्य जिनेश्वरस्य स्तुतिं कृतवान् । कस्त्वमिति विजयचन्द्रेण पृष्टे तस्य सप्तावतारस्य तेन सह सम्बन्धो न्यगादि ।

ततः प्रस्थानावसरे कालनामा कश्चिद् दैत्य आगत्य तत्र सुलोचनां जहार । तद्वियोगदुःखं क्षणमप्यसहमानो विजयचन्द्रः सत्वरं चेटकं सस्मार । चेटकस्तत्रागत्य सुलोचनायाः शुद्धिं न्यवेदयत्—चमरचञ्चायां पुर्यां वज्रदाढनामा खेचरस्तव सुलोचनां जह्रे । स खेचरो ममाप्यजय्यः, परं कियत्कालान्तरं तव सत्त्वेनैव स जेष्यते त्वया ।

ततः सत्त्वशाली सः सैनिकानादिश्य प्रियामाहर्तुमुत्तरां प्रति प्राचालीत् । तत्रैकस्मिन् वनान्तरे काश्चिन्नागकन्या हल्लीसकादिक्रीडां कृतवतीः स दृष्टवान् । तासु मुख्या पुरोभूय विजयचन्द्रं प्रेक्ष्यावादीत्—अहं तव माता

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विजया, मृता सती अत्र धरणेन्द्रस्य वल्लभारूपेण जज्ञे । ततः सा धरणेन्द्र-पार्श्वे नागलोकं तमनैषीत् । धरणेन्द्रस्तं स्वाङ्के निवेश्यावदत्—तव प्रियां तूर्णमानेष्यामि । विजयाऽपि विजयचन्द्राय रूपव्यत्ययहेतवे एकां गुटिका-मदात् । तया स शुकरूपं विधाय भ्रमितुमारब्धवान् । तत्रैकस्मिन् स्थाने केनचिद् दैत्येनाहृतां काश्मीरस्य प्रतापभूपस्य कन्यां पद्मामद्राक्षीत् । तयोर्वार्तालापे संजाते शुकरूपो विजयचन्द्रोऽज्ञासीद् यद्—कन्येयं विजय-चन्द्राय दित्सिता । ततः शुकरूपं परित्यज्य विजयचन्द्रः प्रकटीभूतः । विवाहार्थं तया प्रियलोचनया पद्मया प्रार्थितः । विजयचन्द्रेणोक्ता सा—यावत् सुलोचना नैति तावन्नौचितिमश्नुत्यावयोर्विवाहः । तस्मादत्रैव तिष्ठ यावत् सुलोचनाऽऽगच्छति ।

तत्पश्चाद् दैवीकृपया श्रवणकुण्डलं सोऽधिजगे । तत्पश्चात् काचित् खेचरी सुलोचनारूपं विधाय तं परीक्षते । दृढव्रतिनं तं ज्ञात्वा सा खेचरी कथयति—वज्रदाढेन मे पत्या त्वत्प्रिया निष्कुटान्तरे मुक्ताऽस्ति । अनेक-विधोपायैरपि तस्याः शीलभङ्गं कर्तुं स नाशकत् ।

तत्र वने कश्चिद् भूतो विजयचन्द्रं वक्ति—विजयपुरं नातिदूरे वर्तते । तत्र चन्द्रबलो नृपतिः नृमेधं कुरुते । विजयचन्द्रस्य कीर्तिः हिंसानिषेधक-रूपेण मयाऽपि श्रुता । तद्वचनं श्रुत्वा नरमेधयज्ञं ध्वसितुमुत्सुकोऽभवद् विजयचन्द्रः । चेटकादेशेन कर्कोटसाहाय्यात् तद्यज्ञान्नरा मुक्तास्तेन । ततो यज्ञदेवं महाकालाभिधं क्रव्यादं युद्धे जित्वा विजयलक्ष्मीं प्रपेदे विजयचन्द्रः । ततस्तस्मिन्नेव वने केचिदप्सरसौ स्त्रियौ हारणी-हारिणीनाम्न्यौ नभोदेशादा-गच्छन्त्यौ दृष्टवान् । ते स्त्रियौ तमचकथताम्—यत् त्वत्परीक्षणार्थमेव हीयं यज्ञ-मायाऽस्मद्रचनासीत् । अतः परं भुवस्तले यज्ञा न भविष्यन्ति परं भवितव्य-नियोगत एव कालेन भविष्यन्ति । कस्तावत् पापो यज्ञं करिष्यति, इति पृष्टे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते जगदतुः यज्ञस्येतिवृत्तं याज्ञवल्क्यसुलसयोराख्यानकम्, तयोस्सुतस्य नव्य· वेदरचनाकथानकम्, तद्वेदानुसारिणां गवाश्वनृमातृपितृमेधकानां यज्ञानां नृपाग्रे फलकथनम्, तेन कश्चिन्नृपस्य यज्ञारम्भादि वार्तां विजयचन्द्रस्य पुर आचख्यतुः। पश्चात् ते देव्यौ तस्यैकमासान्तरं कान्तालाभो भविष्यतीत्यावेद्य तस्य चाहिंसापालकत्वेन प्रशंसां कृत्वा दिवं जग्मतुः।

ततो विजयचन्द्रः स्थगीभृता सहाचलदुत्तरां प्रति। पञ्चमे दिने कापि पर्वतं प्राप्य क्षुद्रपत्तनस्थितं रत्नमन्दिरं दृष्टवान्। तत्र द्वौ सुन्दरौ नरावागत्य तस्मै प्राणमताम् विजयं च स्वसौधं निन्यतुः। तत्र तस्य बहुप्रकारां प्रतिपत्तिं वितेनाते। तद् दृष्ट्वा विजयः प्रोचे—कथमेवं भक्तिर्विधीयते?। तयोरेकस्तत्कारणकथां वक्तुमारेभे। तत्कथायाः संक्षेप एतदस्ति—स नरो विद्याधरः, अपत्येच्छया परदारामपहृत्य यदा शक्रावतारतीर्थसमीपं आगतस्तदा तीर्थयात्रां कुर्वाणो धरणेन्द्रोऽपि तत्र आगतः। तेनापहृतायाः स्त्रियाः रुदनं श्रुतम्। अतो धरणेन्द्रेण विद्याधरः शप्तः, तस्यापत्याप्तिविद्यानाशोऽभवत्। तत्परिहारार्थं विज्ञप्तः सः। ततो धरणेन्द्रेणोचे—शापोऽन्यथा न स्यात् परं विजयाभिधानो मम प्रतिपन्नसुतोऽस्ति, तस्मादेव तव सप्तमे संताने सर्वा विद्याः स्फुरिष्यन्ति। अतो तव प्रतिपत्तिं कुर्वे। अधुना साधयैताः पुस्तकसंस्थिता विद्याः, अस्माकं च यथोचितमाकलय्य प्रसादय।

इति वार्तामाकर्ण्य विजयचन्द्रो दध्यौ—विद्यासंसाधनार्थमेव हि धरणेन्द्रेण मम प्रियालाभो विलम्बितः स्यादिति मन्ये।

ततः स अष्टोत्तरशतं विद्याः साधयितुमारेभे। यथाविधि स्मरतस्तस्य समीपे सर्वा विद्याः समुपतस्थिरे। तस्य सत्त्वपरीक्षार्थमष्टोत्तरशतमश्वानां ता याचिरे। जीवहिंसयैव यदि स्यात् साधना, तदालं तया। ततो विद्या ऊचिरे—अन्यथा स्वतनुखण्डानि पावके हुत्वा साधना फलिष्यति। अतः स्वकलेवरस्य द्वात्रिंशत्खण्डानि ज्वलितानले स जुहाव। बाढं खल्वयं नरो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महासत्त्वशाली—इत्युक्त्वा तस्यानने सर्वा विद्या विविशुः। विद्यावान् विजयचन्द्रो वैरिणं प्रति चचाल।

चमरचञ्चापुर्यां गत्वा मायाविनं वज्रदाढं जगावयम्—यदि जीवितेच्छा ते प्रत्यर्पय मे प्रियाम्। वज्रदाढस्य लघुभ्रातारं व्यजिज्ञपत् परं नान्वमन्यत सः। ततो वज्रबाहुः ससैन्यो विजयचन्द्रम् शिश्रिये। वज्रबाहुस्तेन सह योद्धुं समरप्रकारमदर्शयत्। बालर्षितीर्थदेवान् नत्वा यदि युद्धप्रस्तावः स्यात् तदेन्द्रेणाप्यजय्यो भवान् भविष्यति, इत्यतो वज्रबाहुस्तं प्रथमं बालर्षितीर्थं निनाय। तत्र देवान् नमस्कृत्य वज्रदाढमाजुहाव समरभूमिम्। ततो द्वयोः सैन्ययोः रणः प्रववृत्ते।

कविनाऽत्र विस्तृतमद्भुतं च युद्धवर्णनं कृतमस्ति। तत्र समरभूमौ रत्नचूडाख्यखेचरेश्वरस्य वल्लभा रत्नमालिनी आगत्य स्वपूर्वभववृत्तं वज्रधरतीर्थकृतः श्रुत्वा कथितुमारेभे।

अस्मिन् द्वीपे कृपनाम्नो नृपस्य गान्धारीसंभूतौ चन्द्र-श्रीधरनामानौ द्वौ तनयावास्ताम्। श्रीधरस्य गौरीनाम्नी रूपवती प्रियाऽऽसीत्। चन्द्रस्तावदेकदा तां दृष्ट्वा काममोहितो बभूव। चतुरश्चन्द्रः कनिष्ठं श्रीधरं युद्धनिमित्तं विज्ञप्य रणाय प्राहिणोत्। श्रीधरगमनान्तरं गौर्या सह रन्तुमयं शठात्मा चन्द्रश्चेट्या सह तां न्यवेदयत्। परं सा नान्वमन्यत तस्य विज्ञप्तिम्। अतो गौरी दध्यौ यदयं बलात्कारं करिष्यति, अतः शीलरत्नं रक्षितुं सा एकाकिन्येव निशायां पत्युरन्वगच्छत्। मार्गे श्रान्ता सा कुत्रचिद् यक्षमन्दिरे विशश्राम। तत्रापि तस्याः लावण्येन मोहितो यक्षस्तां परिरब्धुकामः संजातः, परं तस्यां उपदेशेन स विरक्तोऽभवत्, तस्याश्च किङ्करत्वं भेजे। तस्य यक्षस्य साहाय्येन सा पक्षिणीरूपं कृत्वा पत्युः समीपं समरशिबीरं प्राप्ता। पक्षिणीरूपत्वे श्रीधरेण सह वार्तालापं वितेने सा, तं परीक्ष्य स्वरूपभजत्। पश्चात् श्रीधरो गौर्या सहितः स्वपुरं न्यवर्तत।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकदा चन्द्रो गौरी च तत्रागतमभिनन्दमुनिं नन्तुं जग्मतुः। तावुपदिश्यानन्तरं तयोः भवकथामश्रावयन्मुनिः।

सैव गौरी सप्तभवान् भ्रान्त्वात्र सुलोचनारूपेण जज्ञे। गान्धार्याश्च यौ पुत्रौ चन्द्र-श्रीधरनामानौ अस्मिन् भवे विजय-वज्रदाढनामानौ संजातौ। पूर्वस्नेहवशादेव वज्रदाढः सुलोचनां जह्रे। एतदर्थं तौ सांप्रतं युद्धं कुरुत इति श्रुत्वाऽहं गान्धारी युवयोः समीपमुपस्थिताऽस्मि।

इति वार्तां मातुः श्रुत्वा सलज्जो वज्रदाढो विरक्तोऽभवत्। वज्रदाढः तत्रैव सर्वविरतिमादृत्य कायोत्सर्गेण आत्मसमर्पणं व्यधात्। विजयोऽपि तं क्षमयामास। पश्चाद् वज्रदाढपुत्रान् पितृराज्येऽभिषिच्य मलिनाङ्गीमपि शीलरत्नेनाधिकं शोभितां सुलोचनां नीत्वा, वनान्तरे प्रतापकन्यां पद्मां विवाह्य स्वपुरं मङ्गलपुरमागमद् विजयचन्द्रः। द्वाभ्यां पत्नीभ्यां सहितो विजयः पितरौ प्राणंसीत्। पिताऽपि पुत्रं गाढमालिङ्ग्य तस्मै प्राज्यं राज्यमदात्॥

**नवमसर्गे**—अथ विजयचन्द्रः पैतृकं पदमासाद्याधिकं विरेजे। प्रजाश्च सुखेनापालयत्, सुलोचनां पट्टराज्ञीपदेऽस्थापयत्। तया सह रममाणोऽयं बहून् वासरान् निर्जगाम।

एकदा निशीथिन्यां तया सह रतिसुखं प्राप्नुवन् रतिश्रान्तो निशायामशृणोत्—'पतिष्यामि, पतिष्यामि' इति। प्रभाते संभ्रान्तोऽयं नृपो मन्त्रीनाहूयापृच्छदस्यार्थम्। सर्वेऽपि मन्त्रिणः स्वबुद्ध्यनुसृतमर्थं व्यजिज्ञपन् परं न तस्य मनः समादधत्। एकस्तत्र धीरचन्द्रनामको मन्त्री गम्भीरगिराऽचीकथत्—यद्भाव्यं तदन्यथा न भवति, तथापि धर्मेण श्रेयो भवत्येव, अतः धर्म्यकार्यं भवान् वितनुयात्। नृपस्तत्कार्याणि वैविध्येन कर्तुमारेभे। एकदाऽम्बरादापतन्तं तेजःपिण्डं सोऽपश्यत्। तस्मात् पिण्डात् निस्सरन्तीं काञ्चित् काञ्चनगौरद्युतिं दधानां स्त्रियं वीक्ष्य नृपो विसिष्मिये। तस्या अंसयोः हंसयुग्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निषण्णमासीत्, नूपुरं दधाना सा अगात् अग्रं नृपसमीपं नरीनर्ति स्म । जलभृङ्गारेण गण्डूषं वितीर्य तस्मात् मौक्तिकीभूतान् जलसीकरान् प्रस्फुर्य हंसयुग्ममुत्तार्य चुगयति स्म ।

'का त्वम्' इति पृष्टे राज्ञि, यदा तां धर्तुमना नृपोऽभवत् तदैव सा तस्य पश्यत एव तिरोदधे । पुनरपि सा द्वितीयदिने आगमत्, तमेव प्रकारमतनोत् । तृतीयदिने यावत् सा प्रत्यक्षीबभूव तदा नृपः कोमलगिरा तां प्रोचे–त्वं किमिति खेलसि ? त्वां विवोढुकामोऽहमिति स्वपरिचयं देहि ।

प्रत्युत्तरति सा – सिद्धिपुरीशितुरहं सुता विज्ञकन्यका देवानामपि मान्या त्वया विज्ञेया । मम न कदापि रुक्, न भयः, न मृत्युः, न जरा – अहं तु नित्ययौवना पाञ्चालीति विश्वेऽपि विश्रुता । यदि त्वं मां विवोढुमिच्छसि तदा ममेयं प्रतिज्ञा वर्तते — यः पुरोधाः वृत्तचतुःशैलः मद्वृत्तज्ञः ब्रह्मविद् द्विजः स्यात् तत्पुरोधसैवाहं वरं वृण्वे, एतादृक्पुरोधसमानय यदि ते विवाहेच्छा । उत्तरं दत्त्वा सान्तर्हिता ।

एतादृक्पुरोधसं शोधयितुकामो नृपः सर्वत्रापृच्छत् परं न तस्य शुद्धिं लेभे सः । पश्चात् कस्यचिन्महात्मनः संयोगात्, तं सिद्धिपुरीशितुः कन्याया वृत्तमपृच्छन्नृपः । महात्मा किञ्चिद् विहस्य जगौ–श्रियामासक्तं त्वामुपदेष्टुमेव साऽगच्छत्, 'सा कन्या नान्यत् संयमश्रियं विना' इति तन्निगमनं श्रुत्वा तस्य शान्तिर्जाता । तन्निगमनस्य संक्षेपस्त्वेवम्—

"दुर्लभं जगति जन्म मानुषं,
तत्र जैनवचनं सुदुर्लभम् ।
कश्चिदेव लभते च भाग्यवान्,
सिद्धिनायकसुताङ्गसङ्गमम् ॥"

तदा स विरक्तोऽभवत् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतत्कथानिबद्धे काव्येऽस्मिन् महाकाव्यस्य लक्षणानि कविनाऽसूत्र्यत। सर्वेषां शृङ्गार-हास्याद्भुतशान्तादीनां व्यावर्णनं कविनातिकौशलेन प्रासादिकभाषया च कृतमस्ति। कवेरस्य कल्पनागतिं च विचिन्त्यैकमत्येन विदुषां स्वीकृतं स्यादेव यदयं महाकविः कालिदासादिमहाकविकोटावनूनप्रतिभो विराजते।

## प्रान्ते-मुद्रणपाठसंशुद्धिः—

वि. सं. २००० वर्षे वयं राजधन्य( राधन )पुरं गताः। तत्र मया सागरगच्छोपाश्रयस्थो ग्रन्थभाण्डागारो दृष्टः। तत्रास्य काव्यस्य प्रतिर्मया समुपलब्धा। तत्रैव मुद्रणयोग्यमिदं काव्यं निश्चित्यादर्शपाठो मया लिखितः। अन्यादर्शैः साकं मूलग्रन्थं संशुद्ध्याथ प्रकटीकृतः। अस्मिन् प्रकाशने आदर्शत्रयं मां समुपालभत।

(१) R संज्ञया राधनपुरस्थसागरगच्छोपाश्रयभाण्डागारस्यादर्शः।

(२) A संज्ञया पत्तनस्थहेमचन्द्रार्यज्ञानमन्दिरस्यादर्शः। ३६ पत्राणि।

(३) B ,, ,, ,, ,, ९५ पत्राणि।

B आदर्शे एतत्काव्येन साकमनेनैव कविना विरचितं गुणवर्म्मचरितमपि विद्यते, तस्य पुष्पिकायामिदं लिखितमस्ति—

"**संवत् १४८७ वर्षे पोष सुदि ७ बुधे श्रीअणहिल्लपत्तने सा० नागड सु० सा० आकाश्रावकेण भार्याजीविणिभ्रातृलिंबा-पुत्रराजाप्रमुखपरिवारसहितेन सप्तदशभेदपूजा कथा लेखयित्वा श्रीअञ्चलगच्छे श्रीमेरुतुङ्गसूरीन्द्रपट्टपयोनिधिचन्द्रश्रीगच्छेश-श्रीजयकीर्तिसूरीश्वरगुरूणां प्रदत्ता वाच्यमानाश्चिरं नन्दतु।**

**यादृशं पुस्तके दृष्ट्वा, तादृशं लिखितं मया।**<br>
**यदि शुद्धमशुद्धं वा, मम दोषो न दीयते॥**<br>
**श्रीः। भद्रं कर्म्मालिखितम्॥ श्री॥**"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाठशुद्धौ मुद्रणशुद्धौ च व्याकरणतीर्थोपाधिधारिणा **प्रेमचन्द्रात्मज अम्बालालपण्डितेन** मम संपादनकार्ये सहयोगो दत्तः, अतः स धन्यवादार्हः।

श्रीधरचरितप्रकाशनप्रसङ्गे मम तीव्रहर्षो भवति यद्, इदं चरितं भारतीय-संस्कृतिकार्ये प्रौढं सहयोगं प्रदास्यतीत्याशां बिभ्राणोऽहमत्र विरमामि ॥

**वि. सं. २००७ अक्षय-तृतीया - बुधवासरे**
**स्थलम्**
**श्रीयशोविजयजैनगुरु-कुलम् — पालीताणा (सौराष्ट्रः)**

**श्रीयशोविजय जैनगुरुकुल-संस्थापकपूज्यगुरुदेवश्रीचा-रित्रविजयचरणचञ्चरीको**
**मुनिः ज्ञानविजयः** (त्रिपुटी)

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अञ्चलगच्छीयश्रीमाणिक्यसुन्दरसूरि-
विरचितं छन्दोलक्षणयुतं
स्वोपज्ञदुर्गपदव्याख्यासमलङ्कृतं च

# श्रीश्रीधरचरितमहाकाव्यम् ।

## प्रथमः सर्गः ।

श्रीमान् पार्श्वप्रभुर्जीयात्, जगत्प्रद्योतनो नवः ।
यस्य स्मरणतोऽप्याशु, प्रणश्यन्ति तमोव्रजाः ॥ १ ॥

श्रीविजयचन्द्रभूपतिचरित्रपीयूषसारकासारः ।
माणिक्याङ्कग्रन्थः, स जयति जगति प्रमोदकरः ॥ २ ॥

तस्य स्वोपज्ञस्य, प्रीतिकृते कृतिजनस्य वक्ष्यामि ।
दुर्गपदव्याख्यानं, श्रीमान् माणिक्यसुन्दरः सूरिः ॥ ३ ॥

तथाहि—

यस्मिन्नाभिनरेन्द्रनिर्मलकुलप्रद्योतनोद्योतित-
त्रैलोक्ये शुभति प्रभातसमयो जातस्तृतीयारकः ।
आरोग्यं खलु भास्करादिति वचस्तथ्यं यतो जायते,
सोऽयं वाञ्छितसिद्धये भवतु वः स्वामी युगादिप्रभुः ॥१॥
[ शार्दूल० ]

१ °क्ये सहसा प्र° A। अत्र स्वोपज्ञव्याख्यायां 'शुभति' पदस्य व्याख्यादर्शनात् 'शुभति' इत्यस्य 'सहसा' इति A आदर्शाधिकृतपाठभेदस्तु काल्पनिकः प्रतिभाति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दु० व्या०–यस्मिन्नाभि०** इत्यादि–आद्यवृत्ते शुभति इत्यत्र 'शुभ शुम्भत् शोभार्थे' इति धातुः, शतरि सप्तम्येकवचने च ज्ञेयम्। 'आरोग्यं खलु भास्करात्' इति लोकव्याख्या वर्तते परं सा न सत्या, यतः—

स्वयं पङ्गुसुतः पङ्गुः, पङ्गुः सारथिरेव च।
आदित्यो देहदाता चेद्, यशः पुण्यैरवाप्यते ॥

अतो भगवानेव सूर्यः स्वयं निरामयत्वाद् भक्तानामपि निरामयत्वं करोतीत्युक्तम् ॥ १ ॥

**राजश्रीविश्वसेनान्वयसरसिरुहे राजहंसावतारः,**
**सम्मोहध्वान्तवारे रविरुचिरचिरामातुरुल्लासकारः।**
**षट्खण्डक्षोणिनाथप्रणतपदयुगः पञ्चमश्चक्रधारः,**
**श्रीशान्तिः षोडशोऽर्हन् जयति शिवरमासारशृङ्गारहारः ॥२॥**

**दु० व्या०**–द्वितीयं वृत्तं सुगमम् ॥ २ ॥

**यस्मै सद्दानलीलाविजितसुरमणिस्वर्गिधेनुद्रुमाय,**
**स्वं यानं वारणेन्द्रो दिशतु नवघनो नीलकान्तिं च दण्डे।**
**तद्युक्तं लक्ष्मलक्ष्यः स्वयमभजत यं दक्षिणावर्त्तशङ्खः,**
**स श्रीमान् नेमिनाथः प्रथयतु भविनां वाञ्छितार्थस्य सिद्धिम् ॥**

**दु० व्या०**–तृतीये वारणेन्द्रो गजेन्द्रो यस्मै स्वं यानं रथादिकं पक्षे गतिम्, दण्डे दण्डपदे, अदिशद् ददौ, गजपक्षे दानं मदजलम् ॥ ३ ॥

**नानापल्लवकलितो, यस्य न साम्यं सुरद्रुमोऽप्येति।**
**विपदुच्छेदविभुर्वः, पार्श्वजिनः सर्वसंपदे सोऽस्तु ॥ ४ ॥**

**दु० व्या०**–नानाप्रकारैः पल्लवैः, पक्षे आपल्लवैः कष्टलेशैः आपल्ल [ः] ॥ ४ ॥

---

१ °शत न°B। २ °लक्षः स्व°A।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मन्दाकिनीपूर इवाशु यस्य, शिशोरपि प्रोज्ज्वलवाग्विलासः।
सुरेन्द्रसन्देहतरून् चिभेद, स मे धियं यच्छतु वीरधीरः॥ ५॥

यत्केवलज्ञानमृगाङ्कमध्ये, जगन्मृगस्यापि तुलां न याति।
अनन्ततादृग्गुणकोशकल्पा, यच्छन्तु ते सर्वजिनाः सुखानि॥ ६॥

पद्मपुस्तकधरा सरस्वतीत्येव या जगति गीयते परैः।
या ददाति जनतासु भा-रती, सा चिरं जयतु जैनभारती॥७॥

दु० व्या०—जैनभारती जैनवाणी। जनतासु जनसमूहेषु। प्रभा रतिः समाधिः, ते द्वे ददाति॥ ७॥

कुलिशाङ्कितहस्तोऽपि, क्षमाभृत्पक्षरक्षकः।
साश्चर्यमिन्द्रभूत्याख्यां, बिभ्राणो गोतमः श्रिये॥ ८॥

दु० व्या०—इन्द्रवद्भूतिः ऋद्धिर्यस्य स इन्द्रभूतिः। कुलिशं वज्रं तेनाङ्कितो हस्तो भवति स क्षमाभृतां पर्वतानां पक्षरक्षकः कथं स्यात्? पक्षे कुलिशं वज्रं चिह्नम्। क्षमाभृतः साधवः तत्पक्षरक्षकः॥ ८॥

श्रीमद्वीरविभोर्बभुर्गणधरास्तीर्थे सुधर्मादय-
स्तेषामन्वयवार्धिवर्द्धनविधौ चन्द्रोऽभवच्चन्द्रमाः।
चन्द्रस्यापि कुले दिवाकर इव प्रक्षिप्तदोषोत्करः,
स श्रीमान् गुरुरार्यरक्षित इति ख्यातः क्रियाशालिषु॥९॥

दु० व्या०—चन्द्रश्च चन्द्रनामा आचार्यः। प्रक्षिप्ता निराकृता दोषोत्करा दोषसमूहा येन, पक्षे प्रक्षिप्ता दोषा रात्रियैः, एवंविधाः ऊत् ऊर्ध्वाः कराः किरणा यस्य॥ ९॥

तत्पट्टानुक्रमे वादिकरिघट्टनकेसरी।
श्रीमेरुतुङ्गसूरीन्द्रश्चिरं विजयतां भुवि॥ १०॥

सेवन्तेऽद्भुतकान्तिकीर्तिकमलासौभाग्यभाग्यादयो,
भूपाला इव यं गुणाः कलियुगत्रस्ताः शरण्यं नृपम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स श्रीअञ्चलगच्छवासरमणिः सूरीन्द्रचूडामणि-
र्भूमीहारनिभश्चिरं विजयतां श्रीमेरुतुङ्गो गुरुः ॥ ११ ॥

दु० व्या०—शरण्यं शरणागतवत्सलम् । गुरुरित्यत्र " गुरावेकश्च " ( सिद्धहेमसूत्रम्–२. २. १२४. ) इति सूत्रेणैकवचनम् ॥ ११ ॥

तेषां गुरूणां वात्सल्यभरकेसरिकन्दरः ।
शिष्योऽस्मि भूरिभक्तः श्रीसूरिमाणिक्यसुन्दरः ॥१२॥

दु० व्या०—तेषां श्रीमेरुतुङ्गसूरीणां दीक्षागुरुत्वात् शिष्योऽस्मि । गुरूणां वात्सल्यभर एव केसरी, तस्य कन्दरः । यस्य गुरुषु भक्तिस्तत्र गुरोर्वात्सल्यमपि स्यादिति भावः ॥ १२ ॥

कलाभृतो यस्य करेण मौलिस्पृशा विनेयेष्विव कैरवेषु ।
लक्ष्मीर्लुलन्ती भजते न मोहं, करोमि विद्यागुरवे नमोऽहम् ॥१३॥

दु० व्या०—अहं विद्यागुरवे एव नमः करोमि । यस्य विद्यागुरोः करेण मौलिस्पृशा सता विनयेषु शिष्येषु, लक्ष्मीः शोभा लुलन्ती सती मोहं जाड्यं लन्ती न भजते । किंविशिष्टस्य ? यस्य कलाभृतः कलायुक्तस्य, पक्षे चन्द्रस्य यथा—कलाभृतश्चन्द्रस्य करेण, जातावेकवचनत्वात् किरणेन मौलिस्पृशा सता, कैरवेषु कुमुदेषु, लक्ष्मीः कमला लुलन्ती, मोहं लक्षणया आलस्यं न भजते; सदैव तत्र वसतीति भावः ॥ १३ ॥

[3]श्रीजयशेखरसूरीश्वरसुगुरुभ्यो नमोऽस्तु मम तेभ्यः ।
येषां पदप्रसादादहमपि गुम्फं करोम्येवम् ॥ १४ ॥

दु० व्या०—येषां विद्यागुरूणाम् । गुम्फं ग्रन्थम् ॥ १४ ॥

---

१ °णां सद्भक्तिभ°A । २ °स्मि वाचनाचार्यो मुनिमा°A ।
३ A आदर्शे नास्तीदं (१४) पद्यम् । B आदर्शे सत्यप्यस्मिन् पद्ये पद्याङ्कमे-क्रमेवाश्रित्य न्यस्तमिति प्रक्षिप्तमिदं ज्ञायते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तान् नत्वाऽतिप्रसिद्धेन, छन्दसाऽऽनन्दसाधकम् ।
कृतपण्डितसौहित्यं, साहित्यं वच्मि किञ्चन ॥ १५ ॥

दु० व्या०–कृतं पण्डितेषु सौहित्यं तृप्तिर्येन ॥ १५ ॥

लक्ष्यलक्षणसंयुक्तं, छन्दसो यत् प्रदर्शनम् ।
स्निग्धदुग्धसमे ग्रन्थे, नूनं तच्चारुशर्करा ॥ १६ ॥

प्रासादस्य प्रतिष्ठानपीठिकेवाभिधीयते ।
आदौ गणव्यवस्था या, छन्दः साहित्यकारणम् ॥ १७ ॥

दु० व्या०–प्रासादस्य प्रतिष्ठा अन्नपीठिका इव या गणव्यवस्था॥ १७॥

मात्रावृत्तं वर्णवृत्तमाद्यमार्यादिकं मतम् ।
समार्ध-समवृत्तादि, संभवं तु परं भवेत् ॥ १८ ॥

दु० व्या०–पूर्वं मात्रावृत्तं भवति, ततो वर्णवृत्तं स्यात् । आद्यं मात्रावृत्तमार्यादिकं मतम्, परं वर्णवृत्तं समवृत–अर्धसमवृत्ते आदिशब्दाद् विषमवृत्तसंभवं भवेत् ॥ १८ ॥

द्विगुरुः सभजान् लौ च, पश्चाऽऽर्यादौ गणा अमी ।
समार्ध-समवृत्तादौ, म्यरस्तजभनाः पुनः ॥ १९ ॥

क्रमेण भजसा ज्ञेया, आदिमध्यान्तगे गुरौ ।
लघौ तु यरता मश्च, त्रिगुरुस्त्रिलघुश्च नः ॥ २० ॥

दु० व्या०–गुरौ आदिमध्यान्तगे सति क्रमेण भगण–जगण–सगणा भवन्ति ॥ २० ॥

दीर्घप्लुताश्चानुस्वारविसर्गसहितस्तथा ।
प्रद्रह्रप्रश्नादिवर्जं, संयोगे पश्चिमो गुरुः ॥ २१ ॥

दु० व्या–दीर्घ–'आ ई ऊ ॠ ए ऐ ओ औ' लक्षणः ॥ २१ ॥

---

१ °युक्तच्छ° B । २ दीर्घः प्लु° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऋजुर्लघुर्गुरुर्वक्रः, पादान्ते वा गुरुर्लघुः ।
विश्रामश्च यतिर्ज्ञेया, चतुर्थांशः स्मृतं पदम् ॥ २२ ॥

समवृत्तं भवेत् तुल्यलक्षणांह्रिचतुष्टयम् ।[1]
यत्राद्यामस्तृतीयांह्रि चतुर्थश्च द्वितीयवत् ॥ २३ ॥[2]

तदर्धसममन्यत् तु, विषमं विषमांह्रिभाक् ।
एकैकाक्षरवृद्धाः स्युः, समे तूक्तादिजातयः ॥ २४ ॥ युग्मम् ॥

उक्ताऽत्युक्ता (१-२) तथा मध्या (३), प्रतिष्ठा च (४) ततः स्मृता।
सुप्रतिष्ठा च (५) गायत्र्युष्णिगनुष्टुप् (६-७-८) तथा मता ॥२५॥

बृहती (९) पङ्क्तिस्त्रिष्टुप् च (१०-११) जगत्यतिजगत्यपि (१२-१३)।
शर्करी (१४) चातिशर्क्यष्टयत्यष्टी च (१५-१६-१७) धृतिस्ततः (१८)॥

ततश्चातिधृतिः (१९) ख्याता, कृतिः (२०) प्रकृतिराकृतिः (२१-२२)।
विकृतिः (२३) संकृतिः (२४) प्राज्ञैरुक्ताभिकृतिरुत्कृतिः (२५-२६)॥

अत ऊर्ध्वं मताश्चण्डवृष्टिप्रभृतिदण्डकाः ।
अनुक्तमत्र गाथेति, शेषं षट्पदिकादिकम् ॥ २८ ॥

आर्यादौ वर्णवृत्तेऽपि, प्रसिद्धं प्रायशो मया ।
वक्ष्यते ललितच्छन्दस्तेषामानन्त्यमन्यथा ॥ २९ ॥[3]

इत्थं पूज्यपदप्रसादविशदप्रासादकेलीकर-
स्तत्तद्ध्यानसमुद्भवन्नवनवश्रयःश्रिया बन्धुरः ।
माणिक्याङ्कमनोज्ञमद्भुतकृपाधर्मादिमर्मास्पदं,
कुर्वे सार्वजनीनमेषचरितं श्रीश्रीधरक्ष्मापतेः ॥ ३० ॥

---

१ °क्षणाङ्घ्रि च° R । २ °ह्रि द्वितीयश्च चतुर्थवत् R ।
३ °लितं छ° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वे जन्मनि भूपतिर्भुवि बभौ नाम्ना किल श्रीधर-
स्तार्तीयिकभवे स एव विजयश्चन्द्रोत्तरोऽभून्नृपः ।
त्रैलोक्यस्य विभूषणाय चरितैर्माणिक्यहारद्युते-
स्तस्यैवात्र कथा प्रथा रसवती प्रायोऽवगम्या बुधैः ॥ ३१ ॥

दु० व्या०—माणिक्यशब्द इति सर्गप्रान्तकोऽन्य अङ्कश्चिह्नमतो माणिक्याङ्कः ॥ ३१ ॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरि[1]-
विरचिते माणिक्याङ्के[2] श्रीश्रीधरचरित्रे प्रस्तावना-
वर्णनः प्रथमः सर्गः । ग्रन्थाग्रम् ॥ ४३ ॥

१ °रवि° A । २ ° क्याङ्कग्रन्थे दुर्गपदव्याख्यायुक्तश्री° R ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# द्वितीयः सर्गः ।

१. **अथार्यादि**—आर्यायामाद्येऽर्द्धे चतुष्कलाः, सप्तगणाः गुरुश्चान्ते विषमे जो न स्यात्। षष्ठस्थाने जश्चतुर्लघुर्वा, द्वितीयेऽर्द्धे षष्ठस्थाने लघुरेव शेषं पूर्ववत् ।

२. **अत्यार्या**—आर्याद्यार्द्धे षष्ठे चतुर्लघौ सति तदाद्यलघोरग्रे यतिः स्यात्। सप्तमे चतुर्लघौ तदाद्यलघोः पश्चाद् यतिः। द्वितीयेऽर्द्धेऽपि पञ्चमे चतुर्लघौ[1] तदाद्यलघोः पश्चाद्[2] यतिः ।

३. **गीतिः**—आर्याद्यार्द्धे तुल्यदलद्वया गीतिः ।

४. **उद्गीतिः**—दलद्वयव्यत्ययादुद्गीतिः ।

५. **उपगीतिः**—आर्याद्वितीयार्द्धसदृग् दलद्वयोपगीतिः ।

६. **आर्यागीतिः**—आर्यादलद्वयेऽप्यन्ते गेऽधिके आर्यागीतिः ।

७. **वैतालीयम्**—वैतालीये प्रथम-तृतीयपादयोः षट्कलाः स्युः। द्वितीय-तुर्ययोरष्टौ च परमत्राद्याः षडपि कला लघवो न स्युः। पादश्चतुष्केऽप्यन्ते रलगाः स्युः। अत्र च समकला पराश्रिता न स्यात्। तथा च विषमे षट्कला ज्ञेयाः। समे त्वष्टौ च षट् नलाः। वैतालीये समकला नाग्रगा अन्ते रलौ गुरुः। यतिं तदेवौपच्छन्दसिकम्।

८. **प्राच्यवृत्तिः**—समे पादे तुर्यपञ्चमकलयोर्योगशेषे वैतालीयलक्षणे प्राच्यवृत्तिः ।

९. **चारुहासिनी**—एतेषां विषमपादजा चारुहासिनी ।

१०. **अपरान्तिका**—समपादजा अपरान्तिका। अथैषां क्रमाल्लक्ष्यमाह ।

दु० **व्या०**—आर्यादिलक्षणव्याख्या सुगमा। लक्ष्यं व्याख्यायते ॥

---

१ °घौ सति त° B । २ °श्चादेव यतिः B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयति जिननयनयुगलं, निर्मलतारं कृपारसागारम् ।
विकसितनिलीनमधुकरनलिनोपममतुलकान्तिभरम् ॥ १ ॥

जीवदयार्थे निरतः, श्रीमद्विजयादिदेवताभिमतः ।
धरणेन्द्रनागपुत्रः, स जयति राजा विजयचन्द्रः ॥ २ ॥

दु० व्या०—जयतीत्यादि—सुगमौ ॥ १–२ ॥

यस्यात्मकर्मनीरक्षीरविवेकं मराल इव चक्रे ।
पार्श्वजिनप्रणिधानं, स जयति राजा विजयचन्द्रः ॥३॥

दु० व्या०—श्रीपार्श्वजिनप्रणिधानेन स केवलज्ञानं प्राप इति भावः ॥३॥

यस्य कथापीयूषं, श्रवणपुटैः सुकृतिनां चिरं पिबताम् ।
याति न याति च तृष्णा, स जयति राजा विजयचन्द्रः ॥४॥

दु० व्या०—लोभरूपा तृष्णा याति, श्रवणेच्छारूपा तृष्णा न याति ॥

तथाहि—

लक्ष्मीमङ्गलनिलयं, जम्बूद्वीपोऽस्ति भारते क्षेत्रे ।
मङ्गलपुरं पुरन्दरपुरोपमां प्रापितं पौरैः ॥ ५ ॥

जिनसद्मशृङ्गसङ्गिध्वजव्रजव्याजतो व्यराजन्त ।
यत्पौरसुकृतपार्वणनिशीथिनीनाथकरनिकराः ॥ ६ ॥

शिवरूपोऽपि न रुद्रो, न घनसुहृद्वाहनोऽपि च स्वामी ।
यत्र न्यविशत लोको, लक्ष्मीकान्तो न वैकुण्ठः ॥ ७ ॥

दु० व्या०—न्यविशत इति 'विश्' धातुः । निपूर्वो "निविशः" [३. ३. २४.] इति आत्मनेपदम् । किंविशिष्टः लोकः ? यः शिवरूपः स कथं न रुद्रः स्यात् ? इत्थं विरोधः । विरोधपरिहारमाह—शिवरूपः कल्याणरूपो, न रौद्रश्च स्वामी अपि, यः स्वामी कार्तिकेयो भवति स घनसुहृद्वाहनः कथं न स्यात् ? इत्थं विरोधः । स्वामी स्वस्वगृहापेक्षया । न च घनाः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहवः सुहृदो मित्राणि तेषां वाहनो वञ्चकः । यो लक्ष्मीकान्तः स वैकुण्ठः कथं न स्यात् ? इत्थं विरोधः । लक्ष्म्याः कान्तः, वै निश्चितं न कुण्ठः बुद्धिरहितः ॥ ७ ॥

राज्यं पालयति स्म, प्राज्यं जयचन्द्रभूपतिस्तत्र ।
यस्य प्रतापतपनो, न घनैरपि संवृतो रिपुभिः ॥ ८ ॥

दु० व्या०—पक्षे घनैः मेघैः, संवृतः आच्छादितः ॥ ८ ॥

यस्मिन् करवालकरे, क्रीडति रणसरसि सिन्धुरेश इव ।
जाड्यगताः शत्रुभटा दर्दुरवद् दूरतो नेशुः ॥ ९ ॥

दु० व्या०—गजपक्षे करवालवत् करः सूण्ढो यस्य स तस्मिन् । जाड्यं युद्धमाश्रित्य, पक्षे जलस्य भावो जाड्यम्, डलयो रैक्यम् ॥ ९ ॥

यस्य यशःकर्पूरे, सौरभपूरः सुरक्षितो भुवने ।
चित्रं शत्रुसमुद्भवदुर्यशसाङ्गाररूपेण ॥ १० ॥

दु० व्या०—शत्रुजातोऽपि हितं चिन्तयतीति चित्रम् ॥१०॥

शशिमण्डलीव सकला, सकलकलाकेलिकेलिगृहममला ।
कमला हरेरिव कला, कलावती तस्य कान्ताऽऽसीत् ॥ ११ ॥

दु० व्या०—चन्द्रमण्डलवत् सकला सश्रीका । सकलानां कलाकेलेः कामस्य केलीनां गृहं स्थानम् । कला मनोज्ञा ॥ ११ ॥

अथ यत्यार्या—

यन्निर्मलशीलजिता, घनशैवलकलुषसलिलसुरतटिनी ।
भ्रमति त्रिजगन्मध्ये, भीरुः किमु तरलभङ्गिभरा ॥ १२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गीतिः—

यस्याश्वपाकमलिनी, विलसत्यतिभक्तिकम्रकलहंसी ।
अपि मदनग्रीष्मऋतौ, ग्लानिं न प्राप मानससरःस्था ॥१३॥

दु० व्या०—मदनग्रीष्मऋतावपि ॥ १३ ॥

उद्‌गीतिः—

भीतो हृदि स कलङ्कं, सकलं किं नो बिभर्ति शशी ? ।
वीक्ष्य यदाननकमलं, न न कमलं कलयति स्म दुर्गजलम् ॥१४॥

दु० व्या०—स सर्वप्रसिद्धः शशी हृदि भीतः सन् सकलं संपूर्णं कलङ्कं किं नो बिभर्ति ? अपि तु बिभर्ति । कमलं दुर्गजलं न न कलयति स्म यदाननकमलं वीक्ष्य ॥ १४ ॥

उपगीतिः—

यद्रूपेऽननुरूपे, निरूपिते बोभवीति स्म ।
रम्भाऽरं भारहिता, गौरी गौरी रमाऽप्यरमा ॥ १५ ॥

दु० व्या०—रम्भा अरं अत्यर्थं, भारहिता । गौरी गौरी काली । रमाऽपि अरमा अलक्ष्मीः बोभवीति स्म । अननुरूपे निरूपमे, निरूपिते दृष्टे सति ॥ १५ ॥

आर्यागीतिः—

यन्मधुरगीर्विलासस्पर्द्धी, नौचित्यतो विरश्चिः किं न ।
जगति वितेने दण्डं, गुणनद्धायां विपञ्च्या नूनम् ॥१६॥

दु० व्या०—पक्षे दण्डं विग्रहम् ॥ १६ ॥

---

१ °या नूनं विपञ्च्या [ : ] A।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ वैतालीयम्—

बुभुजे न नभोगसंपदं, स तया पूर्णिमयेव चन्द्रमाः ।
न च तस्य ययौ हृदि स्थितस्तनया भावकलङ्ककालिमा ॥१७॥

दु० व्या०—न नभोगसंपदम् भोगसंपदम् । चन्द्रपक्षे नभोगः आकाशगतः ॥ १७ ॥

स लसद्गुणधर्मबन्धुरांशुकलक्ष्मीं कलयन् विहाररुक् ।
मुनिवीरवदद्भुतक्रियः, समितिभूषणमन्यदाऽभवत् ॥१८॥

दु० व्या०—स राजा । मुनिश्च वीर मुनिवीरौ तद्वत् । राज्ञः पक्षे समितिः सभा, मुनिपक्षे पञ्च समितयः, वीरपक्षे समिति सङ्ग्रामे । राजा किं कुर्वन् ? लसन्तो ये गुणाः तन्तवस्तेषां धर्मः स्वभावस्तेन बन्धुराम् । अंशुकलक्ष्मीम्—वस्त्रलक्ष्मीम् कलयन्, विशेषतो हारेण रोचते विहाररुक् । क्रिया प्रभातक्रिया ज्ञेया ॥ १८ ॥

गणनायकदण्डनायकैः, सामन्तैः सचिवैः शुचिद्युतिः ।
उदयेऽपि रवेरयं रयान्नक्षत्रैः परिवारितो न कैः ? ॥ १९ ॥

दु० व्या०—गणनायकादिभिः कैः न न परिवारितः ? अपि तु सर्वैः । शुचिः पवित्रा द्युतिर्यस्य, पक्षे चन्द्रः तत्पक्षे कैर्नक्षत्रैर्न परिवारितः । अपि तु सर्वैरपि ॥ १९ ॥

गुरुकविबुधकेतुमण्डली, व्यलसन्मञ्जुलमङ्गलोदिता ।
परितोऽस्य परं तमोग्रहो, न च मन्दोऽपि रुचिं क्वचिद् दधौ ॥

दु० व्या—अस्य राज्ञः । परितो गुरुः पुरोहितः, कविः कवीश्वरः, अन्योऽपि बुधानां विदुषाम्, केतुः ध्वजसमानस्तेषां मण्डली श्रेणिः । सा किंविशिष्टा ? मञ्जुलं मङ्गलोदितं मङ्गलवचनं यस्याः सा । परं तमसि पापे ग्रहो यस्य स पुमान् । मन्दो मूर्खोऽपि, रुचिं अभिलाषम् । अथ पूर्वोक्त-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चन्द्रस्य परितो गुरुः बृहस्पतिः कविः, शुक्र-बुध-केतुमण्डली सा किंविशिष्टा ? मञ्जुलं मङ्गलस्य उदितं उदयो यस्यां सा। तमोग्रहः राहुः, मन्दः शनिः, रुचिः कान्तिः ॥ २० ॥

हृदि यस्य यदि स्थिता रमा, शिरसि छत्रमिषेण चन्द्रमाः ।
श्रुतिकुण्डलतां रविर्ययौ, मनुजोपासनवर्णनाऽस्य का ? ॥२१॥

दु० व्या०—हृदि रमा लक्ष्मीः ।

"भोयराय गलि कंठ लठ कहि कईसउ पडिहाइ ।
तुरि लच्छी मुहि सरसतो सोम विहं चीराइ ॥"

इति लोकोक्तेः । हृदि लक्ष्मीः स्थाने न दोषः ॥ २१ ॥

शशिमण्डलजैत्ररश्मिभिर्जननेत्राणि कृषन्तमूर्ध्वतः ।
दिवि देवपितामहोपमं, स तदाऽऽलोकत सिद्धपूरुषम् ॥ २२ ॥

दु० व्या०—रश्मिभिः किरणैः रज्जुभिर्वा । ऊर्ध्वतः ऊर्ध्वविभागे । देवपितामहेन नारदेन तुल्यम् ॥ २२ ॥

अयि ! कोऽयमनुत्तरच्छविः, किं रविरेति भुवं विहायसः ? ।
अथ पुस्तकहस्ततां दधत् , पुंरूपैव सरस्वती न किम् ? ॥२३॥

दु० व्या०—'अयि' इति कोमलामन्त्रणे निपातः । 'दधिः' इति धारणार्थे॥

अथौपच्छन्दसिकम्—

किमयं वसुधातलं सुधांशुर्ग्रहभीरुः पुरुषच्छलादुपैति ।
शितितरलिपिपुस्तकस्य दम्भान्निजमङ्कं कलयन् विधिप्रदत्तम् ॥

अथ प्राच्यवृत्तिः—

स्फुटमूर्तिममुं शनैः शनैश्चन्द्रेहंसविनिवृत्तधीर्जनः ।
खगतिं शुचिपक्षशालिनं, मन्यते स्म सकलं द्विजेश्वरम् ॥२५॥

१ °न्द्रपक्षिवि° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ वैतालीय-चारुहासिनी—

अमरैः किमु कुर्महे नरैरथ संश्रितखेटभूधरैः ।
विबुधः खगतिर्द्विजेशोरलं, यदयं दयते कुतूहलम् ॥ २६ ॥

दु० व्या०—पूर्वं जनेनायं चन्द्रहंसो वा समेतीति ततो द्विजेश्वरं ब्राह्मणश्रेष्ठं मन्यते स्म । चन्द्रो हंसः सिद्धपुरुषोऽपि खगतिः । शुचिः—उज्ज्वलपक्षशाली । सकलः कलावान्, कलो मनोज्ञो वा, द्विजेश्वरः द्विजाः पक्षिणस्तेषु ईश्वरो वर्तते । विबुधो विद्वान् देवो वा । दयते दत्ते ॥२५-२६॥

अथौपच्छन्दसिक-चारुहासिनी—

मनुजा ननु वञ्चिता वयोवद्, यदमून् विदधे न कः सपक्षान् ? ।
किमनेन महाद्भुताय विद्या, विलसति गगनाध्वगामिनी चेत् ॥२७॥

दु० व्या०—प्राच्यवृत्तिचारुहासिनी तु वैतालीयचारुहासिनीवत् । कः शब्देन ब्रह्मा, वयोवत् पक्षिवत् ॥ २७ ॥

अथ वैतालीयापरान्तिका—

धनिनां स्याद् धनकोटीभिर्न यत्, नृपतीनामपि नो गिरां शतैः ।
अनिरुद्धप्रसरं कलाविदां, विदुषां तत् खलु हेलयाऽखिलम् ॥२८॥

दु० व्या०—तत् कार्यम् ॥ २८ ॥

अथौपच्छन्दसिकापरान्तिका—

नृपसभ्यजने तत्र जल्पतीत्थं वियतः सोऽपि समीयिवान् समाजम् ।
अभिषिच्य समं वीक्षणैः सुधाभिर्विरचितमङ्गलमालपद् वचोभिः ॥२९॥
॥ सप्तभिः कुलकम् ॥

१ °क्षकवु° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—समीयिवान् समागतः सन्, वीक्षणैरेव सुधाभिः ॥२९॥

दिशतु स जिनः कल्याणं वः परः परमेश्वर-
त्रिभुवनजनव्यापत्तापच्छिदे घनबन्धुरः ।
विधुरितभवारातिव्रातस्तमस्तरुसिन्धुरः,
सहजपरमब्रह्माम्भोजे मराल इव स्थिरः ॥३०॥

दु० व्या०—विधुरितः व्याकुलितः व्याकुलीकृतः ॥ ३० ॥

यथा पल्वलं राजहंसाः सलीलं, यथा रत्नकामाश्च माणिक्यशैलम् ।
यथा पार्वणं कौमुदीशं चकोरा मुदाऽऽलोकयंस्तं तथा सभ्यपौराः ॥

दु० व्या०—माणिक्यशैलं रोहणाचलम् ॥ ३१ ॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरि-[1]
विरचिते माणिक्याङ्के[2] श्रीश्रीधरचरित्रे आर्यागीति-
वैतालीयादिलक्षण-पुरनरेश्वर-सभासद्ध-
पुरुषागमवर्णनो नाम द्वितीयः सर्गः ॥
॥ ग्रन्थाग्रम् ५७ अ० ९ ॥

---

१ A °रवि° । २ °क्याङ्कमन्थे दुर्गपदव्याख्यायुक्तश्री° R ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## तृतीयः सर्गः ।

अथ प्राच्यवृत्ति—अपरान्तिकालक्ष्यम्—

उच्छ्रयन्नथ स दक्षिणं करं, राजदन्तरुचिहारमुद्धुरम् ।
ढौकयन्नपरुषाक्षरं गिरं, व्याहरत् प्रति वसुंधरेश्वरम् ॥ १ ॥

दु० व्या०—स सिद्धपुरुषः । उद्धुरं उत्कृष्टम् । अपरुषाक्षरं सुकोमलाक्षरं यथा भवति ॥ १ ॥

त्वं जय प्रणयिनां सुरद्रुमस्त्वं जय प्रथितभूरिविक्रमः ।
त्वं जय प्रभुजयन्तनन्दनस्त्वं जयारिविटपिप्रभञ्जनः ॥ २ ॥

दु० व्या०—[ अरिविटपिप्रभञ्जनः ] अरिवृक्षेषु वायुः ॥ २ ॥

अद्य नेत्रकुमुदे मुदास्पदं, प्रीतिमादृतचकोरवन्मनः ।
वीक्षितोऽसि वसुधासुधाकरस्त्वं महीधरधृतस्फुरत्करः ॥ ३ ॥

दु० व्या०—मुदास्पदं जाते । महीधरैः भूपैः पर्वतैः धृताः स्फुरतः कराः, किरणः करो दण्डो वा यस्य ॥ ३ ॥

संभ्रमादथ वितीर्य विष्टरं, निष्ठुरेतरवचा रुचा रविः ।
सिद्धपूरुषमुवाच भूपनिर्गौणभावगमिता परक्रियः ॥ ४ ॥

दु० व्या०—संभ्रमाद्—आदरात् । गौणभावो निरादरता ॥ ४ ॥

कच्चिदस्ति कुशलं कलाविदां, मौलिमण्डनतनुर्निरामया[1] ।
योगबीजवपनाददुर्जनाः, क्षेत्रतामिह वृषैरदुर्जनाः ॥ ५ ॥

दु० व्या०—'कच्चिद्' इति अभीष्टप्रश्ने । अदुर्जनाः सन्तो जनाः । इह तन्वां वृषैः वृषभैः, पुण्यैर्वा योगबीजवपनात् क्षेत्रतां अदुः । क्षेत्रं शरीरमुच्यते ॥ ५ ॥

---

१ °जईसह° B. ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्य शोभनमिदं सभान्तरस्त्वं, यदा श्रयसि हंसभासुर ! ।
रंरमीति तव यत्र मानसं, तत् पुनः किमु यथाऽस्य मानसम् ॥६॥

दु० व्या०–पुनः परं तत् किं स्थानम् ? यत्र तव मानसं चित्तम्, रंरमीति अत्यर्थं रमते । यथा अस्य हंसस्य मानसं सरःस्थानं स्यात् ॥ ६ ॥

दन्तदीधितिपरिप्लुताधराः, सिद्धरूपगिरोऽथ रेजिरे ।
विद्रुमेन्दुरुचियुक्सुधाच्छटा दुग्धनीरजलधेरिव स्फुटाः ॥ ७ ॥

दु० व्या०–अधराणां प्रवालत्वम्, दन्तकिरणानामिन्दुरुचित्वम्, गिरां सुधात्वं ज्ञेयम् ॥ ७ ॥

अस्ति भूपतिलकोपमं धराभालभूषणमिलापुरं पुरम्[1] ।
वप्रचान्द्रकपिशीर्षमण्डली, यत्र संश्रयति मौक्तिकश्रियम् ॥८॥

दु० व्या०–चान्द्रेति चन्द्रकान्तमणिमयेत्यर्थः ॥ ८ ॥

यत्र मानससरःपयस्तरुच्छायसंश्रयसुखी लभेज्जनः ।
नादसौख्यमपि नीरहारिणी, नूपुरध्वनितहंसकूजितैः ॥ ९ ॥

दु० व्या०–छाया-सभादिशब्दानां समासेऽत्वम् । 'लभ्'धातुः परस्मैपदेऽपि । 'न लभन्ति कदाचनापि कुशलं लभमानः' इत्यादि महाकविलक्ष्यदर्शनात् ॥ ९ ॥

अग्निमित्र इति तत्र वेदवित्, षट्सु कर्मसु पटुर्द्विजोऽभवत् ।
रोहिणीत्यजनि तस्य गेहिनी, स्नेहिनी सकलगेहनीतिवित् ॥१०॥

दुर्नयोऽथ तनयोऽनयोरभूत्, द्यूतचौर्यपरदारसादरः ।
चन्दनादपि न धूमलाञ्छनो, भास्करादपि शनिर्न किं सुतः ॥११॥

---

१. °लकं वसुन्धरा° A ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स भ्रमन् विपिनमन्यदा मुनिं, वीक्ष्य पूर्वसुकृतैरवन्दत ।
प्रीतिमाँश्च भवतापहारिणीरापिबत् तदुपदेशसारणीः ॥ १२ ॥

दु० व्या०—पूर्वभवसुकृतैः ॥ १२ ॥

जैनधर्ममनवाप्य भूपते, के न मोहमदनादिदस्युभिः ।
लुण्टिता भववने चरिष्णवस्तं प्रसादय ततो मुने ! मयि ॥१३॥

दु० व्या०—के पुरुषाः ॥ १३ ॥

इत्यनेन वचसा विचक्षणस्तं प्रति व्रतिवरो वितीर्णवान् ।
द्वादशव्रतविचारपूर्वकं, धर्ममर्म शिवशर्मकारणम् ॥ १४ ॥

क्षेत्रमस्य परिवारितं तथा, कण्टकैः सुकृतबीजरोपणे ।
तत्र नैव पदमादधे यथा, धर्मवर्जितकुदृष्टिदस्युभि ॥ १५ ॥

दु० व्या०—क्षेत्रं शरीरम्, कण्टकैः पक्षे रोमाञ्चैः ॥ १५ ॥

खेचरद्वयमितश्च संचरद्, व्योम्नि वन्दितुमुपाययौ मुनिम् ।
वीक्ष्य तच्चपलहेमकुण्डलं, सोऽस्मरत् कटरि धर्मजं फलम् ?॥ १६ ॥

दु० व्या०—स विभोऽस्मरत् चिन्तयामास । 'कटरि' इत्याश्चर्यकारि ॥

धर्मतः सकलमङ्गलावली, धर्मतः सकलशर्मसंपदः ।
धर्मतः स्फुरति निर्मलं यशो, धर्म एव तदहो ! विधीयते ॥१७॥

व्योमगद्वयमथो रथोपमं, सिद्धिवर्त्मनि मुनिं प्रणम्य तत् ।
तत्र पूर्वविनिविष्टवाडवं, वीक्ष्य कोऽयमिति तं व्यजिज्ञपत् ॥१८॥

दु० व्या०—तत् खेचरद्वयम् । तं मुनिम् ॥ १८ ॥

एष वां ननु सधर्मधर्मभाग्, धर्मबान्धव इति प्रपद्यताम् ।
तत् तथेति परिगृह्य तद्गिरं, वन्दनं विदधते स्म वाडवे ॥१९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—वां युवयोः । सधर्मसदृशः । तत् खेचरद्वयं तन्मुनिरिति ॥ १९ ॥

ते त्रयः प्रणतसाधवो नवोद्भूतसम्मदतरङ्गरङ्गिताः ।
विश्वकाम्यकमलाश्रयास्ततो, हंसवद् वनविहारिणोऽभवन् ॥२०॥

दु० व्या०—हंसपक्षे वनं जलम् ॥ २० ॥

मित्रखेचरवितीर्णविद्यया, वाडवोऽपि खलु खेचरोऽभवत् ।
योगिनां कनकचूर्णयोगतः, किं न लोहमपि हेमतां लभेत् ? ॥२१॥

प्रीतिभाक् त्रिभुवने भ्रमन् भ्रमन्, नव्यतीर्थनिवहं नमन् नमन् ।
सोऽहमेष मुनिनारदोपमः, श्राद्धधर्मनिरतोऽस्मि भूपते ! ॥२२॥

अद्य हृद्यजिनमन्दिरोदरोत्क्षिप्तधूपभवधूमदम्भतः ।
निर्यदूर्जिततमो निरन्तरं, त्वत्पुरं नरपते ! समागमम् ॥ २३ ॥

जैनशासनसरःसितच्छदं, श्रावकोत्तमगुणश्रियां पदम् ।
त्वां विलोक्य नृपमौलिमण्डनं, प्राप पापवनखण्डखण्डनम् ॥२४॥

दु० व्या०—अहं कर्ता । पापवनस्य खण्डखण्डनं कर्म ॥ २४ ॥

भूपते ! भुवि न सन्ति के नृपा ये कृपाविभवदुर्विधा मुधा ।
हारयन्ति हि हहा ! जनुःफलं, निष्कलङ्कसुकृतः परं भवान् ॥२५॥

दु० व्या०—जनुः जन्म ॥ २५ ॥

किन्तु सिद्धपुरुषस्य दर्शनं, निष्फलं नहि महीपते ! क्वचित् ।
तद् वरं वृणु मनीषितं हितं, मा विधेहि मम फल्गु भाषितम् ॥२६॥

भूपतिस्तमवदद् विदांवरं, दर्शनात् तव ममाभवद् वरम् ।
लब्धदुर्लभजिनेन्द्रशासने, बाह्यवस्तु न मनोहरं मयि ॥ २७ ॥

दु० व्या०—विदां—विदुषाम्, वरं श्रेष्ठम् ॥ २७ ॥

अङ्गजा गुणयुता मतङ्गजाः, संगमाः सुखकरास्तुरङ्गमाः ।
सर्वमेव सुलभं भवेऽङ्गिनां, जैनधर्म इह दुर्लभः पुनः ॥ २८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धखेचरवरः क्षमापतिं, प्राह साहसवतां शिरोमणे ! ।
धीरया मधुरया भवद्गिरा, धूनयन्त्यपि शिरः सुरासुराः ॥२९॥

दु० व्या०—सुरासुरा अपि ॥ २९ ॥

सर्वमस्ति तव सर्वभूभृतां, गर्वखर्वणमखर्वतेजसः ।
वेद्मि किन्तु तनयो नयोज्ज्वलस्त्वत्कुले दिवि रविर्न विद्यते ॥३०॥

दु० व्या०—खर्वणं—नीचीकरणम् । अखर्वं प्रौढम् ॥ ३० ॥

तद् गृहाण गुटिकामिमां मम, त्वं लभस्व सुतमद्भुतं द्रुतम् ।
एतयाऽस्तु सुकृताऽऽम्रजं फलं, त्वकृयेव तव पाकपेशलम् ॥३१॥

आदाय तां वैनयकेन सिद्धराजं समाजं च विसृज्य राजा ।
जिनेन्द्रपूजां विरचय्य पट्टदेव्यै ददे देवगुरुस्मृतिज्ञः ॥ ३२ ॥

दु० व्या०—वैनयकेन—विनयकर्मणा । ज्ञः—निपुणः ॥ ३२ ॥

औदार्यादिगुणव्रजैर्यदि जयाचन्द्रो नयेन्द्रोऽखिल-
क्षोणीमण्डलनायकेषु नियतं माणिक्यलक्ष्मीं ललौ ।
स्थाने काञ्चनमुद्रिकामिव परीरम्भेण रम्भासमां
भेजे तां सकलावतीमविकलप्रेम्णा[1] निशि प्रेयसीम् ॥ ३३ ॥

दु० व्या०—नायकेषु पक्षे हारान्तमणिषु । स्थाने—युक्तम् ॥ ३३ ॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरि-
विरचिते माणिक्याङ्के[3] श्रीश्रीधरचरित्रे अपरान्तिका-
लक्ष्यसिद्धपुरुषस्वरूपगुटिकाप्राप्ति-
वर्णनो नाम तृतीयः सर्गः ॥
॥ ग्रन्थाग्रम् ४८ अ० ७ ॥

---

१. °कप्रेमा नि° B । २. °रवि° A । ३. °क्याङ्कग्रन्थे दुर्गपदव्याख्यायुक्त श्री° R

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## चतुर्थः सर्गः।

अथ श्लोकादिच्छन्दः ॥ श्लोकपदेऽष्टौ वर्णाः, विषमे ह्याद्योऽन्त्यो[1] वा वर्णौ गुरुर्लघुर्वा, मध्ये गगद्वयम्, आद्यवर्णाग्रे नसौ विनाऽन्ये गणाः यथेच्छं[2] स्युः। तदग्रे च मसौ विना तेन षडपि इति। समेऽप्याद्यान्त्यौ ग्लौ वा मध्ये त्वाद्यान् न रसान् विनाऽन्ये पञ्च, तदग्रे तु ज एवेति। उच्यते च–

नाद्यान्नसौ विषमेऽब्धेर्यजौ भनरता गणाः
नाद्यान्नरसाः समे जोऽब्धेरिदं श्लोकस्य लक्षणम् ॥ १ ॥

षोडशमात्रे छन्दसि।
मात्राष्टकात् ल्के जे वा वानवासिका।
अनाद्ये जो नवमे ले मात्रासमकम्।
नवमे गे उपचित्रा।
पञ्चाष्ट–नवसु ले चित्रा।
वानवासिकादिपादैः कृतं पादाकुलकम्।
षट्कलाच्चतुष्कलद्वयं ततो द्वे कले वदनकम्।
तद्यमितमन्तेऽडिल्ला।
चतुष्कलचतुष्कं पादान्तेऽनुप्रासे पद्धटिका।
नात्र विषमे जः कार्योऽन्ते तु जः चतुर्लो वा।
अथैषां लक्ष्यम् ॥

**अथ रत्नाङ्कुरं रत्नगर्भेव नृपवल्लभा।**
**गर्भं दधौ हरिस्वप्नसूचिताऽद्भुतसंपदम् ॥ १ ॥**

दु० व्या०–श्लोकादिलक्षणं सुगमम्। हरिः–सिंहः ॥ १ ॥

---

१ °न्त्यो व° B। २ °थेदं स्युः° A।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वल्लभाऽपि स्वभावेन, सगर्भाऽभून्मुदेऽधिकम् ।
नृपचेतसि सा चूतलवलीव फलोन्मुखी ॥ २ ॥

सा काले सुषुवे सूनुमनूनगुणलक्षणम् ।
प्रभयाऽस्ततमःपूरं, सूरं हरिहरिद् यथा ॥ ३ ॥

दु० व्या०—हरिहरित्—पूर्वदिक् ॥ ३ ॥

तज्जन्मज्ञापकेभ्योऽदात्, प्रमोदाब्धिपरिप्लुतः ।
अङ्गाभरणभारं किं, निमज्जनभयान्नृपः ॥ ४ ॥

ध्वजव्याजान्मुदम्भोधेर्विलेसुश्चपलोर्मयः ।
व्यक्ता मुक्ता व्यलोक्यन्त, तद्भवाः स्वस्तिकेषु च ॥ ५ ॥

दु० व्या०—तद्भवाः—मुदम्भोधिभवाः ॥ ५ ॥

मेदिनीशो मुदा बन्द-मोक्षं[1] चक्रेऽर्भकस्य किम्[2] ।
भविष्यत्पुण्यकारुण्यस्वभावस्यानुभावतः ॥ ६ ॥

पुरे विरेजिरे विश्वंभराः कुङ्कुमपिञ्जराः ।
अरुणैः किरणैस्तस्य, बालबालरवेरिव ॥ ७ ॥

दु० व्या०—बाल एव बालार्कस्तस्य ॥ ७ ॥

इति जन्मोत्सवं जानपदैः सह सुतस्य सः ।
कृत्वा विजयचन्द्राख्यां, ददौ द्वादशवासरे ॥ ८ ॥

लाल्यमानः स धात्रीभिरतिमात्रीकृताऽऽदरम् ।
अभूद् राजसभायोग्यो, बालहारकटीस्थितः ॥ ९ ॥

दु० व्या०—अतिमात्रीकृतः—अधिकीकृतः ॥ ९ ॥

---

१. °बन्धमो° R । २. °र्भगाः किं° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सभा पद्मसरस्येष, शिशुर्भूमिभुजां भजन् ।
कराम्भोजात् कराम्भोजं, रेजे राजमरालवत् ॥ १० ॥

दु० व्या०—एषः स पुत्रः ॥ १० ॥

आनन्देन समं पित्रोर्वर्धमानतया स्यात् ।
शशिवत् कलयामास, सकलाः सकलाः कलाः ॥ ११ ॥

दु० व्या०—कला—मनोज्ञा ॥ ११ ॥

चारुतारुण्यकमलाऽऽलिङ्गिताङ्गः क्रमेण सः ।
वसन्तश्रीश्रितः कल्पशाखीव सुषमामगात् ॥ १२ ॥

दु० व्या०—सुषमाम्—अतिशायिनीं शोभाम् ॥ १२ ॥

विधयाऽपि विधुं वेधास्तदाऽऽस्येन्दुस्मृतेरिव ।
सावज्ञमुपरि भ्रामात्, क्षिपत्यन्यत्र कुत्रचित् ॥ १३ ॥

काऽमुं कामसमं वीक्ष्य, निकामं कामपत्रिणाम् ।
लक्ष्यतां न ययौ[1] तीक्ष्णकटाक्षैर्लक्षशो घ्नती ॥ १४ ॥

दु० व्या०—का स्त्री । लक्ष्यतां वेध्यताम् ॥ १४ ॥

पौरीदृक्शुक्तिपेपीयमानलावण्ययौवनः ।
अन्येद्युर्मित्रयुर्मित्रैः, परीतः स ययौ वनम् ॥ १५ ॥

श्रीजितत्रिदिवाऽऽरामे, दीव्यँस्तत्र पवित्रधीः ।
मित्रैः समं स मन्दारमिवापश्यन्मुनीश्वरम् ॥ १६ ॥

दु० व्या०—सः कुमारः ॥ १६ ॥

अभिनम्य समासीनमदीनमभि तं जगौ ।
श्रितसौन्दर्यधुरया, मुनिर्मधुरया गिरा ॥ १७ ॥

दु० व्या०—अभि तं—तं प्रति ॥ १७ ॥

---

१. °यौ घ्नन्ती कटाक्षैरपि लक्षशः ॥१९॥ A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्मिन्नसारे संसारे, सारं तावन्नृणां भवः ।
तत्रापि धर्मो धर्मेऽपि, कृपां विद्धि नृपाङ्गज ! ॥ १८ ॥

दु० व्या०–विद्धि–जानीहि ॥ १८ ॥

यथा तारां विना चक्षुर्यथा वारि विना सरः ।
तथा धर्मः समग्रोऽपि, न विभाति कृपां विना ॥ १९ ॥

चत्वारि पञ्च वा सन्तु, व्रतानि द्वादशाऽथवा ।
किन्तु रक्षणमेतेषां, रक्षणीयं पुनः कृपा ॥ २० ॥

राजसूस्तमथ प्रोचे, रोचितं मे भवद्वचः ।
जन्तुघातनिषेधस्य, किं फलं तु यतिर्जगौ ॥ २१ ॥

मोक्षोऽमुष्य फलं मुख्यमित्याख्यन्नृपभूः पुनः ।
पालयामि कृपामेष मम कस्मिन् भवे भवेत् ॥ २२ ॥

दु० व्या०–अमुष्य–जन्तुघातनिषेधस्य । एषः–मोक्षः फलम् ॥ २२ ॥

उवाच ज्ञानवान् साधुर्भूरिभाग्यभरो भवान् ।
प्रदत्तत्रिदिवाकम्पा, पुरी चम्पाऽस्ति संपदा ॥ २३ ॥

भूपः परमदेवोऽत्र, भावी भूयः पराक्रमः ।
देवी च ललिता तस्य, लालित्यगुणशालिनी ॥ २४ ॥

दु० व्या०–भूयः प्रचुरः ॥ २४ ॥

ऋतुं वसन्तं सा स्वप्ने, द्रक्ष्यत्युल्लसितश्रियम् ।
वसन्तराज इत्यस्याः, सुतस्त्वं च भविष्यसि ॥ २५ ॥

क्रमात् तारुण्यपुण्याङ्गः, पद्मिनीहृदयप्रियः ।
स्ववंशाम्भोरुहोल्लासे, सविता भविता भवान् ॥ २६ ॥

दु० व्या०–सूर्यपक्षे क्रमेण आत्तं–गृहीतम्, आरुण्यं–सातत्यम्, पुण्याङ्गं च येन ॥ २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्यये पितुरत्यक्तसत्त्वः सत्त्वमिलापतिः ।
यदा तदा वेराणस्यां, भावी श्रीअश्वसेनराट् ॥ २७ ॥

दु० व्या०—अत्यये—विनाशे ॥ २७ ॥

सूचितश्च महास्वप्नैर्वामाकुक्षिसरोऽम्बुजम् ।
तद्वंशवनपारीन्द्रो, जिनेन्द्रोऽवतरिष्यति ॥ २८ ॥

दु० व्या०—पारीन्द्रः—सिंहः ॥ २८ ॥

नवपाणितनुर्नीलद्युतिः फणपतिध्वजः ।
स सुरासुरसंपूज्यः, श्रीपार्श्वख्यातिमेष्यति ॥ २९ ॥

बाल्ययौवनलीलां च, भूयसीमनुभूय सः ।
गृहवासं परित्यज्य, गृहीता संयमश्रियम् ॥ ३० ॥

अनिर्जितो हठेनापि, कमठेन शठेन सः ।
पादाब्जप्रणमद्देवः, केवलज्ञानमाप्स्यति ॥ ३१ ॥

स्वामी चामीकराम्भोजन्यस्तक्रमसरोरुहः ।
क्रमेण विहरन् धात्रीं, चम्पापुरमुपैष्यति ॥ ३२ ॥

सुरास्तत्र विधास्यन्ति, प्राकारत्रयमत्र च ।
स्वर्णसिंहासने स्वामी, रविवत् प्रविभास्यति ॥ ३३ ॥

तदागमसमुल्लासिहृदयः सपरिच्छदः ।
वसन्तराजराजोऽपि, प्रभुपादौ प्रणंस्यति ॥ ३४ ॥

प्रबुद्धो भगवद्वाचा, गत्वा चम्पापुरीमसौ ।
न्यस्य राज्ये निजं पुत्रमुपश्रीपार्श्वमेष्यति ॥ ३५ ॥

---

१. वणारस्यां B । २. प्रतिभा° A ।



आ श्री कैलाससागरसूरि ज्ञा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संप्राप्य संयमं स्वामिकरेण किल केवली ।
स भावी सिद्धिकमलाक्रोडीकृतिकुतूहली ॥ ३६ ॥

दु० व्या०—क्रोडीकृतिः—आलिङ्गिता ॥ ३६ ॥

श्रुत्वेति श्रमणगिरं, प्राणिघातनिषेधनम् ।
अवक्रेण हृदा चक्रे, मुदा राजसुतस्तदा ॥ ३७ ॥

भूरिभक्त्या मुनिं नत्वा, मित्रैः सह स हर्षवान् ।
संप्राप सद्मनि छद्म, श्रीपार्श्वस्मृतिलालसः ॥ ३८ ॥

यत्प्रसादाद् ध्रुवं सिद्धिरुपकारी स एव मे ।
इति पार्श्वप्रभोर्मूर्तिं, रचयित्वाऽर्चति स्म सः ॥ ३९ ॥

आयातः स सभां प्रातः, पितरं नन्तुमन्यदा ।
ददर्श दर्शनीयाङ्गं, हयं केनापि ढौकितम् ॥ ४० ॥

किं हेलितेजः सर्वस्वं, हृत्वा नष्टोऽष्टमो हयः ।
सैष तेजोऽधिकस्तस्मात् , सप्तसप्तिः परोऽपि यत् ॥ ४१ ॥

दु० व्या०—हेलिः—सूर्यः । सप्तसप्तिः—सप्ततुरङ्गः ॥ ४१ ॥

परीक्ष्योऽयं मया ध्यायन्निति विज्ञप्य भूपतिम् ।
कुमारो हयमारोहदुच्चैःश्रवसमिन्द्रवत् ॥ ४२ ॥ युग्मम् ॥

अदैन्यसैन्ययुक्तोऽसौ, वाह्याल्यां वाहकोविदः ।
हयं परीक्षयामास, स्पष्टं गतिचतुष्टये ॥ ४३ ॥

वेगसारो हयश्चेति, चिन्तयंस्तं नृपात्मजः ।
दृढीकृत्य स पर्ष्णिमुञ्चत शरं यथा ॥ ४४ ॥

क्षणाददृश्यो लोकानां, याति यातीति जल्पताम् ।
पञ्चमीगतिमासाद्य, हयः सिद्ध इवाभवत् ॥ ४५ ॥

---

१. °श्चमी ग° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यथा यथाऽकृषद् वल्गां, कुमारः स तथा तथा ।
चचाल व्यालवदनो, वैनतेय इवोत्पतन् ॥ ४६ ॥

दु० व्या०—व्यालः—सर्पः ॥ ४६ ॥

जन्तुवत् कर्मणा तेन, नीयमानेन कानने ।
कुमारेण कराद् वल्गा, मुमुचे खिन्नचेतसा ॥ ४७ ॥

वातपूर्णमुखघ्राणोऽश्वोऽपि तत्रैव तस्थिवान् ।
मेने राजाङ्गजेनायं, वैपरीत्येन शिक्षितः ॥ ४८ ॥

तस्मादुत्तीर्य पर्याणे, कुमारेण विदूरिते ।
अस्वामिभक्त इत्यश्वः, स प्राणैः परितत्यजे ॥ ४९ ॥

क्रमचारी भ्रमन्नेष दवदग्धद्रुमे वने ।
फलं जलं विना क्षुत्तृट्पीडितोऽगमयद् दिनान् ॥ ५० ॥

दशमे वासरे तत्र, निषण्णं खिन्नविग्रहम् ।
पिब नीरमिदं भद्रेत्यभ्यधात् कोऽपि तं नरम् ॥ ५१ ॥

दु० व्या०—विग्रहः—देहम् ॥ ५१ ॥

सोऽपि कण्ठगतप्राणः, प्रतिवक्तुमशक्नुवन् ।
पयः पीत्वाऽवदत् कस्त्वमित्येनं सोऽपि तं जगौ ॥ ५२ ॥

अदूरेऽस्ति पुरं स्वस्तिपात्रं श्रीहस्तिनापुरम् ।
यत्र मुक्तामया लोका हारा एव गुणोज्ज्वलाः ॥ ५३ ॥

दु० व्या०—मुक्तामयाः पक्षे मुक्तरोगाः ॥ ५३ ॥

तत्र पालयति प्राज्यं, राज्यं राजा गजभ्रमः ।
विजया पट्टदेव्यस्येन्द्रस्येव जयवाहिनी ॥ ५४ ॥

दु० व्या०—जयवाहिनी—इन्द्राणी ॥ ५४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मृगयाव्यसनी सोऽयं, ससैन्योऽत्रावतिष्ठते ।
अहं भृत्योऽस्मि तस्यातस्त्वमप्येहि नृपान्तिकम् ॥ ५५ ॥

नोत्तिष्ठति कुमारेऽस्य, वृत्ते चानेन वेदिते ।
भूभुजा स्वान्तिकं भृत्यैरानायि विनयेन सः ॥ ५६ ॥

तेनालापं नृपः कुर्यात्, यावत् तावच्चरैर्नरैः ।
ऊचे पवनवेगेन, कुरङ्गा यान्त्यमी इति ॥ ५७ ॥

तच्छ्रुत्वा चापभृद् भूपो, हयारूढो रयादभूत् ।
वितताार कुमाराय, चतुरं च तुरङ्गमम् ॥ ५८ ॥

सोऽपि तं हयमारुह्य, परासह्यपराक्रमः ।
सतन्त्रं भूपतिं स्माह, सोत्साहवचनक्रमः ॥ ५९ ॥

यूयमेकदिशा यात, प्रेरयध्वं मृगानितः ।
स्थाने यथाऽहमेकोऽपि, रक्षामि निखिलानमून् ॥ ६० ॥

दु० व्या०—स्थाने पक्षे युक्तम् ॥ ६० ॥[1]

राज्ञा तथाकृते तेन, कुमारेण कुमारणात् ।
विमुक्ता हरिणाः सर्वे, धर्मद्वारा प्रजा इव ॥ ६१ ॥

कुपितेनेव भूपेन, किमेतद् विहितं त्वया ।
इत्युक्त सोऽवदत् तात !, युक्तमेव मया कृतम् ॥ ६२ ॥

रणाङ्गणेऽपि मुच्यन्ते, वैरिणस्तृणभक्षणात् ।
निर्वैरा हरिणा एते, वधमर्हन्ति तत् कथम् ? ॥ ६३ ॥

रणाङ्गणे यो मत्खड्गनटो नर्त्तयते भटान् ।
कथंकारं करोत्येष, कुरङ्गेषु विजृम्भितम् ॥ ६४ ॥

---

१. ॥६०॥ तथा राज्ञाकृ° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०–कुरङ्गेषु पक्षे कुत्सितरङ्गेषु ॥ ६४ ॥

रञ्जितोऽभ्यन्तरे राजा, बभाषे कोपभृद् बहिः ।
कुरुध्वं गौरवं योग्यं, वाचाटस्यास्य भो भटाः ! ॥ ६५ ॥

तेषु स्थितेषूदस्त्रेषु, सवेगादृश्यविग्रहः ।
अनिघ्नन् कृपयाऽमीषां, कृपाणश्रममातनोत् ॥ ६६ ॥

दु० व्या०–वेगेन अदृश्यः । अमीषाम् "निप्रेभ्यो घ्नः" [२. २. १५ ] इति पदेन षष्ठी ॥ ६६ ॥

अहो ! शौर्यमहो ! धैर्यमहो ! चातुर्यमद्भुतम् ।
स्तुवन्निति निवार्यास्मान्नृपतिः पर्यरब्ध तम् ॥ ६७ ॥

दु० व्या०–अस्मात्–कृपाणश्रमात् । पर्यरब्ध–आलिलिङ्ग ॥ ६७ ॥

भूभुजा सादरं पृष्टः, स स्वं वृत्तमचीकथत् ।
भूपोऽवग् मम मित्रस्य, सुतस्त्वमसि मेऽपि तत् ॥ ६८ ॥

अथासौ ससुतंमन्यो, मृगयाविनिवृत्तधीः ।
पुरं गजपुरं गर्जन्महेन महताऽविशत् । ६९ ॥

कुमारं नृपतिः प्रोचे, वत्साऽऽदत्स्व पुरादिकम् ।
सोऽप्यवक् सांप्रतमस्तु, तात ! त्वत्पदसेवनम् ॥ ७० ॥

दु० व्या०–आदत्स्व–गृहाण ॥ ७० ॥

दत्तायां स्वाङ्गसेवायां, तस्मै तुष्टेन भूभुजा ।
निशीथेऽन्येद्युरश्रावि, रुदितं करुणं स्त्रियाः ॥ ७१ ॥

केयं रोदिति हाहेति, हेतिभिर्निहतेव हा ।
हन्त ! हेतुमिमं पश्य, कुमारमिति सोऽब्रवीत् ॥ ७२ ॥

---

१. °प्रतं मेऽस्तु B । २. स्त्रियः B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—हाहेति कृत्वा । हेतिभिः—प्रहारेण(रैः) । ७२ ॥

विद्युदुत्क्षेपकिरणाद्, वप्रमुल्लङ्घ्य सोऽगमत् ।
करवालकरः शब्दानुसारी प्रेतमन्दिरम् ॥ ७३ ॥

कन्यकाकबरीपाणिं, कर्त्तिकाकृत्ततत्पलम् ।
उपज्वलद्वह्निकुण्डं, सोऽद्राक्षीत् तत्र योगिनम् ॥ ७४ ॥

रे रे ! मातङ्गकर्माऽसि, पाखण्डिन् ! खण्डितव्रत ! ।
इत्युक्तस्तं जगौ योगी, वद वीर ! शनैः शनैः ॥ ७५ ॥

अष्टोत्तरशताहुत्या, चेटको मम सेत्स्यति ।
सोऽवादीत् तेन किं कार्यं, यस्मै नार्येपि मार्यते ॥ ७६

अनार्यकार्यमेतच्चेत्, कार्यमेव तवास्ति तत् ।
मुञ्च कन्यामिमां स्वाङ्गमांसाहुतिमहं ददे ॥ ७७ ॥

कुमार-योगिनोस्तत्र, तत् कर्म विदधानयोः ।
भास्वानिव क्षणेनाख्यत्, प्रत्यक्षीभूय चेटकः ॥ ७८ ॥

त्वं कुमार ! गुणाधार !, जय कारुण्यसागर ! ।
साहसात् तव तुष्टोऽस्मि, वरं वृणु समीहितम् ॥ ७९ ॥

स जगौ सिद्धयतां याहि, योगिनस्त्वन्नियोगिनः ।
सोऽवक् सिद्धमिदं स्वार्थं, प्रार्थयाऽलं तु सोऽब्रवीत् ॥ ८० ॥

दु० व्या०—त्वन्नियोगिनः—त्वद्व्यापारिणः । अलम्—पर्याप्तम् ॥८०॥

तथापि गारुडं मन्त्रं, दत्वा तं स्माह चेटकः ।
कार्ये स्मार्योऽस्मि ते नित्यमद्यप्रभृति किङ्करः ॥ ८१ ॥

सज्जीकृत्य ययौ कन्यां, कुमारं च स चेटकः ।
बालामालापयत् सोऽपि, भूपालाभ्यर्णमागमत् ॥ ८२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कस्याङ्गजाऽऽसीत्युक्ता सा, व्याहरन्नृपतिं प्रति ।
त्वत्पुरे दत्तनामाऽस्ति, श्रेष्ठी श्रेष्ठगुणालयः । ८३ ॥

तस्याहं दुहिता हन्त !, वसन्तश्रियमीक्षितुम् ।
वनं गता वयस्याभिर्वियुक्ता योगिना धृता ॥ ८४ ॥

आननात् तस्य दुष्टस्य, व्याघ्रस्येव कुरङ्गिका !
मोचिताऽनेन वीरेण, रुच्येन, रुचिशालिना ॥ ८५ ॥

दु० व्या०—रुच्येन—मनोज्ञेन, पक्षे भर्त्रा ॥ ८५ ॥

कुमारं प्रति तद्वाचं, भावगर्भां निशम्य ताम् ।
नृपतिर्मुदितः प्रैषीद् , दत्तमाकारयितुं गृहम् ॥ ८६ ॥

दु० व्या०—ताम—कन्याम् ॥ ८६ ॥

द्वितीये दिवसे प्रातस्तस्यास्तातः सभास्थितम् ।
क्ष्मापं जगौ कुमारेण, चौर्यं चक्रे करोमि किम् ? ॥ ८७ ॥

संभ्रान्ते ससभे भूपे, कुमाराननवीक्षिणि ।
श्रेष्ठ्याह श्रूयतां देव !, यथा चौर्यमजायत ॥ ८८ ॥

याऽनेन नाथ ! वीरेण ररक्षे योगिरक्षसः ।
पेटाभा रूपरत्नस्य, सा मे रत्नावली सुता ॥ ८९ ॥

दु० व्या०—या—कन्या ॥ ८९ ॥

जह्रे हेपितमारेण, कुमारेणैव तन्मनः ।
ताताशङ्कोज्झितस्तेन, पीडयेत् तां मनोभवः ॥ ९० ॥

दु० व्या०—तातः—मनः ॥ ९० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भक्तिं व्यनक्ति नो पित्रोर्न युनक्ति न वक्त्यपि ।
न युनक्ति न सध्रीचीः, सा भिन्ना कामशक्तिभिः ॥ ९१ ॥

अथो किमिति जल्पाके, राज्ञि स्मित्वाऽऽह धीसखः ।
कुमारे क्रियतां दण्डस्तद्भुजापाशबन्धनम् ॥ ९२ ॥

मुदितेष्वथ सभ्येषु, भूपतिः श्रेष्ठिनं जगौ ।
कुरु वैवाहिकं कार्यं, सोऽपि हृष्टो गृहं ययौ ॥ ९३ ॥

लग्ने मौहूर्त्तिकैर्दत्ते, प्रवृत्तेऽथ महोत्सवे ।
कुमारः प्रातरन्येद्युरचलद् क्रीडितुं वने ॥ ९४ ॥

पुरान्तरा व्रजन्नेष, पुरः कुस्वरडिण्डिमम् ।
क्रन्दन्नारीनरं वीक्ष्य, कुणपं भृत्यमब्रवीत् ॥ ९५ ॥

मृतः क इति सोऽवादीन्नयसारस्य मन्त्रिणः ।
बाला कनकमालाऽऽख्या, मालावद् गुणशालिनी ॥ ९६ ॥

निशि ध्वान्ते भुजङ्गेन, गृहीता करपल्लवे ।
जीवितेनोज्झिता मुर्च्छ, सा याति पितृमन्दिरम् ॥ ९७ ॥

दु० व्या०—भुजङ्गेन, पक्षे गणिकापतिना । पक्षे जीवितस्य इनः—स्वामी—भर्ता, तेन त्यक्ता । पितृमन्दिरं पक्षे श्मशानम् ॥ ९७ ॥

कुमारोऽवग् द्रुतं याहि, मृतकं स्थापय क्षणम् ।
अयं तथाकृते तेन, तत्र गत्वा व्यलोकयत् ॥ ९८ ॥

तेन गारुडमन्त्रेणाभिमन्त्रितजलोक्षणात् ।
क्षणाद् विचक्षणाग्र्येणोज्जीविता सा मृगेक्षणा ॥ ९९ ॥

दु० व्या०—उक्षणात्—सेचनात् ॥ ९९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हर्षोन्मत्ते जने बाला, सा सुखं तन्मुखं पपौ।
मन्त्री कन्यां गृहं निन्ये, धन्यंमन्यो महोत्सवैः ॥ १०० ॥

कुमारेऽपि वनं गत्वा, रन्त्वा प्राप्ते स्वमाश्रयम्।
नयसारसभामेत्य, नत्वा भूपं व्यजिज्ञपत् ॥ १०१ ॥

उज्जीविता कुमारेण, परं मारेण मे सुता।
दूयते वारणेऽप्यस्य, तमेव शरणं कुरु ॥ १०२ ॥

प्रपन्ने भूभुजा सोऽपि, वैवाहिकविधिं व्यधात्।
स्वजनाशाभिराकृष्ट, इवागाल्लग्नवासरः ॥ १०३ ॥

कुमारः कृतशृङ्गारः, करीन्द्रमधिरूढवान्।
धृतच्छत्रः स्फुरच्चारुचामरः स रुचाऽमरः ॥ १०४ ॥

दु० व्या०—रुचा अमरः ॥ १०४ ॥

वर्ण्यमानगुणैर्भट्टैर्वर्णिनीगीतमङ्गलः।
स प्राप मण्डपागारद्वारं तोरणमण्डितम् ॥ १०५ ॥

कृतोचितक्रियो बिन्दुवधूवृन्दैः क्षणे क्षणे।
मृगेक्षणे उपयेमे, क्षणेऽसौ लग्नलक्षणे ॥ १०६ ॥

दु० व्या०—बिन्दुः—निपुणः। मृगेक्षणे द्वे ॥ १०६ ॥

जनितस्वजनानन्दः, कृते यौतुककौतुके।
समहं स गृहं प्राप, वीक्ष्यमाणः पुरीजनैः ॥ १०७ ॥

दु० व्या०—यौतुकम्—युतयोर्देयम्, कौ—पृथिव्याम् ॥ १०७ ॥

रतिप्रीतिसमं पौरैस्तस्य वीक्ष्य वधूद्वयम्।
ऊचे पृथिव्यामयं मारः, कुमारत्वं ततोऽत्र किम्? ॥१०८॥

५

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—मारः—कामः । कुमारस्तस्य भावः ।। १०८ ।।

वसुधावासवो वासवेश्म तस्मै विधाप्य तम् ।
उवाच सेवयाऽलं ते, वत्स ! क्रीड यथासुखम् ।। १०९ ।।

इति नृपतिनिदेशस्त्यक्तसंक्लेशलेशः,
कृतकुनयविदेशः पेशलश्रीनिवेशः ।
रतचतुरकुरङ्गीदृक्तरङ्गी भविष्णुः,
स्मररसमनुषङ्गी सोऽभजद् भोगभङ्गीः ।। ११० ।।

दु० व्या०—कुरङ्गीदृक् स्त्री ।। ११० ।।

लसल्लक्ष्मीलीलाविनयनयलावण्यलहरी-
परीतं पद्मिन्योर्युगलमविकल्पप्रणयभाक् ।
स भेजे शोभाभिः सुभगरुचिमाणिक्यभवने,
विलासैः कासारे मधुकर इवानन्दजनने ।। १११ ।।

दु० व्या०—रुच्शब्दः ।। १११ ।।

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरि[2]-
विरचिते माणिक्याङ्के श्रीश्रीधरचरित्रे श्लोकलक्ष्य[3]-
विजयचन्द्रपाणिग्रहणवर्णनो नाम
चतुर्थः सर्गः ।।
ग्रन्थाग्रम् ।। १२५ ।। अ० २४ ।।

---

१ °क्यभवने R । २ °रवि° A । ३ °लक्षणवि° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## पञ्चमः सर्गः ।

राज्यलक्ष्मीं कुमारेन्द्रे, न्यस्य भूपो गजभ्रमः ।
अथाऽऽर्यरक्षिताचार्यपादान्ते व्रतमग्रहीत् ॥ १ ॥

राजा विजयचन्द्रोऽपि, चन्द्रोज्ज्वलयशोभरः ।
प्रजा इवानुरागेण, पालयामास स प्रजाः ॥ २ ॥

दु० व्या०—प्रजा इव अपत्यानीव ॥ २ ॥

अन्येद्युस्तं सभासीनं, वेत्रधारी व्यजिज्ञपत् ।
पुरीवाराणसीशस्य, दूतो द्वारेऽवतिष्ठते ॥ ३ ॥

आनयेति नृपाज्ञप्तः, सोऽपि दूतमुपानयत् ।
नत्वा निविष्टं तं भूपः, स्माह विस्मेरया गिरा ॥ ४ ॥

कच्चिद् वाराणसी स्वस्था, प्रजाः प्राप्तशुभव्रजाः ।
तन्नायको गतापायः, क्ष्मापं दूतोऽप्यभाषत ॥ ५ ॥

उत्तरं प्रश्न एवात्रास्मन्नाथे निरपायता ।
तुच्छवत् पृच्छयमाना तु, राजन्नौचित्यमञ्चति ॥ ६ ॥

यस्य प्रतापकाश्मीरैर्यशः कर्पूरमिश्रितैः ।
कृताङ्गरागा दिक्कान्ताः, स्वपतीनां हरन्ति हृत् ॥ ७ ॥

भूपालमौलिमौलिस्थक्रमे भूरिपराक्रमे ।
सापायत्वं कुतस्तस्मिन्, स्वप्नेऽपि हि विभाव्यते ? ॥८॥

नयी विजयते स श्रीरुक्माङ्गदनरेश्वरः ।
तद्वाचिकं स मद्वाचा, कर्णैः कुण्डलतां नय ॥ ९ ॥

---

१ °रेन्द्रौ न्य° R । २ °वाणारसी° B । ३ बाणारसी B ।
४ कर्णे कु° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगच्छ तुच्छतां त्यक्त्वा, सेवां कुरु मयि स्वयम् ।
देहि वा दण्डमुद्दण्डप्रचण्डद्युतिडम्बरे ॥ १०॥

अथवा वीरमानित्वान्ममाज्ञां नैव मन्यसे ।
एकमेव वचस्तर्हि, सज्जीभव रणाङ्गणे ॥ ११ ॥

ज्वलदौर्वानलं वार्द्धिमन्तरा गूढकोपतः ।
मित्रीकुर्वन् नृपो दूतं, चित्रीयितवचा जगौ ॥ १२ ॥

दु० व्या०—और्वानलं वडवानलम् ॥ १२ ॥

वार्येऽस्मिन् सज्जताऽऽकार्य !, कार्याकार्यज्ञ ! कार्यते ।
सैन्यं मृगप्रणाशाय, केसरी कियदानयेत् ? ॥ १३ ॥

तथापि मूढचेताश्चेत्, त्वन्नेता नैव तिष्ठति ।
वयमुद्दण्डदोर्दण्डाः, सज्जा एव रणे ततः ॥ १४ ॥

दूतोऽवक् सस्मितं देव !, शौर्यं वाचि सुखावहम् ।
युद्धे त एव युद्ध्यन्ते, ये धीरा धीरवंशजाः ॥ १५ ॥

यथा वने मृगः कश्चिद्, बाल्येऽभून्मृतमातृकः ।
सिंह्या करुणयाऽपालि, साकं स्वीयसुतेन सः ॥ १६ ॥

समं स्तन्यं पिबन्तौ तौ, विचरन्तौ वने समम् ।
समं संप्राप्ततारुण्यावभूतां प्रीतिशालिनौ ॥ १७ ॥

गते वनान्तः पारीन्द्रे, मृगे सिंही समीपगे ।
गजेन्द्राणां घटाऽन्येद्युश्चक्रे गार्जितमूर्जितम् ॥ १८ ॥

स सिंहीस्तन्यपायित्वात्, कुरङ्गः शूरतां दधत् ।
उत्तिष्ठन् करिविध्वंसे, जनन्याऽभाणि सस्मितम् ॥१९॥

---

१ °ने धीरः क° R । २ सम्मितम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शूरोऽसि कृतविद्योऽसि, दर्शनीयोऽसि पुत्रक ! ।
यस्मिन् कुले भवान् जातो, गजस्तत्र न हन्यते ॥२०॥

इति वक्रोक्तिगर्भेण, दूतस्य वचसा ज्वलन् ।
सचिवः शुचिवाक् प्राह, क्रुधाऽरुणमुखेक्षणः ॥ २१ ॥

भूताभिभूत ! रे दूत !, दोषस्यूतदुराशय ! ।
परभूपसभामेत्य, वक्तुं नो वेत्सि तुच्छधीः ? ॥ २२ ॥

जगच्चन्द्रकुलोद्भूतं, गजभ्रमहृदि स्थितम् ।
भूपं श्रीविजयं मन्ये, केऽन्ये वेश्मान्धुदर्दुराः ॥ २३ ॥

दु० व्या०—अन्धुः—कूपः ॥ २३ ॥

रत्नाकरे कौस्तुभरत्नमासीद्, दासीकृताशेषमणिः स्वकान्त्या ।
अतिष्ठिपत् तत्पुरुषोत्तमोऽपि, हृदि स्वयं तन्नहि कस्य वर्ण्यम्? ॥२४॥

इति निर्भर्त्सितो बाढमर्धचन्द्रान्निरासितः ।
दूतो गत्वाऽऽह तत् सर्वं, वाराणस्यां निजेशितुः ॥ २५ ॥

अयं सैन्यरयं कुर्वन्, मन्त्रिवाचा चरान्नरात् ।
प्रैषीज्ज्ञातुं द्विषद्वृत्तं, राजानश्चरचक्षुषः ॥ २६ ॥

इतश्च विजयं भूपं, पौराश्चौराद् गतस्वकम् ।
स्वकं विज्ञपयामासुः, सोऽप्यारक्षमभाषत ॥ २७ ॥

दु० व्या०—गतस्वकम्—गतद्रव्यम् ॥ २७ ॥

रे ! रे ! ! त्वमेव लुण्टाको, यल्लुण्टाकान्न रक्षसि ।
स जगौ देव ! दुर्ग्राह्यश्चौरोऽयं खेचरो यथा ॥ २८ ॥

---

१ वाणारस्यां B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणेन भोः तलारक्षे !, स्तेनमेनमिहानय ।
इत्युक्त्वा चेटकं स्मृत्वा, क्षणाद् बद्धं तमानयत् ॥ २९ ॥

तथाऽवस्थं पुरः स्तेनं, वीक्ष्य लोके सविस्मये ।
नृपस्तं स्माऽऽह किं कुर्वे, सोऽवग् यत् त्वयि रोचते ॥३०॥

रोचते जीवितं मह्यमतश्चौरेऽपि चातुरी ।
चिन्तयन्तमिति क्ष्मापमाख्यत् पाटच्चरः पटुः ॥ ३१ ॥

ममावस्वापिनीविद्या, वर्त्तते वसुधापते ! ।
घूर्णयित्वा यया लोकं, सर्वस्वं ह्रियते मया ॥ ३२ ॥

दृष्टे मुखेन्दौ ते नाथ !, विलीनं मेऽखिलं तमः ।
आरुरुक्षुः शिवावासं, जिघृक्षे संयमश्रियम् ॥ ३३ ॥

लोप्त्रं लातु निजं लोको, विद्यां त्वं मे सनाथय ।
तथाकृतेऽसौ प्राव्राजीद्, भूभुजा विहितोत्सवः ॥ ३४ ॥

दु० व्या०—लोप्त्रम्–हृतद्रव्यम् ॥ ३४ ॥

दुष्कर्ममर्मभिदुरं, तप्त्वाऽसौ दुस्तरं तपः ।
केवलश्रियमासाद्य, सद्यः शिवपुरं ययौ ॥ ३५ ॥

चौराकृष्टिचरित्रं ते, चरा [2]वाराणसीपतेः ।
प्रोचुः शीघ्रतरं सोऽथ, साध्वसाऽऽकुलितोऽभवत् ॥ ३६ ॥

उपदासहितैस्तेन, प्रहितैः सचिवैर्हितैः ।
राजा विजयचन्द्रः प्राग्, रोषितोऽपि हि तोषितः ॥ ३७ ॥

---

१ °स्तपं त° B । २ वाणारसी° B ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तन्मत्वा भूभुजोऽन्येऽपि, वेपिनस्तं प्रपेदिरे ।
ददिरे दूरदेशस्था दण्डं तस्मै सविस्मयाः ॥ ३८ ॥

दु० व्या०—वेपिनः—कम्पमानः ॥ ३८ ॥

अन्यदाराऽजिते तस्मिन्नन्यदा राजिते जनैः ।
सभासीने नरः कोऽपि, लेखपाणिरुपागमत् ॥ ३९ ॥

दु० व्या०—अन्यदारैरजितः ॥ ३९ ॥

लेखं मुक्त्वा पदोपान्ते, नमत्यस्मिन् महीपतिः ।
दृष्टे नाम्नि पितुः प्राप्तहृल्लेखस्तमवाचयत् ॥ ४० ॥

"स्वस्ति श्रीमङ्गलपुराज्जयचन्द्रनरेश्वरः ।
हस्तिनागपुरे पुत्रं, विजयं विजयोर्जितम् ॥ ४१ ॥

सस्नेहं साज्ञसं गाढमालिङ्ग्यादिशति स्वयम् ।
शुभमत्रास्ति तत्रत्यं, विज्ञप्यं कार्यमुच्यते ॥ ४२ ॥

युग्मम् ॥[1]

वत्स ! वत्सलतया तव सर्वत्रापि राज्यकमलाऽनुचरीयम् ।
त्वद्वियोगविधुराः पुनरेते, निर्वृता न भवने न वने वा ॥ ४३ ॥

जननी तव वत्स ! नेत्रतो, जलधारा क्षरति क्षणे क्षणे ।
उपशान्तिमुपैति नो पुनस्त्वद्विरहो वडवानलो नवः" ॥ ४४ ॥

अथोत्कः पितरौ नन्तुं, मत्वेति विरहातुरौ ।
ससैन्यसचिवे राज्यशिक्षां दत्त्वाऽचलन्नृपः ॥ ४५ ॥

अविच्छिन्नप्रयाणोऽथ, स मङ्गलपुरं ययौ ।
नृपतिं वर्धयामासुः, जयचन्द्रं च केचन ॥ ४६ ॥

1 R B आदर्शयोः 'युग्मम्' इति पदं न लिखितम् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शोकचित्राम्बुदग्धस्तद्वीजीहर्षाश्रुनीरया ।
आगाद् विजय इत्युक्तिस्वात्याऽभून्नवपल्लवः ॥ ४७ ॥

दु० व्या–वीजी–पिता ॥ ४७ ॥

अथ वानवासिका—

अथो नरेन्द्रः प्रधानवर्गान्, महोत्सवानां विधौ न्यदीक्षत् ।
विभूषितं तैः पुरं च चञ्चद्ध्वजव्रजाद्यैः समं समन्तात् ॥४८॥

अथ मात्रासमकम्—

श्रुत्वा मुदितैर्विजयमुपेतं, पौरैः सहिताः सुगुणनिकेतम् ।
तमभिययुस्ते नमदवनीपं, स च संप्रापन्नगरसमीपम् ॥ ४९ ॥

अथ उपचित्रा—

अथ पुरललनास्तूर्यनिनादं, श्रुत्वा विरचितविश्वाह्लादम् ।
अपि जघनस्थलभाराकलितास्त्वरितं विजयं द्रष्टुं चलिताः ॥५०॥

चपलाश्चञ्चलकुण्डलहारा मिलिता वर्त्मनि शीघ्रमुदाराः ।
विजयविलोकनलालसनेत्राः, प्रोचुर्वचनमिदं मृगनेत्राः ॥ ५१ ॥

अथ चित्रा—

धन्यः स जयतु नृपजयचन्द्रस्तत्कुलविपुलगगनतलचन्द्रः ।
नयनामृतमयि यदि गततन्द्रः, सततमुदित इह विजयनरेन्द्रः॥५२॥

अथ पादाकुलकम्—

शिवेन देहे, स्मरो नहीदं, किन्त्वेषोऽमुं विलोक्य रम्यम् ।
सहसा विगलितगर्वतरङ्गस्त्रपया समजनि नियतमनङ्गः ॥ ५३ ॥

दु० व्या०—देहे इति दग्धः । इदं नहि ॥ ५३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ वदनकम्—

पुरतश्चाचलिरद्भुतरूपं, वर्णयति स्म गुणैरिति भूपम् ।
मागधजनता वलितग्रीवं, तं पश्यन्ती महसा पीदम् ॥ ५४ ॥

दु० व्या०—पीदम्—पुष्टम् ॥ ५४ ॥

अथाडिल्ला—

भुजबलकलिताऽखिलवसुधाकर !,
देशस्थितबहुमणिवसुधाकर ! ।
दानकला दिवमिव न सुधा कर—
मुज्झति तव निजवंशसुधाकर ! ॥ ५५ ॥

दु० व्या०—वसुधा—पृथ्वी, करः—दण्डः । मणिः—रत्नम्, वसु—स्वर्णं, धा—धारकः । आकर ! सर्वत्र सम्बोधनम् । सुधा यथा । दिवम्—स्वर्गम् । तथा तव । करं दानकला ॥ ५५ ॥

विद्यारञ्जितसकलकलाधर !, यशसाऽरं जितसकलकलाधर ! ।
यानविगेयसुरेश्वरकुञ्जर !, जय जय विजयनरेश्वरकुञ्जर ! ॥५६॥

दु० व्या०—यशसा अरम्—अत्यर्थम् । विगेयः—निन्द्यः ॥ ५६ ॥

अथ पद्धडिका—

जय चन्द्रधवलकलकीर्तिपूर !, जय चन्द्रवदन ! रुचिविजितसूर ।
जयचन्द्रकलाम्बुजराजहंस !, जय विजयचन्द्र ! वीरावतंस ! ॥५७॥

दु० व्या०—हे चन्द्रवदन ! । हे रुचिविजितसूर ! ।

श्रीपार्श्वनाथपदनलिनभृङ्ग !, गुणगरिमविजितगिरिमेरुशृङ्ग ! ।
रणरङ्गनटितघनविकटवीर !, जय विजयचन्द्र ! जलनिधिगभीर ! ॥५८।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काश्मीरैः कृतहस्तकं प्रविलसन्मुक्ताफलस्वस्तिकं,
कर्पूरागुरुसौरभोल्वणपथं प्रेङ्खत्पताकाकुलम् ।
चञ्चत्तोरणमुल्लसज्जनमनः संगीतभङ्गीमयं,
भूपालः स विशेश मङ्गलपुरं माङ्गल्यकेलीगृहम् ॥ ५९ ॥

स ताभ्यामानन्दोल्लसितनवरोमाञ्चकवचो,
वधूभ्यामानंसीज्जनकजनयित्रीचरणयोः ।
चिराद् भ्रष्टं प्राप्य प्रवरतरमाणिक्यमिव तं,
वचस्तीतं तौ च पदमधिषातामनवधिम् ॥ ६० ॥

दु० व्या०—तीतम्—अतीतम् ।

इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिविरचितं
श्रीमाणिक्याङ्के श्रीधरचरित्रे पञ्चमसर्गस्य
स्वोपज्ञदुर्गपदव्याख्या समाप्ता ॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरि-
विरचिते माणिक्याङ्के श्रीश्रीधरचरित्रे धानासि-
कादिलक्ष्यविजयचन्द्रजनकसंगमो
नाम पञ्चमः सर्गः ।

ग्रन्थाग्रम ७२ । अ० ४ ॥

---

१ °मुल्लसज्ज° A, °मुल्लसज्ज° B । २ °द् दृष्टं R । ३ वचोऽतीतं R । ४ °च्छे श्रीमां° B । ५ °रसूरिवि° B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# षष्ठः सर्गः ।

## अथ वर्णवृत्तछन्दसां लक्षणम् ॥

| | |
|---|---|
| १. उक्तायां | जातौ ग् श्री । |
| २. अत्युक्तायां | गौ स्त्री । |
| ३. मध्यायां | मो नारी । |
| ४. प्रतिष्ठायां | मो गः कन्या । |
| ५. सुप्रतिष्ठायां | भो गौ पङ्क्तिः । |
| ६. गायत्र्यां | न्यौ शशिवदना । |
| ७. उष्णिहि | नौ गो मधु । |
| ८. अनुष्टुभि | मौ गौ विद्युन्माला । |
| ९. बृहत्यां | र्—न—स हलमुखी । |
| १०. पङ्क्तौ | म—स्—ज—गाः शुद्धविराट् । |
| | भ्—म्— —गा रुक्मवती । |
| | म्—भ—स्—गा मत्ता वेदैः । |
| ११. त्रिष्टुभि | म—स्—ज। गौ वैकरूपम् । |
| | भौ—भो—गौ दोधकम् । |
| | भ—त—ना—गौ श्रीः । |
| | नौ—र—ल्—गौ भद्रिका । |
| | तौ—जो—गौ इन्द्रवज्रा । |

---

१ अस्मिन् सर्गे छन्दोलक्षणसूत्रपर्यन्तं R आदर्शे छन्दोनाम्ना सह 'छन्दः' इति पदं सर्वत्र निहितमस्ति परं A B आदर्शयोस्तदसत्त्वादत्रास्माभिः गृहीतम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज–त–जा–गौ उपेन्द्रवज्रा–एतयोश्च संकरश्चतुर्दशधा
सर्वजातीनामपीति वृद्धाः ॥

र–न–भा–गौ स्वागता ।

र–न–र–ल्–गा रथोद्धता ।

मा–त्तौ–गौ शालिनी वेदैः ।

१२. जगत्यां ज–त–ज्रा वंशस्थम् ।

तौ–ज्रौ इन्द्रवंशा। एतयोः संकरः प्राग्वत् ॥

न–भ–भ्रा द्रुतविलम्बितम् ।

जौ–जौ मौक्तिकदाम ।

सौ–सौ तोटकम् ।

यौ–यौ भुजङ्गप्रयातम् ।

रौ–रौ स्रग्विणी।

मौ यौ वैश्वदेवी शरैः ।

न ज ज्याः तामरसम् ।

र न भ साः चन्द्रवर्त्म ।

न भ ज्रा प्रियंवदाः ।

स जौ सौ प्रतिमाक्षरा ।

म्भौ स्मौ जलधरमाला वेैः ।

त्यौ त्यौ मणिमाला रसैः ।

१३. अतिजगत्यां म नौ ज्रौ गः प्रहर्षिणी गुणैः ।

स्जौ स्जौ गो नन्दिनी ।

ज्भौ स्जौ गो रुचिरा वेदैः ।

स्थौ स्जौ गः सुदत्तम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१४. शर्कर्यां न्भौ जौ गौ वसन्ततिलका ।
नौ म्नौ ल्गौ प्रहरणकलिका: ।

१५. अतिशर्कर्यां नौ नौ सो मणिगुणकरः[1] ।
नौ म्यौ यौ मालिनी नागैः ।
त भौ जौ रो मृदङ्गः ।
मौ मौ मः कामक्रीडा ।

१६. अष्टौ न ज भ ज्र गा वाणिनी ।

१७. अत्यष्टौ य म्न स्भ ल्गा शिखरिणी रसैः ।
न्सौ म्रौ म्लौ गो हरिणी रसैः वेदैः ।
ज्स ज्स य ल्गाः पृथ्वी नागैः ।
मो भ्नौ तौ गौ मन्दाक्रान्ता वे[3]: रसैः ।

१८. धृतौ म्तौ न्यौ यौ कुसुमितलतना शराङ्गैः ।

१९. अतिधृत्यां य्मौ न्सौ रौ गो मेघविस्फूर्जिता रसैः रसैः ।
म्सौ ज्सौ तौ गः शार्दूलविक्रीडितं सूर्यैः ।

२०. अथ कृतौ म र भ न य भ ल गाः सुवदना द्विरश्वैः ।

२१. प्रकृतौ[2] जातिः म्रौ भ्नौ यौ यः स्रग्धरा द्विर्लोकैः ।

२२. अथाकृतौ भ्र न्र न्र न गा भद्रकं दिग्भिः ।

२३. अथ विकृतौ न ज न् ज भ्ज भलगा रुद्रैः ।

२४. अथ संकृतौ भ त्न स्भ भ्न याः अश्वललितम् ।

२५. अभिकृतौ भ् म स्ना नौ नौ गः क्रौञ्चपदा द्विशरैर्वसुमुनिभिश्च ।

---

१ °रः नागैः B । २ प्रेक्षतौ A B । ३ भ्मौ B

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२६. उत्कृतौ मौ त्नौ नौ रसौ लगौ भुजङ्गविजृम्भितं वस्वीशैः ।

समवृत्तप्रकरणम् । अथ दण्डकाः ।

चण्डवृष्टिः नौ सप्त राश्चण्डवृष्टिः ।

यथोत्तरमेकैक'र'वृद्धास्त्वर्णार्णव–व्याल–जीमूत–लीला-करोद्दाम-शङ्खादयः स्वयमभ्यूह्याः । पञ्च ला यथेष्टम्, राश्चण्डकालः ।

अथार्द्धसमप्रकरणम्– ओ जे तौ जो गौ यु जि ज त जा गौ आख्यानकी, व्यत्यये विपरीताख्यानकी ।

ओ जे नौ यौ समेन जज्रगा पुष्पिताग्रा ।

ओ जे सौ सलगाः भौ भाद्गौ उपचित्रम् ।

ओ जे सौ सल्गाः समेन भ भ्रा हरिणप्लुता ।

ओ जे नौ रलगाः समेन जज्राः अपरवक्त्रम् ।

ओ जे भौ भो गौ समेन जज्रा द्रुतमध्या ।

×अथ विषमवृत्तप्रकरणम्–आद्याऽष्टाक्षरपादाश्चतुर्वृद्धाः क्रमात् परे पदचतुरूर्ध्वम्, एतच्चतुर्विंशतिधा विषमोच्चारत्वात् तद्भेदाः न वक्ष्यन्ते । ×षड्भिः पदैः षट्पदीविषमाक्षरपदा विषमाक्षरा । अथैषां क्रमाल्लक्ष्यमाह––

B आदर्शे ×एतच्चिह्नान्तरितः पाठः पतितः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तयां श्रीछन्दः—

गीः श्रीः धीः स्तात् ॥ १ ॥

दु० व्या—धीः—बुद्धिः, स्तात्—भवतु ॥ १ ॥

अथात्युक्तायां स्त्रीछन्दः—

दत्तां स्वस्ति श्रीमान् पार्श्वः ॥ २ ॥

मध्यायां नारी—

धीरं इं गम्भीरं गर्जन्तं शौण्डीरम् ॥ ३ ॥

प्रतिष्ठायां कन्या—

प्रेङ्खद्भासं विश्वोल्लासं, लक्ष्मीवाणी लीलावासम् ॥ ४ ॥

सुप्रतिष्ठायां पङ्क्तिः—

सौवसुवंशाम्भोजमरालं, त्रुट्यदरातिक्ष्मापतिजालम् ॥ ५ ॥

दु० व्या—सौवः—स्वकीयः ॥ ५ ॥

गायत्र्यां शशिवदना—

×नयनविशालं नयनवशालम् ।
अविकलभालं शशिकलभालम् ॥ ६ ॥

दु० व्या—नये—न्याये नवाप्राकारम् । अविकला भा प्रभा आलं—भूषणं यस्य तम् । अली भूषणं पर्याप्तिः इत्यादिधातोः ॥ ६ ॥

उष्णिहि मधु—

निशमनविषयं तमथ कृतवती ।
प्रमदमधिगता नृपसभजनता ×॥ ७ ॥ कुलकम् ॥

दु० व्या०—निशमनं—आलोकनम् ॥ ७ ॥

अथानुष्टुभि विद्युन्माला—

---

१ B आदर्शे ×एतच्चिह्नाङ्किता पतिताः पङ्क्तयः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आलिङ्ग्याथ न्यस्तं रङ्गेणैतं पित्रोत्सङ्गे चक्रे ।
मौलेर्लीला लोलन्मालापातं नेमुः क्षोणीपालाः ॥ ८ ॥

बृहत्यां हलमुखी—

पूर्वशैल इव तरणिं विन्ध्यशैल इव करिणम् ।
अङ्कगं क्षणमथ वहन्नन्दनं नरपतिरभात् ॥ ९ ॥

अथ पङ्क्तौ शुद्धविराट्—

उद्दामद्युतिमण्डलं सदा, युक्तं तेन महाबलेन च ।
प्रेक्षन्तोऽग्निमिवाग्निमञ्जसा, क्षोणीन्द्रा जयचन्द्रभूपतिम् ॥१०॥

दु० व्या०—महाबलेन पक्षे वायुना ॥ १० ॥

अथ रुक्मवती—

प्राभृतमेके कुञ्जरमश्वं, भूषणमन्ये विस्मितविश्वम् ।
ढौकितवन्तः श्रीजयचन्द्रात्, केऽपि च तुष्टात् प्रापुरिदं द्राक्[1] ॥११॥

मत्ता—

क्रीडागारैः सकलकलायास्तत्रौपम्यैरिव कमलायाः ।
लीलालोकाहृतमदनाभिश्चक्रे नृत्यं शशिवदनाभिः ॥ १२ ॥

अथ त्रिष्टुभि एकरूपम्—

उद्भूतो हृदये ललन् विरेजे, तासां हारमिषेण हर्षभारः ।
मेदिन्या वलयेऽपि चास्य मानं, नाख्यँस्ताश्चलकुण्डलच्छलेन ॥१३॥

अथ दोधकम्—

श्यामललोमलतावलिदण्डा, कोमलकायघनस्तनतुम्बा ।
काचन मुग्धसखीमिव वीणामङ्कतलं नयति स्म प्रवीणा ॥ १४ ॥

दु० व्या०—प्रवीणा—प्रकृष्टा वीणा । प्र पश्चिमो न गुरुः ॥ १४ ॥

---

१ °रिन्द द्राक् R ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ श्रीः—

वर्षकरीणां ध्वनिरिव वीणावेणुरवः स्यात् पुनरिह चित्रम् ।
गर्जति तूर्ये घन इव तासां, हंसकनादः क्रमकमलेऽभूत् ॥ १५ ॥

दु० व्या०—वर्षकरी तिमिरी, हंसकपक्षे नूपुरः ॥ १५ ॥

अथ भद्रिका—

नटनटनरसाश्रिता जनाः, सफलतरुतुलां न के ययुः ? ।
वितरणकलयाऽभिमार्गणान् , सुरतरुसदृशो नृपस्त्वभूत् ॥ १६ ॥

अथेन्द्रवज्रा—

इत्थं भवत्युल्लसितप्रभायामस्मिन् महे तत्र महासभायाम् ।
पार्श्वस्थपुत्रं जयचन्द्रभूपं, व्यज्ञापयद् वेत्रधरः प्रणम्य ॥ १७ ॥

इन्द्रवज्रा—

द्वारि प्रभो रत्नपुराधिनाथरत्नाङ्कदक्ष्मापतिमन्त्रिमुख्यः ।
आस्ते विधित्सुस्तव देवसेवां, ब्राह्मे मुहूर्तेऽलिरिवाम्बुजस्य ॥१८॥

अथोपेन्द्रवज्रा—

ततस्तमाज्ञावशतः क्षितीन्दोरवीविशद् वेत्रिवरः समाजम् ।
पुरः स्फुरत्कौशलिकं निधाय, प्रधानराज्ञः प्रणनाम भूपम् ॥१९॥
अथो निविष्टं नृपतिस्तमिष्टं, जगौ सगौरव्यगुणं गुणज्ञः ।
अलङ्कि कच्चिल्लघुताविहीनैः, सुखं भवद्भिः शुभयद्भिरध्वा ॥२०॥

अथ सङ्करः—

कच्चित् पुरं रत्नपुरं प्रशस्तं, भिया जनानां न मनो विहस्तम् ।
न क्लेशलेशप्रहतः स देशः, समुल्लसद्धर्मधनप्रवेशः ॥ २१ ॥

दु० व्या—विहस्तं व्याकुलम् ॥ २१ ॥

---

१ °ततः समा° R ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कच्चिद् द्वितीयं हृदयं तृतीयं, विनिद्रनेत्रं मम तत्र मित्रम् ।
रत्नाङ्गदः पाति नृपः प्रतापप्राज्यं च राज्यं विजितारिवर्गः ॥२२॥

तस्य प्रधानं गुणसंनिधानं, प्रधानवत् साङ्ख्यमते प्रधानम् ।
त्वमेष हृल्लेखकरश्चिराद् वा, प्रीत्यै स्वमित्रागतपक्षिणोऽपि ॥२३॥

दु० व्या–प्रधानवत्–प्रकृतिवत् । हृल्लेखः–उत्कण्ठा ॥ २३ ॥

एष स्वभावः स्थिरसौहृदानां, यथाऽर्कपद्मेन्दुपयोनिधीनाम् ।
मिथो यदाऽऽलोकनतः प्रमोदस्तथापि कार्यश्रवणे विनोदः ॥२४॥

ऊचेऽथ भूपं सचिवः स्वरूपं, भवद्गिरः किं न वदन्तिरूपम् ।
इदं समाधानपदं हृदन्तर्मुदं ददत् ते विदधे तथापि ॥ २५ ॥

दु० व्या०–वदन्तिरूपं प्रकृष्टम् । वदन्ति "त्यादेश्च प्रशस्ते रूपप्" [७. ३. १०.] प्रत्ययः । समाधानम्–उत्तरम् । पक्षे वै–निश्चितम् ॥२५॥

जित्वा दिवं रत्नपुरं विराजि, यल्लक्ष्मणानामपि वै जयन्ती ।
अबाधया यत्र पुमर्थभाजां, साम्यं प्रजानां दधते न देवाः ॥२६॥

दु० व्या०–जयन्ती–इन्द्रपुत्री ॥ २६ ॥

रत्नोज्ज्वलैरिभ्यजनस्य हर्म्यैर्धर्मालयैर्मौक्तिकधर्मरम्यैः ।
अहो ! महीमण्डलमण्डनाय, तन्मण्डलं कुण्डलतामियर्ति ॥२७॥

रत्नाङ्गदे रक्षति बाहुदण्डमिव क्षमामण्डलमिद्धकान्तौ ।
कुतः कुशोभारिपवोऽभितस्तत् पराभवं कर्तुमलं भवन्ति ॥२८॥

दु० व्या०–कुशोभा–एकः, कुशोभा–पृथ्वीशोभा तस्या रिपवः ॥२८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्युल्लतागोलकवद् विजेता, न जायतेऽसौ रणमेघकाले ।
स्वयं रयादभ्रबलं ददानो, यतोऽनुकूलोऽसि महाबलस्त्वम् ॥२९॥

दु० व्या०—भूपपक्षे रयाद्, अदभ्रं—बहु ॥ २९ ॥

नक्तं दिने वा दिवसावसाने, तन्मण्डलेऽध्वन्यत्रधूश्चरन्ती ।
विभूषणं मुञ्चति भारभीत्या, न चौरभीत्या न च शत्रुभीत्या ॥३०॥

अथेन्द्रवज्रादित्रयं यथेच्छम् ।

नवाम्बुदस्येव विलोकनाय, सदा तदन्तःकरणं मयूरः ।
तथापि मे संप्रति यन्निदानं, समागमे तच्छृणु सावधानम् ॥३१॥

दु० व्या०—मयूरसदृशम् ॥ ३१ ॥

तस्य प्रभोश्चित्तसरोजहंसी, राज्ञीषु मान्या मदनाऽस्ति राज्ञी ।
रूपश्रियाऽस्या व्यथिताशया सा, रम्भान्तराऽसारतरुर्वनेऽभूत् ॥३२॥

दु० व्या०—प्रसिद्धरम्भा—कदली, अन्तरे असारः ॥ ३२ ॥

सुलोचनेत्यस्य समस्ति कन्या, तत्कुक्षिपद्माकरलब्धजन्मा ।
यां पद्मिनीमादित एव रङ्गाद्, भेजुर्जनानां नयनानि भृङ्गाः ॥३३॥

सा चन्द्रलेखेव सुनिष्कलङ्काऽलं कामभल्लीव सुनिष्कलङ्का ।
तरीव तूर्णं सकलं समन्ताद्, कलासमुद्रं कलयांबभूव ॥३४॥

दु० व्या०—अलम्—अत्यर्थम्, कामभल्लीव सुतेजः, तदेव निष्कं स्वर्णं तस्य लङ्का ॥ ३४ ॥

आस्येन तस्या[1] विजितः कलावान्, निजाः कलाः कौशलकीचकार ।
स शून्यहृत्त्वेन विलोकयतेऽङ्कव्यलीकतस्तत्र च ताः समस्ताः ॥३५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा शैशवं यौवनिकां विशाले, श्रितानुकूले कलिता रसौघैः ।
मनोरमा नित्यमरालगत्या, सरस्वती कैर्न जगे कुमारी ॥३६॥

दु० व्या०–कुमारीपक्षे शैशवं बाल्यम्, यौवनिकां तारुण्यं श्रिता। ते द्वे, किंविशिष्टा ? विशालभारती, पक्षे विशाले–अनुकूले हिते पुरुषे श्रिता शेषं स्पष्टम्। नदीपक्षे विशाले विगते पक्षे तु विगते कूले तटे द्वे श्रिता, नित्यं अरालगत्या चक्रगत्या ॥ ३६ ॥

न नागकान्ता न च नाकनारी, न खेचरी कापि तुलामुपैति ।
तस्याः पुनर्दर्पणतल्पशायिच्छाया कियच्छायलवं लभेत ॥३७॥

दु० व्या०–छायालवम् ॥ ३७ ॥

अथान्यदा यौवनपल्वलान्तर्विहारिणी तातसभानलिन्याम् ।
प्रातः सखीव्रातयुता वितेनेऽलिनीव सा नूपुरझङ्कृतानि ॥ ३८ ॥

तातं नता नन्दितनेत्रभृङ्गमालाप्रवालाभकरा न कस्य ।
क्रोडीकृता तेन च भूभृता सा, चेतोहरच्चम्पकवल्लरीव ॥ ३९ ॥

दु० व्या०–तातं प्रति ॥ ३९ ॥

छन्दःस्थितिज्ञाशुभलक्षणाऽसि, त्वं विश्वसाहित्यबुधा द्विधेति ।
नरेश्वरः स्वीयगिराऽवनम्रां, प्रष्टुं सुतां प्रेरयति स्म विज्ञान् ॥४०॥

दु० व्या०–छन्दोऽभिप्रायः–छन्दशास्त्रं वा लक्षणम्, शास्त्रं सामुद्रिकं वा, विश्वं समस्तम्, साहित्यं पक्षे हितसहितत्वं तद्विषये बुधा विज्ञा इति गिरा ॥ ४० ॥

एके समस्यामपरे प्रमाणप्रहेलिकादीन्यवदन् विदग्धाः ।
लब्धोत्तराः पृष्टनिरुत्तराश्च, न बालया बालतराः कृतास्ते ॥४१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विज्ञामवज्ञातसुरीं निरीक्ष्य, तारुण्यलक्ष्म्यर्पितचारुलीलाम् ।
कन्यावरोधे स निदेश्यकन्यामज्ञापयन्मन्त्रिवरं नरेन्द्रः ॥ ४२ ॥

दु० व्या०—कन्यावरोधे—कन्यान्तःपुरे ॥ ४२ ॥

नितम्बिनी राजति कल्पवल्लीवल्लीलया कान्तमवाप्य काले ।
ममापि चिन्ताऽजनि तत्सुताया वरोऽनुरूपोऽथ निरूपणीयः ॥४३॥

दु० व्या०—वल्लीवत् ॥ ४३ ॥

रूपं यदि स्यान्न कुलं ततः स्यात्, ते चेन्न नैपुण्यमपि श्रुतेषु ।
वरेषु दुर्ज्ञेयमिदं विभाव्य, स्वयंवरं कारयितुं समीहे ॥ ४४ ॥

दु० व्या०—ते रूपकुले ॥ ४४ ॥

मन्त्री नृपं स्माह सुयुक्तमुक्तं, व्यक्तं सुवर्णाभरणेषु योग्यः ।
मणिर्न रौति त्रपुणि प्रबद्धः, परं भवेद् योजयितुर्जडत्वम् ॥४५॥

दु० व्या०—रौति वक्ति ॥ ४५ ॥

ततो निदेश्यान्नृपतिर्विधातुं, पतिंवरा मण्डपमादिदेश ।
देशाधिपान् ह्वातुमहं निदिष्टस्त्वामागमं श्रीजयचन्द्रभूप ! ॥४६॥

गीते कवित्वे भरतेऽपि भूपाः, कुमारवत् पण्डितसन्निधिस्थाः ।
मनोविनोदाय सुलोचनायाः, कलाकलापं कलयन्ति के न ? ॥४७॥

अथ क्षितीशस्तमुवाच हृद्यं, सौहृद्यमेवं सुहृदा न्यवेदि ।
धीरोचितो मेऽजरतो रतोत्कधीरोचितोऽयं न पुनर्विवाहः ॥४८॥

दु० व्या०—हे धीर ! अजरतो—न वृद्धस्य न उचितः, रतेरुत्का धीर्येषां तेषां रोचितः ॥ ४८ ॥

जरा नराणां खलु काष्ठकीरः, काष्ठं यथाऽन्तस्तनु जीर्णयन्ती ।
तच्चूर्णपातादिव शुक्ललोमा विलोक्यतेऽसौ किल वृद्धलोकः ॥४९॥

दु० व्या०—अन्तस्तनु—तनुमध्ये ॥ ४९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रायो जनाः स्युः पशवः शिशुत्वे, स्त्रीशैवलिन्यां शफरा युवत्वे ।
धर्मे मतिर्येषु न वार्द्धकेऽपि, हाहा ! हता ही हरिणा इवामी ॥५०॥

ततः स्वयं स्थातुमहं समीहे, संप्रेषये तत्र निजं तु पुत्रम् ।
श्रुत्वेति तं क्षोणिपतेः सकाशे, निध्याय मन्त्री हृदये स दध्यौ॥५१॥

अहो ! महोराशिरहो महत्त्वमहो ! महोल्लासकरी तनुश्रीः ।
तस्या यदि स्यादयमेव भर्त्ता, तत् किं परैः किन्तु बली निदेशः ॥५२॥

दु० व्या०—निदेशः—आदेशः ॥ ५२ ॥

आदिश्यतां तत् त्वरितं स्वसूनुरित्युक्तिपूर्वं प्रणिपत्य भूपम् ।
गन्तुं प्रवृत्तः सचिवोऽन्यदेशान्, पितुर्निर्देशाद् विजयोऽप्यचालीत् ॥

चलत्पताका शफरातरङ्गा, विलोलवाहैर्विलसत्तरङ्गा ।
स्वभावतोऽप्यस्य चमूश्चरन्ती, रिपुद्रुमोन्मूलनसिन्धुरासीत् ॥५४॥

ग्रामाऽऽकरद्रङ्गधरां धरित्रीमुल्लङ्घमानः स लघुप्रयाणैः ।
वैताढ्यभूमीधरसन्निधानेऽन्यदा लुलोक स्फटिकाचलेन्द्रम् ॥५५॥

दु० व्या०—द्रङ्गः—पत्तनम् ॥ ५५ ॥

कोऽयं गिरिर्नेत्रमुदं प्रदत्ते, पुरः स्फुरच्चन्द्रकरावदातः ।
इति प्रणुन्नः प्रयतः प्रणम्य, स्थगीधरः स्माह धराधिनाथम् ॥५६॥

दु० व्या—प्रणुन्नः—प्रेरितः ॥ ५६ ॥

लोकेषु कैलास इति प्रसिद्धः, शम्भोर्निवासं प्रवदन्ति यत्र ।
अष्टापदं सिद्धिपदं युगादिप्रभोः पुनर्जैनमते मतोऽयम् ॥ ५७ ॥

यन्मौलिचन्द्रोपलचारुरोचिर्वीची विहायोऽभिमुखं चलन्ती ।
स्वर्गापगा जेतुमिवाबभासे, हेलावहेला गमितेन्दुबिम्बा ॥ ५८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यदिन्द्रनीलाङ्कुरकान्तिजालमालम्बितं व्योमतलं विलीनम् ।
विगाहते वारिधिवारिशायिनारायणच्छायममायलक्ष्मि ॥ ५९ ॥

दु० व्या०—लक्ष्मी पक्षे शोभा ॥ ५९ ॥

सब्रह्मचारी रजतोच्चयस्याप्यलं सितांशूज्ज्वलकान्तिशाली ।
योऽष्टापदाख्यां कलयन् कवीनां, शुक्ले च गौरे च समत्ववादी ॥

दु० व्या०—सब्रह्मचारी—सदृशः । अष्टापदपक्षे स्वर्णः ॥ ६० ॥

शृङ्गाग्रजाग्रन्नवमेघमाला, जनावलिर्भारतभूमिपात्रे ।
यः प्रोज्ज्वलो निर्झरनीरपूरैः जलप्रदीपस्य कुतूहलाय ॥६१॥

यस्मिन् दरीभ्यः सुरसुन्दरीणामधीतिनीभ्यो मणितेषु नित्यम् ।
स्पर्द्धिष्णुरादान्मणिताश्रयत्वमधित्यकोपत्यकयाऽन्विताऽपि ॥६२॥

दु० व्या०—मणिता—रत्नलक्ष्मीः ॥ ६२ ॥

कादम्बिनीनामवलम्बिनीनामालम्बनं सन्मणिसानुरागा ।
यद्भूः प्रिया कस्य मुदे न तारहारानुकारायतवारिधारा ॥६३॥

दु० व्या०—मणेः सानुरागा या । आयतः—प्रलम्बः ॥ ६३ ॥

तस्यास्यमौलौ भरतेश्वरेण, विराजते कारितमादिचैत्यम् ।
स्थाने यदष्टापदचारुदुष्टकर्मद्वीपध्वंसितयेक्षकाणाम् ॥ ६४ ॥

दु० व्या०—स्थाने—युक्तम् । पक्षे अष्टापदशरभवत् ॥ ६४ ॥

व्याजन्मणीकिङ्किणिकाक्वणानां चलत्पताकाञ्चललोललोला ।
श्रीर्यस्य नित्यं शिखरे जिनेन्द्रगुणावलीगायति किन्नरीव ॥६५॥

दु० व्या०—लोला—जिह्वा ॥ ६५ ॥

तत्रार्हतां श्रीऋषभादिकानां, काम्याश्चतुर्विंशतिर्मूतयश्च ।
प्रतिष्ठिताः श्रीभरतेन वर्णध्वजप्रमाणादियुता जयन्ति ॥ ६६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**धरस्य भूमिं परितो विदार्य, कदापि काले किल दण्डरत्नात्।**
**रक्षाऽस्य चक्रे सगरस्य पुत्रैः, गङ्गापयोभिः परिखां प्रपूर्य ॥६७॥**

**श्रुत्वेति हर्षोत्पुलकः क्षितीशस्तमारुरोह स्मृतचेटको द्राक् ।**
**अभ्यर्च्य सायं जिनपङ्क्तिमेष विशेषतः पार्श्वजिनं नुनाव ॥६८॥**

तथाहि—षड् गुप्तानि—

**" नतसुरमुकुटाली चन्द्रिकाचारुचञ्च-**
**चरणकमलसद्यो द्योतयन्नाज्ञया ते ।**
**सकलकुशलशालीति स्तुतः साधुचक्रै-**
**रनिशमिह मुदेवः पार्श्वदेवाधिदेवः ॥ ६९ ॥**

दु० व्या—नतसुरमुकुटेत्यादि—इह विश्वे निरन्तरं पार्श्वदेवाधिदेवः वः—युष्माकं मुदे—हर्षाय भवतु । किंविशिष्टः ? इत्यमुना प्रकारेण साधुचक्रैः सतां समूहैः स्तुत इतीति किम् । हे नतसुरमुकुटालीचन्द्रिकाचारुचञ्चच्चरण ! नताः—नम्राः सुराः—देवास्तेषां मुकुश्रेणिस्तस्याश्चन्द्रिकासु ज्योत्स्नामध्ये चारु-चञ्चन्तौ चरणौ यस्य स एतावता प्रभोश्चरणयोरतीव कान्तिमत्त्वमुक्तम्, तस्य सम्बोधनम् । यो ना—पुमान् ते—तव आज्ञया कं—मस्तकं द्योतयन् सन् अलसत्—उल्ललासेत्यर्थः । स पुमान् कलकुशलशाली ज्ञेयः । कलाः—मनोज्ञाः कुशलाः—विद्वांसस्तेषु शाली अथवा कलैः—कुशलैर्मङ्गलैः शोभमानः ॥ अत्र वृत्ते गुप्तानि ६ । चरणकमलेति योगेऽपि चरणेत्यत्र स्थित्या मन्त्रणगुप्तम् १ । कं—कर्मगुप्तम् २ । सद्य इत्यत्र अलसत् क्रियागुप्तम् ३ । यः—कर्तृविशेषण-गुप्तम् ४ । ना कर्तृगुप्तम् ५ । सः—विशेषणगुप्तम् ६ ॥ ६९ ॥

त्रयोदशगुप्तानि—

**कमलनाथ ! मनोहरहंसवद् भवतमोऽपि विभाविभवाऽऽलय ! ।**
**गुरुगुणव्रजगौरव ! ते गुणान्मम मुदा स्तुवतः स्तुतिगोचरम् ॥७०॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—कमलेति वृत्तम् कमलनाथ । मनोहर हंसवत् । भव तमोऽपि । विभाति भव । आलय गुरुगुणव्रज गौरव । एवं स्पष्टाः शब्दा एव । अथ व्याख्या—हे विभो ! त्वं हंसवत् मम मनः कं—मनः एव जलम् । न अल – न लिभूषय ? अपि तु अल—विभूषय । 'यत्रोदकं तत्र भवन्ति हंसाः' इति न्यायवत् । अलेरत्यत्र अली—भूषणपर्याप्तिवारणेषु, अलयं हि हेर्लोपाद् अल इति । हे विभो ! । अथवा हंसवत्—सूर्यवत्, भव, तमोऽपि न हर ! अपितु हर, हरेति प्रसिद्धम् । हे विभो ! अत एव कारणाद् विभाः—प्रभा आलय—उद्यमय । यदि भगवतः सूर्योपमा ततः प्रभाणामुद्यमनं युक्तम् । 'अड—उद्यमे' अड्ड् कारितागमे हेर्लोपाद् डलयोरैक्ये आलय इति सिद्धम् । पुनः हे विभो ! ते—तव गुणान् स्तुवतो मम स्तुतिगोचरं अव—याहि 'अव—रक्षणगतिकान्ति'इत्यादि । अव सिद्धं गोचरमित्यत्र 'गावश्चरन्ति यत्र तदपि गोचरम्' तच्च स याति यो वृषभो भवति । अतस्त्वं किंविशिष्टः ? गुरुगुणव्रजगौरवः प्रौढा ये गुणास्त एव व्रजानि गोकुलानि तेषु गौरिव गौः वृषभः ॥ अत्र त्रयोदश गुप्तानि, तथाहि—कं—कर्मगुप्तम् १ । अल—क्रिया-[गुप्तम्] २ । न—शब्दगुप्तम् ३ । अथ—शब्दगुप्तम् ४ । मनः—कर्मगुप्तम् ५ । हर—क्रियागुप्तम् ६ । हंसवत्—अर्थगुप्तम् ७ । विभा—कर्मगुप्तम् ८ । विभो—संबोधनगुप्तम् ९ । आलय—क्रियागुप्तम् १० । व्रज—अर्थगुप्तम् ११ । गौः—कर्तृविशेषणगुप्तम् १२ । अव—क्रिया[गुप्तम्] १३ । एवं गुप्तानि ॥ ७० ॥

[1]अथ नामन्त्रिम्—

**राजहंसकलहंसकलापी काककोकिलकपोतपदश्रीः ।**
**त्वं जिनेडजमृजादरफालीरेनसां हि फणमण्डलमाली ॥ ७१ ॥**

---

[1] नास्ति पदद्वयं B आदर्शे ।

८

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—वृत्तद्वये गुप्तचित्रं नामचित्रम्, राजहंसेत्यादि—राजहंस कलहंस कलापी मोर काक कोकिल कपोत जादरफाली माली—आरामिकः । अथ व्याख्या—किलेति सत्ये । हे काकको ! । हे जिनेट् ! । हे मृजादरफ! । हि—निश्चितं त्वं एनसां—पापानां आली, अज—क्षिप—निराकुरु ! काकको इति कः-यमस्तं प्रति अका—कुटिलाः कुः—भूमिर्यः । एतावता मृत्योरगम्यः । उपलक्षणत्वाद् जन्मजरामृत्युरहितस्तस्य संबोधनम् । जिनाः सामान्य-केवलिनस्तेषु, इट्—स्वामी तस्य संबोधनम् । मृजा—शुद्धिः—कर्ममलापगमस्त-द्दायकं राफा—ज्ञानं यस्य सः, तस्य संबोधनम् । 'चर्फरफ रिफ' इत्यादि रफधातुः । 'सर्वे गत्यर्था ज्ञानार्थाश्च इति वचनात् । किंविशिष्टस्त्वम् ? राजेति राजा—चन्द्रः हंसः—सूर्यस्तद्वत् कलां—मनोज्ञां हंसकलां—आत्मकलां आप्तुं शीलमस्येति राजहंसकलहंसकलापी कपोतेति । कं—जलं तस्य पोतो बालः, एतावता जलजत्वात् कमलं तद्वत् पदश्रीः—क्रमशोभा यस्य सः । पुनः किंविशिष्टः ? फणेति एकः प्रसिद्धोऽर्थः । द्वितीयस्तूच्यते । फणा गत्यर्थत्वाद् ज्ञानानि । रूपरूपिणोरभेदोपचारात् श्रुतज्ञानरूपाः फणाः—आगमास्तेषां मण्डलेन—समूहेन माली—व्याप्तः । 'अत्थं भासइ अरिहा' इति वचनात् ॥ ७१ ॥

अथ विभ्रमचित्रम्—

**यदीहसेहाऽवर तेजसाऽढ्यमहो महामोहममुं ततस्त्वम् ।**
**विना वसन्तं नवनीरसं तं, रसा रसाला रसशालिनः स्युः ॥७२॥**

दु० व्या०—अथ विभ्रमचित्रम्, यदीहेति—यदि ईहसे । हावर महा-मोहं नवनीरसं इत्यादि । अथ व्याख्या—अहो इति आमन्त्रणे । हे भव्य ! यदि इह विश्वे सेह ! — सा—लक्ष्मीस्तस्या ईहा वर्तते ततस्त्वं अमुं प्रभुं मह—पूजय । किंविशिष्टः ? अमुं वरतेजसा प्रधानकान्त्या आढ्यम् । अमोहं—अज्ञानरहितम् । दृष्टान्तेनैतद् दृढयति, विनेति — रसाः—रसालाः—

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भूमिसक्ताः सहकाराः, तं सर्वप्रसिद्धं वसन्तं विना रसशालिनो न स्युः। स्वर्गादिषु पक्षमासादि कालाभावात्। रसा—परिग्रहः। किंविशिष्टः? वसन्तं वनीरसं — वनीषु—वनसमूहेषु रसं—जीवनौषधम्॥ ७२॥

अथ नामचित्रम्—

**नारङ्गकदम्बदाडिमीजम्बीरं सहकार! किं जयेत्।**
**कद्लीकणवीरकेतकीर्यदि विश्वेश! ददासि नो दृशम्॥ ७३॥**

दु० व्या०—पुनर्नामचित्रम्। नारङ्गेति — नारङ्गकदम्बदाडिमी-जम्बीरं सहकारकदलीकणवीरकेतकीति इति। अथ व्याख्या—हे सहकार! सहन्ते परीषहादीनिति सहाः—साधवस्तान् करोतीति सहकारस्तस्य संबोधनम्। ना—पुमान् ईजं—वीरम्। किं जयेत्? अपितु न ईः—लक्ष्मीस्तया जातः ईजः —कामस्तं वीरं सुभटं, बवयोरैक्यम्। हे विश्वेश! यदि त्वं दृशो नो ददासि स्वामिनो दृग्दानं विना युद्धे भटानां नोत्साहः स्यादिति। किंविशिष्टः? ईजं—वीरं रङ्गकदम्बदाडि—रङ्गकदम्बः—हर्षसमूहस्तस्य दा— खण्डनं तद्विषये, डलयोरैक्याद् अलिं—वृश्चिकं यथा वृश्चिकदंशे हर्षभङ्गस्तथा अनङ्गोद्रेके पुण्यरङ्गभङ्गः स्यादिति। किंविशिष्टस्त्वम्? कद्लीति अक्षर-लोपाद् 'अनुस्वारविसर्गौ न चित्रभङ्गाय सम्मतौ' इति वचनाच्च कद्लीक—कणवीरा केतकीरिति ज्ञेयम्। कुत्सितं अलीकं कद्लीकं एतावता कद्लीकानि—घातिकर्मेतराणि—दग्धरज्जुप्रायाणि चत्वारि कर्माणि तेषां कणः—अंशः स एव वीरकः—अवशिष्टभटस्तद्विषये अन्तं विनाशं किरति—विस्तारयतीति अन्तकी—विज्ञः प्रभुः। 'शत्रुशेषं न सहते' इति नीतेः देवः—पतिर्विदुषि नैषधराजगत्येति वृत्ते नैषधेऽपि अक्षरलोपोऽभिमतः॥ ७३॥

अथापभ्रंशभाषाचित्रम्—

**मोरु हंस महसीहर माडी, राहि मानन शिवेन भवे त्वत्।**
**आज देव किरि पाप पखाली, मोहमेष न जलाशयपाली॥७४॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**दु० व्या०**–अथापभ्रंशभाषा चित्रम् । मोरुहंसेति मोरुहंस । महसि सिहर माडी । आज देव किरि पाप पखाली । मोह मेष जळशायमाली इति । अथ व्याख्या–हे महसि ऊरुहंस ! महसि तेजोविषये ऊरुः–गरीयान् हंसः–सूर्यस्तस्य संबोधनम् । हे मानन शिवेन ! माननं – पूजा शिवः– मोक्षस्तयोरिनः स्वामी ! पूजार्हत्वात् सिद्धिगमनार्हत्वाच्चार्हत इति संबोधनम्। इह भवे–संसारे रमाळीः मा राहि – मा देहि रमाः–श्रियस्ता एव डलयोरैक्यात् आळीः । सहचारित्वात् 'रांक् दाने' रा धातुः । श्रियोऽप्रार्थने हेतुमाह – हे किरिपापप ! किरिः–शूकरः क्षुद्रत्वात् तद्वद् यत् पापं तस्मात् पातीति किरिपापस्तस्य संबोधनम् । एष मल्लक्षणो जनः आजत् । खानि–इन्द्रियाणि तेषामाली श्रेणिस्तस्या मोहं आजत्–क्षिपति स्मैव । एष किंविशिष्टः ? न जलाशयपाली, डळयोरैक्यात् न जडाभिप्रायरक्षकः । यो ह्यज्ञानेन्द्रियरसव्यग्रश्च स एव मोक्षः प्रदे–प्रभौ प्राप्ते श्रियः अभिलषति ॥ ७४ ॥

अथ विभ्रमचित्रम्—

**येन येन विनयेन बन्धुरा, वीतराग ! तव धीरमानसा ।**
**भूरि भूरि भविना न ते नरा निश्चलास्पदमिदं किमद्भुतम् ॥७५॥**

**दु० व्या०**–पुनर्विभ्रमचित्रम्, येनेति–येन येन विनयेन बन्धुरा वीतरागधीरमानसा भविना ते नरा इत्यादि । अथ व्याख्या–हे येन ! या–लक्ष्मी स्तस्या इनः स्वामी तस्य संबोधनम् ! हे इतराग ! इतः–गतः रागो यस्मात् सः, तस्य संबोधनम् । हे अमान ! प्रसिद्धम् । येन पुरुषेण सा सर्वप्रसिद्धा तव धीः–बुद्धिः प्रवचनरूपा विनयेन आवि । 'अव रक्षणे' इत्यादिधातोः रक्षितेत्यर्थः । धीः किंविशिष्टा ? बन्धुरा–मनोज्ञा अथवा बन्धुः स्वजनरूपा। हे भूरिभूरिः घनघनाभा–कान्तिर्यस्य सः, तस्य संबोधनम् । रा–द्रव्यं तेन पुरुषेण विनाऽन्यत्र निश्चलास्पदं न भवति किमाश्चर्यमिदम् ? यो लक्ष्मीपतेर्धियं रक्षति तद्गृहे धनं निश्चलं स्यात् तस्य धनार्जनविज्ञत्वादिति ॥७५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विभ्रमचित्रम् ।

**सुव्रतेश ! सुमतेऽभिनन्दनाऽनन्तधर्मजिनवर्धमान ! तु ।**
**नेमिनाथ! ऋषभश्रियाऽऽश्रितः, पार्श्वदेव ! शरणं त्वमेव मे ॥७६॥**

दु० व्या०—पुनर्विभ्रमचित्रम् । सुव्रतेति—हे सुव्रतेश ! हे सुमते ! हे अभिनन्दन ! हे अनन्त ! हे धर्म ! हे जिन ! हे वर्धमान ! हे नेमिनाथ ! हे वृषभ ! इति । आद्यवृत्ते श्रीपार्श्व एव स्तुतः । अत्र तु बहवो जिनाः संबोध्यन्ते । कस्यैषा स्तुतिरित्यहो—विभ्रमः ॥ अथ व्याख्या—अमून्यामन्त्रणानि श्रीपार्श्वस्यैव ज्ञेयानि । शोभनव्रतानां ईशः स्वामी तस्य संबोधनम् । शोभना मतिर्दयारूपा यस्य तस्य संबोधनम् । अभि सामस्त्येन नन्दनः—समृद्धिकरस्तस्य संबोधनम् । अनन्तः—अविनाशो धर्मो यस्य तीर्थव्यवच्छेदाभावात् तस्य संबोधनम् । जिनेषु केवलिष्वतिशयादिभिः वर्धमानस्तस्य संबोधनम् । तु एवार्थः । नेमयः—प्रणमनशीलाः नाथाः—भूर्भुवः स्वःपतयो यस्य सः, तस्य संबोधनम् । हे पार्श्वदेव ! मे—मम त्वमेव शरणम् । किंविशिष्टः ? ऋषभश्रिया धुर्यः—लक्ष्म्या आश्रितः । वसभ इव जायत्थामेति वचनात् ॥७६॥

**स्तुत्वेति चित्रदैः काव्यैः, सूरिमाणिक्यसुन्दरः ।**
**याचेऽहं त्वत्पदाम्भोजे, रङ्गाद् भृङ्गायितं प्रभो ! " ॥७७॥**

दु० व्या०—अथ फलमाह—स्तुत्वेत्यादि सुगमम् ॥ ७७ ॥

**तत्राऽऽगतोऽत्रावसरे सुरेन्द्रस्तद् वीक्ष्य वृत्तं हृदि विस्मितस्तम् ।**
**जगौ जिनेन्द्रेष्वविशेषवत्सु, किं ते विशेषः प्रभुपार्श्वदेवे ॥७८॥**

**तं वज्रिणं वीक्ष्य पुरः स्फुरद्भिर्विभूषणैर्भासितदिङ्मुखं सः ।**
**विद्वान् विधिं वैनयिकं विधाय, पूर्वं स्ववृत्तं स्व [1] बभाषे ॥७९॥**

दु० व्या०—विद्वान्—जानन् ॥ ७९ ॥

---

[1] °स्यैर्मुनिमा° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"रात्रौ दिवा जागरणे शये वा, मदाशये तिष्ठति पार्श्वदेवः ।
अयं स्वयं सिद्धिवधूविवाहविधिं हि मे निश्वविभुर्विधाता "॥८०

जगौ हरिस्तं जगदेकमौले!, चिरं जय त्वं विजयक्षितीश! ।
त्वन्मानसं यद् भजतेऽमराली, सेव्यप्रभोर्भक्तिरियं मराली ॥८१॥

दु० व्या०—अमराली ॥८१॥

जाता गुणेभ्यः सहकारिभावं, विनाऽपि विश्वान्यपि चाश्नुवाना ।
पटीयसी कीर्तिपटी त्वदीया, प्रमाणमुल्लङ्घयतीति युक्तम् ॥ ८२ ॥

दु० व्या०—अन्यपटीनिष्पत्तौ तन्तवः समवायिकारणम्, तन्तुद्वय-संयोगेऽसमवायिकारणम्, तुरिवेमादिनिमित्तकारणम्, ते द्वेऽपि सहकारि-कारणे। कीर्तिपटो नैवं जायते। अश्नुवाना—व्याप्नुवन्ती। प्रमाणानि षट् हस्तकादिकं च तर्कशास्त्ररीतिर्वा। पटीयसी—पटुतरा ॥ ८२ ॥

यशः सिताम्भोजमहो! त्वदीयं, विकस्वरं विश्वसरोवरे यत् ।
विराजतेऽसौ किल राजहंसलीलाविहारस्त्वधित्यकायाम् ॥८३॥

दु० व्या०—पक्षे राजहंसौ—चन्द्रसूर्यौ ॥ ८३ ॥

अक्षय्यतूणीरमथो शरीरशृङ्गारमस्मै प्रवितीर्य वज्री ।
स्वर्गं ययौ सोऽपि च पूर्वरीत्या, शेषे निशायाः श्रयति स्म सेनाम् ॥

अथ व्यधुर्मङ्गलगीर्विलासमिलापतेर्द्वारमुपेत्य चारु ।
पटालयस्थस्य विभातवेलां, विलोक्य वैतालिकमण्डलानि ॥८५॥

तीर्थेश्वराः श्रीऋषभादयस्ते, दिशन्तु राजेश्वरमङ्गलानि ।
हरन्तु हेलेः किरणा इवोच्चैस्तमः समग्रा गणधारिणोऽपि ॥८६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आरोप्य पूर्वाचलमौलिमैन्द्री, हरिन्नभोरत्ननिभेन कुम्भम् ।
विभाति ते मङ्गलकारिणीव, कौसुम्भवासायितसान्ध्यरागा ॥८७॥

दु० व्या०—हरित्—दिक् ॥ ८७ ॥

दिवं शशाङ्कः परिभुज्य मित्राऽऽगमात् पलायिष्ट रयात् त्रपालुः ।
धम्मिल्लतां साऽपि तमःशिरोजभारं नयत्याशु रतिप्रकीर्णम् ॥८८॥

दु० व्या०—मित्रः—सूर्यः ॥ ८८ ॥

नूनं निशाशीतगुसंप्रयोगे, स्वेदस्य बिन्दूनि भुवं निपेतुः ।
किमन्यथा वारिकणावलोकः, प्रातः कुशाग्रेषु विनाऽपि मेघम् ॥८९॥

स्फुरत्प्रभामण्डलमण्डलाग्रमाखण्डलाशासुभटं दिनेशम् ।
नेशे द्विजेशेन निशम्य दूरात्, कियद्बलं स्वामिनि बाडवे वा ॥९०॥

दु० व्या०—मण्डलाग्रपक्षे खड्ग । द्विजेन पक्षे चन्द्रेण, इनं सूर्यं पतिं वा ॥ ९० ॥

समागतं वीक्ष्य विदूरदेशादिनं दिनादौ किल पद्मिनीभिः ।
सौरभ्यलीनभ्रमरालिदम्भादानञ्जिरे पङ्कजलोचनानि ॥ ९१ ॥

सरःसरित्पुष्करिणीषु शैत्यं, पद्मेषु सौरभ्यमुभे क्रयाणे ।
लात्वा मरुत्वान् मृदु बम्भ्रमीति, यच्छन् जने नैगमवत् प्रभाते ॥९२॥

दु० व्या०—नैगमः—वणिक् ॥ ९२ ॥

उच्चैः करं प्राच्यगिरेर्विहारी, चिकेलिषुर्व्योममहातडागे ।
उन्मूलयन्नेष तमस्तमालीर्विभाति हस्तीव गभस्तिमाली ॥९३॥

दत्त्वा वियोगाय मुदश्रुनीरैर्जलाञ्जलिं हेलिविभावलोके ।
अयं नरीनर्ति हि चक्रवाकः, प्रीतः प्रियासङ्गमरङ्गशाली ॥९४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निमीलकः कैरविणीवनानामुन्मीलकः पद्मवनावलीषु ।
बालांशुकिर्मीरितशैलसानुरुदेति राजेन्द्रसहस्रभानुः ॥ ९५ ॥

दु० व्या०—किर्मीरिता—कर्बुरिता ॥ ९५ ॥

प्रतापविध्वस्ततमःसमूहं, समुल्लसद्दीधितिमण्डलाग्रम् ।
त्वां मित्रवन्मित्रमुपैति मित्रो, द्रष्टुं प्रभातेऽप्युचितः प्रबोधः ॥९६॥

पूर्वं प्रबुद्धोऽपि नृपः प्रबोधकेरषु दत्तोचितमप्रबुद्धः ।
नाभूत् ततः प्राञ्जलिभृत्यजातः, प्रभातकृत्यं सकलं स चक्रे ॥९७॥

दु० व्या०—अप्रबुद्धः—मूर्खः ॥ ९७ ॥

कर्पूरकालागुरुगन्धधूपमणीवकाद्यैरनणीयसीं सः ।
पार्श्वप्रभोर्माढिममूढबुद्धिर्विर्तत्य सुस्थः पुरतः प्रतस्थे ॥ ९८ ॥

दु० व्या०—मणीवकादि—पुष्पादिपूजा ('माढि पूजाम्' इति B आदर्शे टिप्पणी। ) ॥ ९८ ॥

उल्लङ्घितेऽध्वन्यनिशं प्रयाणैः, पुरः पुरं रत्नपुरं निरीक्ष्य ।
भ्रूपल्लवोल्लासितलब्धचेताः, स्थागीभृदूचे रमणं पृथिव्याः ॥९९॥

इदं मुदं मेदुरयत्यमन्दं, रत्नाङ्गदक्ष्मापपुरं नरेन्द्रः ।
त्वामाह्वयत् तुङ्गनिकेतनाग्रचलत्पताका करपल्लवेन ॥ १०० ॥

इह स्फुटस्फाटिकसौधशृङ्गसमुल्लसत्कान्तिसमुच्चयेषु ।
सदा शशाङ्के द्युतिविभ्रमेण, शोकं न जातु श्रयते चकोरः ॥१०१॥

एतज्जिनौकःशिखराधिरूढप्रौढप्रभाप्राभवहेमकुम्भान् ।
निभाल्य भानुभ्रमतः कदापि, शुचं क्वचिद् यान्ति न चक्रवाकाः॥

दु० व्या०—ओकः—गृहम ॥ १०२ ॥

---

१ °दधूपगन्धं म° A २ ° नाग्रे च R ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्नीरजस्थाष्णुमनोमरालैर्विश्वस्य तापच्छिदुरैर्विशालैः ।
स्वर्णश्रियाऽऽढ्यैरिह साधुलोकैः कासारलक्ष्मीर्न चिरं निषेव्या ॥१०३॥

दु० व्या०—कासारः-सरोवरः, पक्षे सारलक्ष्मीः का ? । नीरजः पक्षे निर्मलः । स्थाष्णुः—निश्चलः पक्षे नीरजेषु स्थाष्णुः । मनोभिः मरालैः । पक्षे सुष्ठु अर्णः पानीयम् ॥

अमुष्य जाम्बूनदशालशीर्षे, स्फुरन्मणीनां कपिशीर्षकाणि ।
दिगङ्गनानां वदनावलोकलीलायिते दर्पणतां वहन्ते ॥ १०४ ॥

प्राकारचीरं परिखाकलापगुणावनद्धं विपुलं वसाना ।
बिभर्ति रत्नालयकान्तिभारैः, कौसुम्भवासः किमिदं पुरश्रीः ॥१०५

दु० व्या—कलापः—मेखला । वसाना—परिदधती ॥ १०५ ॥

वितानमुक्ता इह रत्नसौधेष्वधः पृथिव्यां प्रतिबिम्बभाजः ।
उडुभ्रमाद् वीक्ष्य न केन वाच्यं, नभः प्रयातं बलिवेश्म कस्मात् ॥

दु० व्या०—केन इति वाच्यं न भवति ॥ १०६ ॥

धत्ते स्वयं सा यदि राजकन्या, सुलोचना स्वर्गवधूष्ववज्ञा ।
अदःपुरस्याऽऽभरणं तदेतन्मणीगृहं द्वेष्टि न किं विमानान् ॥१०७॥

इहत्यपौरैर्दुरितं निहत्य, पुण्यैस्तथा द्राग् निरवासि नीलम् ।
यथाऽत्र तन्मित्रतमोऽपि नेशे, स्फुरन्मणीवेश्मरुचिप्रवेष्टुम् ॥१०८॥

विसारिदानाश्चतुराश्रयाश्च, सदालिपालिश्रियमावहन्तः ।
अनेकपाख्या नरकुञ्जरत्वं, नरा भजन्त्यत्र नरेन्द्रमान्याः ॥१०९॥

दु० व्या०—दानं—मदः । चतुरः, हस्तिशाला । अलिपालिः—भ्रमर-

९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रेणिः पक्षे सन् श्रेणिपालिर्ना श्रियम् । 'अनेकप' इति आख्या—नाम येषां पक्षे अनेकपाः—अनेकरक्षकाः । नरकुञ्जरत्वं—नरश्रेष्ठत्वम् ॥ १०९ ॥

इतः पुरोऽस्याः परितो वनाली, विलोक्यतां नाथ! यथा घनाली।
प्रेङ्खोलनोच्छृङ्खलपौरनार्यो, विद्युल्लतावद् विलसन्ति यत्र ॥११०॥

दु० व्या०—पुरः—नगर्याः ॥ ११० ॥

स्वयंवरायातनरेश्वराणामितः सरस्यां तरलास्तुरङ्गाः ।
ललन्ति लीलाभिरपाङ्गदेशे, सुलोचनाया इव दृक्तरङ्गाः ॥१११॥

यैः स्पर्धितं कोमलकाम्यकन्याऽऽनने नलीनान्यपि तानि नीरे ।
मृद्नन्ति पद्मानि पदैस्तडागे, तदर्थिनां भूमिभृतां करीन्द्राः॥११२॥

इमाः पटावासघटाः सिताभा राजन्ति राजन्निकषा पुरं याः ।
सोढाः स्वशीर्षोपरि भूमिपालैः, सुलोचनालोचनभङ्गिभासः ॥ ११३

दु० व्या०—निकषा पुरं—पुरसमीपे ॥ ११३ ॥

सूक्तैरमीभिः श्रवणप्रयुक्तैः कर्णोदधिः कुण्डलपौनरुक्त्यम् ।
क्षणे क्षणे तस्य विशेषवीक्षाप्रीत्येरितोऽगात् समया पुरं सः ॥११४॥

दु० व्या०—समया पुरं—पुरसमीपम् ॥ ११४ ॥

ततस्तमभ्यागतभूपरत्नाङ्गदः सतन्त्रं स्वपुरं प्रवेश्य ।
पौरैः परप्रीतिभरेण गौरैः, पेयं परे स्थापयति स्म सौधे ॥११५॥

दु० व्या०—पेयं—विलोक्यम् ॥ ११५ ॥

कृष्टा गुणैस्तत्र सुलोचनायाः, समं समीयुर्यदि ते खगेन्द्राः ।
न कौतुकं किन्तु महीधराणामिहागमश्चित्रकृते नराणाम् ॥११६॥

दु० व्या०—खगेन्द्राः—पक्षिश्रेष्ठाः । महीधराणां—गिरीणाम् ॥११६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वयंवराया वरमण्डपोऽथ, प्रकल्पितः शिल्पिवरैर्विरेजे ।
यं वीक्षमाणोऽपि सहस्रनेत्रैर्मन्ये न यायान्मघवाऽपि तृप्तिम् ॥११७॥

वसुन्धरां यत्र विशुद्धवज्ररत्नैर्निबद्धामभितोऽपि वीक्ष्य ।
चक्रे वितर्कं विबुधः किमाद्यं, रत्नप्रभायामिह वज्रकाण्डम् ॥११८॥

दु० व्या०–रत्नप्रभायां षोडश काण्डानि स्युः, आद्यं रत्नकाण्डम् ॥

वेल्लन्मणिव्रातविभातरङ्गाऽवलोकनाद् मज्जनशङ्कयेव ।
वितेनिरे स्तम्भशिरोनिलीनाः, पाञ्चालिका यत्र न कस्य चित्रम् ?॥

स्वस्यायतौ राजकमाशु जेयं, विचिन्त्य पूर्वं लघुहस्ततायै ।
क्षिप्ताः स्मरेणैव शरा विलेसुर्यत्र प्रसूनप्रकरच्छलेन ॥ १२० ॥

दु० व्या०–आयतौ–उत्तरकाले । राजकं–राजसमूहम् । लघुहस्ततायै –अभ्यासाय ॥ १२० ॥

रुद्धेऽन्तरे मौक्तिकतारचारुचन्द्रोदयैर्भानुगणोऽधितस्थौ ।
क्षणं दिदृक्षुः कलशातकुम्भकुम्भालिदम्भात् किल यस्य मौलिम् ॥

दु० व्या०–अन्तरे–मध्यभागे ॥ १२१ ॥

चलद्ध्वजैर्वीक्ष्य विलोलवीचिश्रियं श्रितां यत्र महामहाब्धौ ॥
रङ्गन्मृदङ्गध्वनिभिर्गभीरैः, समाददे सागरगर्जितश्रीः ॥१२२॥

कर्पूरागुरुधूपधूमपटलीकादम्बिनीडम्बरे,
चञ्चत्तोरणशक्रचापरुचिरे भक्तैर्मयूरायितम् ।
दूर्वाङ्कुरितमिन्द्रनीलमणिभिर्द्धारायिते मौक्तिक-
श्रेणीभिः शुचिपद्मरागमणिभिर्यत्रेन्द्रगोपायितम् ॥१२३॥

१ °टलैः का° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीरत्नाङ्गदत्तहूतिभिरथो विश्वेऽपि भूपालसद्-
रूपास्तत्र बभासिरे स्थितिभृतो नामाङ्कसिंहासने।
भेजे भानुतुलां गृहीकृतनृपः शक्रप्रदत्तस्फुर-
न्माणिक्याभरणैकभासुरतनुः श्रीजायचन्द्रिः पुनः॥१२४॥

दु० व्या०—विश्वेऽपि—सर्वेऽपि। जायचन्द्रिः—विजयचन्द्रः ॥१२४॥

इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिविरचितं
माणिक्याङ्के श्रीश्रीधरचरित्रे षष्ठसर्गस्य
दुर्गपदव्याख्या समाप्ता ॥

इति श्रीअञ्चलगच्छे[1] आचार्यश्रीमाणिक्यसुन्दरसूरि[2]-
विरचिते माणिक्याङ्के श्रीश्रीधरचरित्रे श्रीछन्दोमुख्य-
लक्ष्यसुलोचनाष्टपद-सूर्योदय-नगरस्वयं-
वरवर्णनो नाम षष्ठः सर्गः॥
ग्रन्थाग्रम्॥ १८६ ॥ अ० १२ ॥

१ °च्छे आचार्यश्री° A । २ °रवि °B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## सप्तमः सर्गः ।

अथ स्वागताछन्दः—

लीलया भवति मङ्गलगाने, वर्णिनीभिरथ साऽस्नपि कन्या ।
उन्नतस्तनजितप्रणताऽस्यं, स्वर्णकुम्भसलिलैर्विधिपूर्वम् ॥ १ ॥

दु० व्या०—आस्यं-मुखम् ॥ १ ॥

सन्नितम्बगुरुगोत्रधरित्रीं, तां निरीक्ष्य मुदितैरिव मन्ये ।
मञ्जुला मुमुचिरे कलशैस्तैः, सन्नतैर्जलधरैर्जलधाराः ॥ २ ॥

दु० व्या०—सत्—प्रधानं नितम्बमेव गुरुगोत्रं—पर्वतं धरतीति जलधरैः, पक्षे मेघैः, "गिरौ वर्षन्ति माधवाः" इत्युक्तेः ॥ २ ॥

काम्यकाञ्चनरुचिः शुचिवासश्चान्तवारिपृषतेयमभासीत् ।
अस्ततारकगणेव गभस्तिप्रोज्ज्वलद्युतिरहर्मुखवेला ॥ ३ ॥

दु० व्या०—पृषत्—जलकणः ॥ ३ ॥

विश्वयौवतविभूषणचूलारत्नमाश्रितसितांशुदुकूला ।
क्षीरनीरधितरङ्गसरङ्गश्रीरिव श्रियमियं श्रयते स्म ॥ ४ ॥

दु० व्या०—यौवतं—युवतीसमूहः ॥ ४ ॥

चन्द्रचन्दनमिलन्मृगनाभी, पङ्कपङ्किलतनुः किल कन्या ।
क्वापि कुङ्कुमचिता च विरेजे, द्यौरिवेन्दुतिमिरार्कविभाभृत् ॥५॥

दु० व्या०—चन्द्रः—कर्पूरः ॥ ५ ॥

---

१ °उन्नकूचविजयप्र° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नजित्वररुचेः किमु रत्नैः, काञ्चनेन किमु काञ्चनगौर्याः ।
सावहेलमिति हेममगीभिर्भूषितालिभिरसावखिलाङ्गम् ॥ ६ ॥

दु० व्या०—असौ अखिलाङ्गं—सर्वाङ्गम् ॥ ६ ॥

शेखरः शिरसि रत्नमयोऽस्याः, कामकेलिशिखरीव दिदीपे ।
अन्यथा तमवलोक्य वयस्याः, प्रीतिमन्मथरतीः कथमापुः ? ॥७॥
चित्रितस्तिलककुण्डलभानुद्योतितोपरि तदाननलक्ष्मीः ।
केन नैक्ष्यत पुनः स्तनशैलोत्तारिहारजलभृज्जलधारा ॥ ८ ॥

दु० व्या०—उपरि—विभागे ॥ ८ ॥

ऊर्मिकानिकरकङ्कणकाम्या, पादपद्मकलहंसकरम्या ।
अप्सरोभिरुचितं तुलिता सा, गूढमन्मथजलेभविलासा ॥ ९ ॥

दु० व्या०—ऊर्मिका—मुद्रिका, पक्षे कल्लोलः । कङ्कणपक्षे जलकणः । हंसकः—नूपुरः । अप्सरोभिः पक्षे जलसत्कसरोभिः ॥ ९ ॥

नृत्यति स्म मुदितः स्मरवीरस्तन्नितम्बनवरङ्गधरायाम् ।
तत्र यद् व्यलसदुज्ज्वलकाञ्चीकिङ्किणीकपटघर्घरघोषः ॥१०॥
सैवमाभरणभूषितगात्री, लोकलोचनसुधारसपात्री ।
याप्ययानमधिरुह्य बभासे, देवतावरविमानगतेव ॥ ११ ॥

दु० व्या०—याप्ययानं—नरविमानम् ॥ ११ ॥

यां विलोक्य हृदि काममहेला, दध्युषीत्यहह ! का मम हेला ।
श्रीमदं वहतु तामभिरामा, का तवस्त्रिभुवनेऽप्यभिरामा ॥१२॥

दु० व्या०—काममहेला—कामस्त्री इति दध्युषी—चिन्तयामास स महेला का तां अभि का रामा—स्त्री ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ रथोद्धताछन्दः—

वेणिनीविहितसर्वमङ्गला, रूपतो विजितसर्वमङ्गला।
मौलिविस्फुरितबर्हिणच्छदछत्रपार्श्वचलचामराञ्चला ॥ १३ ॥

दु० व्या०—सर्वमङ्गला—पार्वती ॥ १३ ॥

विश्वविश्वजनचित्तहारिणी, सा स्वयंवरणमालभारिणी।
व्योमपूर्यरवतूर्यडम्बरा, प्राप मण्डपमुखं पतिंवरा ॥ १४ ॥ युग्मम् ॥

अथ शालिनीछन्दः—

रोमोद्धर्षव्याजतो लग्नबाणा, लक्ष्यीभूता भूमिपालाः स्मरस्य।
सन्धानार्थं तेन हृन्नेत्रदूतान्, कन्यायां तद्राजधान्यां प्रजिघ्युः ॥१५॥

दु० व्या०—रोमोद्धर्षः—रोमाञ्चः। तेन स्मरेण सह संधिहेतवे प्रजिघ्युः—प्रेषयामासुः ॥ १५ ॥

अन्तर्भूपश्रेणियुग्मं गतायां, बाह्यालीवद् वल्गु वल्गन्तमस्याम्।
नेत्रं धृत्वाऽपत्रपा वल्गयाऽश्वं, चेष्टां चक्रुः नव्यनव्यां नरेन्द्राः ॥१६॥

दु० व्या०—अपत्रपा—लज्जा। नेत्रमेवाश्वम् ॥ १६ ॥

जगत्यां वंशस्थछन्दः—

धरापतिः कोऽपि हृदि स्मरातुरः, स्मरन्निमां सात्त्विकधर्मसङ्कुलः।
अहो! महोष्मेति वदन्नचीचलत्, करेण केलिव्यजनं मुहुर्मुहुः ॥१७॥

कनीमनीहां मयि सस्पृहेऽत्र मा, विधा विधातुर्नियतं न चेदसौ।
शिरोविभेदाय तवेति चिन्तयोदलालयत् कश्चन रत्नकन्दुकम् ॥१८॥

दु० व्या०—अनीहां—अनिच्छाम्। मा विधाः—मा कार्षीः। असौ रत्नकन्दुकः ॥ १८ ॥

---

१ °वर्णिनी° B।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाभुजः कश्चन बाहुसंस्थितं, करेण रत्नाङ्गदमास्पृशन्मुहुः ।
ययाच तां तत्पितरं परीष्टिभिः, परिष्ठरत्नाङ्गदनामधारिणम् ॥१९॥

दु० व्या०–तां–कन्याम् । 'याच्' धातुर्द्विकर्मकः । परीष्टिभिः–सेवाभिः ॥ १९ ॥

अथेन्दुवंशाछन्दः—

पाणौ कृपाणीनरिनर्त्तनच्छलात्,
कश्चिद् विधिं भर्त्सयति स्म वर्यधीः ।
एतां निरीक्ष्यान्तकजिह्वया निभां,
छिन्द्यान्ममाशालतिकामकालतः ॥ २० ॥

दु० व्या०–नरिनर्त्तनं–अत्यर्थं नर्त्तनम् ॥ २० ॥

ज्योतिर्मये कश्चन रत्नकुण्डले, जाज्वल्यमाने ज्वलनस्य कुण्डवत् ।
हस्तं क्षिपन्नात्मनि रागनिर्णयं, दिव्येन कन्या हृदि संन्यवीविशत् ।

अथ सङ्करः—

रम्भाच्छदस्य व्यजनं दधिः करे, मुहुर्मुहुस्तस्य विलोलनच्छलात् ।
रम्भाऽपि रूपस्य तुलां न याति ते, कनीमदः कोऽपि सगौरवं जगौ ॥

दु० व्या०–कनीम्, अदः ॥ २२ ॥

अथ द्रुतविलम्बितम्—

अथ घनस्वरघस्मरकस्मरध्वजरवं विनिवार्य यशोधरा ।
क्षितिधरान्वयवृत्तविदाऽलपन्नृपसुतां प्रति वेत्रलताधरा ॥२३॥

दु० व्या०–घनः–मेघः । घस्मरकः–भक्षकः । स्मरध्वजरवं–वाद्यम् । वृत्तवित्–चरित्रवित् ॥ २३ ॥

---

१ °धिं ता जयति° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयि ! विलोकय कोकनदानने !, घुसृणरागभरेण नरेश्वराः ।
तव गुणैरमलैर्नवमालती परिमलैरलिवत् किल संगताः ॥२४॥

दु० व्या०—घुसृणरागभरेण—कुङ्कुमरागभरेण । कोकनदानने—रक्तोत्पलसदृशमुखि ! ॥ २४ ॥

अधिपतिर्मगधेषु पुरन्दरेत्यभिधया पुरतः परिभाव्यताम् ।
रसितयद्गुणसज्जनहीलितो, न वसुधातलमेति सुधारसः ॥२५॥

दु० व्या०—रसितः—आस्वादितः ॥ २५ ॥

सुतनु यस्य रणाङ्गणसंचरत्तरलतुङ्गतुरङ्गखुरोद्धते ।
रजसि याति दिवि[1] प्रविभाव्यते, न रजनी न दिवा न दिवाकरः ॥

दु० व्या०—[ 'प्रविभाव्यते—ज्ञायते ' A आदर्शे टिप्पणी ] ॥२६॥

भज भुवःपतिसंहतिरोहिणीवरममुं प्रणयादिव रोहिणी ।
वितरणाय धृतेः सुररोहिणी, भव सुमास्त्रशरव्रणरोहिणी ॥२७॥

दु० व्या०—रोहिणीवरं-चन्द्रम्, रोहिणी इव । धृतेः—समाधेः सुररोहिणी—कामधेनुः [ 'सुमास्त्रः—स्मरः' A आदर्शे टिप्पणी ] व्रणरोहिणी—औषधिः भव ॥ २७ ॥

नयनभङ्गिभिरेव तयेरिता, तमपहाय नृपं पुरतस्ततः ।
क्षितिपमाप्य महेन्द्रमुवाच सा, प्रति नरेन्द्रसुतां प्रतिहारिका ॥२८॥
इह बभूव पुरा वृषभप्रभुस्तनुरुहोऽस्य विदर्भ इति श्रुतः ।
जयति सैष महेन्द्रमहीपतिः, सुनयने च तदन्वयचन्द्रमाः ॥ २९ ॥

दु० व्या०—सैष इति व्याकरणविशेषः ॥ २९ ॥

---

1 °वि प्रतिभा° R ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयमरातिनरेन्द्रयशोऽम्बुधिं, लघु निपीय रणाङ्गणतृष्णया ।
विरचयन् विरसं चिरदुर्यशोमयमिहाभिनवः कलशोद्भवः ॥३०॥

दु० व्या०–दुर्यशोमयम् । [ 'कलशोद्भवः–वडवानलः' A आदर्शे टिप्पणी ] ॥३०॥

भज भुजद्वयवत् कुसुमस्रजं, परिनिवेश्य गलेऽमुमिलाभुजम् ।
यदि जिनेन्द्रनिकेतनमण्डितं, नगरकुण्डिनमीक्षितुमिच्छसि ॥३१॥
त्वमवधेहि जिनेन्द्रनमस्क्रियामहमिहापि कृताञ्जलिरस्मि ते ।
इति परस्परहास्यपरे जने, नृपकनी तमवाजगणन्नृपम् ॥ ३२ ॥+

दु० व्या०–अवाजगणत्–अवगणयति स्म ॥ ३२ ॥

इदमनन्तरमुत्तरकोशलाधिपमनन्तमनुत्तरकौशला ।
नृपतिमुद्दिशती नवसूत्रवत्, पुनरिमां प्रति वेत्रधरा जगौ ॥३३॥

दु० व्या०–अस्मादनु ॥ ३३ ॥

अयमनन्त इति क्षितिमण्डले, क्षितिपतिः प्रथितः क्षितिपेषु यः ।
अधिकमुद्वहति प्रतिभाप्रभाभरमहो ! भरतान्वयभूषणः ॥ ३४ ॥

दु० व्या०–इदमनन्तरम् ॥ ३४ ॥

कथमहिर्न भयाय यदि द्विषो, दशति कोशबिलान्तरनिर्गतः ।
अपि तदुज्ज्वलकीर्तिपयः पिबत्यसितयत्करवालभुजङ्गमः ॥३५॥

दु० व्या०–असितः–कृष्णः ॥ ३५ ॥

अभिरतिर्यदि ते सरयूजलप्लवनशाड्वलकाननकेलिषु ।
क्षितिपतेस्तदमुष्य भव प्रिया, मुररिपोरिव गौरि ! हरिप्रिया ॥३६॥

दु० व्या०–अभिरतिः–इच्छा । प्लवनं–तरणम् । [ 'मुररिपुः, हरिप्रिया–लक्ष्मीः' A आदर्शगतटिप्पणी ] ॥३६॥

---

+ A आदर्शे 'त्वमवधेहि' इति ३२ श्लोकानन्तरं 'अयममनन्त°' इति श्लोक उपन्यस्तः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



छलपराञ्चि विलोकनलीलया, तमपि वर्जितमेव तया रयात् ।
समवलोक्य गता क्षितिपान्तरं, पुनरवोचत सा नृपनन्दिनीम् ॥३७॥

दु० व्या०—पराञ्चि—पराङ्मुखम् । [ 'पराञ्चि—परप्रतिगमनशीला' Aआदर्शगतटिप्पणी ] ॥ ३७ ॥

अथ मौक्तिकदामछन्दः—

विलोकय लोकविभाकरतुल्यमितो हरिभूपमनन्यजभल्लि ! ।
विभाति हतारितमिस्रविलासमयं कृतकासि सरोजविकाशः ॥३८॥

दु० व्या०—हे अनन्यज—कामभल्लि । हतारितमिस्रविलासं यथा भवति ॥ ३८ ॥

करालकृपाणधरे रणरङ्गविलासकरेऽजनि यत्र कुरङ्गः ।
द्विधाऽपि चलाचलदृष्टितरङ्गभरं रिपुरुज्झितहस्तितुरङ्गः ॥ ३९ ॥

दु० व्या०—पक्षे कुत्सितरङ्गः । चलाचलदृष्टितरङ्गभरं यथा भवति । उज्झितः ॥ ३९ ॥

अथ तोटकं छन्दः—

नवयौवनकाननकेलिकरं, करपल्लवनिर्जितपद्मवरम् ।
वररत्नममुं वृणु सर्वकलं, कलय त्वमतस्तरुणत्वफलम् ॥४०॥

दु० व्या०—सर्वाः कला यस्य तम् । अतो राज्ञः ॥ ४० ॥

न विलोकयति स्म कनी तमलं, नलिनीव कलाधरमप्यमलम् ।
अधिगत्य ततोऽन्यनृपं चतुरा, पुनरेवमवोचत वेत्रधरा ॥४१॥

दु० व्या०—तम् अलम् ॥ ४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ भुजङ्गप्रयातम्—

अमुं पश्य पद्माक्षि ! पद्मं नृपालं, यथार्थाभिधं सद्गुणश्रीविशालम् ।
परं कण्टकोच्छेदनः खड्गदण्डः, करेऽस्योच्चकैस्तन्मृणालप्रचण्डः ॥

दु० व्या०—तन्मृणालं—कमलनालम् ॥ ४२ ॥

अथ स्रग्विणीछन्दः—

किन्नरीवृन्दगान्धर्वगीर्बन्धुरे, नित्यपर्यन्यतूर्यारवाडम्बरे ।
केकिनृत्यं यदि प्रेक्षितुं रैवते, चित्रमेतं भज द्वारकेशं ततः ॥४३॥

दु० व्या०—साऽपि प्रतिहारी, द्वारकेशम् ॥ ४३ ॥

अथ वैश्वदेवीछन्दः—

स्मित्वा हित्वाऽमुं भूपतिं भूपकन्या, प्रातीहार्यस्थां प्रेरयामास विज्ञा ।
मेने साऽप्यस्मै स्वप्रयुक्तापशब्दं, क्ष्मापानुद्दिश्य स्माह सप्ताग्रतश्च ॥

दु० व्या०—अपशब्दम् ॥ ४४ ॥

अथ तामरसं छन्दः—

अमलकलाधरकान्तिकलापं, कलय केलिङ्गमलिङ्गितपापम् ।
विमृश मृगेन्द्रकृशोदरि ! दूरीभवति यतो न हि दृष्टिचकोरी ॥४५॥

दु० व्या०—अलिङ्गितं—अप्रकटितम् ॥ ४५ ॥

अथ चन्द्रवर्त्म छन्दः—

यस्य कीर्तिघनसारपरिमलैर्वासनैस्त्रिभुवनस्य घनतरैः ।
वासितो हि घनसारसमुदयः, प्रायशो भजति भूरिचपलताम् ॥४६॥

१ °द्वं रोचते ° R । २ °य किलेमम ° ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ सुदत्तं छन्दः—

समरे यशोबीजमिवोप्तमर्त्ता, हलवत् खुरैः क्षुण्णमहीतलेऽमुना ।
वियति स्फुरत्तारकमण्डलच्छलान्मदवारिसिक्तं करिभिः फलग्रहि ४७॥

दु० व्या०—[ टिप्पणी—अमुना—राज्ञा, समरे बीजमिव उप्तं—आरोपितम्, यशः फलेग्रहि, शृङ्गारो भूषणम्, पक्षे सिन्दूरहस्तिनी, पक्षे स्त्रीविशेषः A आदर्शगतटिप्पणी । ] ॥ ४७ ॥

अथ शर्कयां जातौ वसन्ततिलकाछन्दः—

कस्तूरिकामदचितस्तनकुम्भशृङ्गा, शृङ्गारभूषणविभूषितदेहदेशा ।
रेवाजले वहसि पद्मिनि! हस्तिनीत्वं, चेन्मालवाधिपममुं तमुरीकरोषि ॥

अथ प्रहरणकलिकाछन्दः—

अमलकमलकोमलवरवदनं, स्फुरदुरुरुचिनिर्जिततरमदनम् ।
गजपुरपतिमुन्नतगुणसदनं, भज भज गजगामिनि! नृपमदनम् ॥४९॥

अथातिशर्कयां जातौ मणिगुणनिकरं छन्दः—

जय जय जिनवर मधुकर! मधुरक्वण! नरसुरगणनुतगुणनिकर! ।
स्मररिपुभय! वह भविजनशरणक्रमसरसिजभवजलनिधितरण !॥५०॥

अथ मालिनीछन्दः—

इति जिननुतिभक्तिव्यक्तकासारकेली-
करणकलमरालं वैरिवंशे करालम् ।
नृपममुमथवाऽलं नामतः कीर्तिपालं,
भज शशिदलभालं देशकाम्बोजपालम् ॥ ५१ ॥ युग्मम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ मृदङ्गछन्दः—

आनन्दयत्वथ मनस्तव सैष मैथिल-
श्चन्द्रानने ! कमलचन्द्र इति क्षितीश्वरः ।
यत्कीर्तिहंसपटलीभुवनं वतंसय-
त्युल्लासिसज्जनसरोरुहसंश्रयोद्यता ॥ ५२ ॥

अथ कामक्रीडाछन्दः—

तारं तारुण्यं लक्ष्मीलीलालावण्यं सौन्दर्यं,
सर्वाङ्गे धैर्यं वर्यं यस्मिन् भूयः स्याच्चातुर्यम् ।
एतेष्वेकं तं कञ्चिद् भूपं रागेण त्वं पश्या-
वश्यं वाक्यं चित्ते न प्रीतिं चक्रे नैतत् तस्याः ॥५३॥

अथ प्रियंवदाछन्दः—

अमुमितः कृप नृपं हि भोगिनं, मलयशैलतटनीवृतं प्रभुम्[1] ।
भज वरं भव चिरं च भोगिनी, बहुचन्दनरसादिसादरम्[2] ॥ ५४ ॥

दु० व्या०—भोगिनम्, पक्षे सर्पम् [ नीवृतं—देशम् A आदर्शे टिप्पणी ] ॥ ५४ ॥

अथ प्रमिताक्षराछन्दः—

शशिनो हरेश्च कमलात् कमलाऽपसृता विलासमिह यत् तनुते ।
कमलाविलास इति योऽवितथं, बिरुदं बिभर्ति बहुराज्यबलः ॥५५॥

दु० व्या०—अपसृता—दूरीकृतता ॥ ५५ ॥

अथ जलधरमालाछन्दः—

दूरादेतत् करकरवालं कालं, नव्यप्रेङ्खज्जलधरमालोत्तालम् ।
दृष्ट्वा शङ्कागलितरिरंसैः कष्टं, मुक्तं नष्टं रिपुजनहंसैः स्पष्टम् ॥५६॥

---

१ °वृतं प्रभुम् R A । २ °सादराम् B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ मणिमालाछन्दः—

तं भूपतिकोटीकोटीरमिलाख्यं, दक्षं जनतानां नव्यं सुरवृक्षम् ।
स्वर्गाधिपतुल्यं कश्मीरधरित्र्यां, लब्ध्वा भज हेलां शच्याः शुचिवंशे॥

अथातिजगत्यां प्रहर्षिणीछन्दः—

उद्दामद्युतिभरमण्डलाग्रजाग्रद्वीरश्रीविहितकटाक्षलक्षिताङ्गः ।
क्ष्मापालः क्षितिपतिमण्डलीषु, मान्योऽसामान्यो जयति पुरस्तव प्रतापः

अथ नन्दिनीछन्दः—

जनकस्य जन्यमयतेऽनुरूपतामिति सत्यमस्य यदरिप्रघातिनः ।
शशभृत्छलेन यशसा निहन्यते, रिपुदुर्यशोऽपि तिमिरस्य मूर्तिभाक् ॥

दु० व्या०—जन्यं पुत्रादि । अयते—याति ॥ ५९ ॥

अथ रुचिराछन्दः—

वदन्ति केऽप्यहह! पितामहं गतां, समाश्रितां सलिलनिधिं च केचन ।
सरस्वतीं वयमिह सुन्दरे, पुनर्लभामहे सुललितकण्ठसङ्गताम् ॥६०॥

अष्टौ जातौ—वाणिनीछन्दः—

करुयति नोज्ज्वलाङ्गमपि राजमण्डलं किं,
धृतिरतिरद्भुतद्युतिभरेऽत्र पद्मिनी ते ।
इति चतुरोक्तिमालिमभिलापिनीमनैषुः,
सपदि कनीं नरेन्द्रविजयं विमानवाहाः ॥ ६१ ॥

दु० व्या०—भुवनम्, पक्षे जलम्, जलमध्यस्थत्वात् कमलम्, राजमण्डलम्, पक्षे चन्द्रमण्डलम् । अत्र वीक्ष्यमाणे इने—सूर्ये, स्वामिनि वा सा विजयचन्द्रं दृष्ट्वा निजं भावं प्रतीहार्यै प्रोचे इति भावः ॥ ६१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्यष्टौ जातौ शिखरिणीछन्दः—

त्यजन्ती क्षोणीन्द्रान् रजनिदलकानीव निखिलाँ-
स्तमःपक्षं चक्रे क्षितिपतिचयं श्यामवदनम् ।
ततः सा तन्वङ्गी नृपविजयचन्द्रं सितसमु-
ल्लसत्पक्षं लब्ध्वाऽधिकमिव विरेजे शशिकला ॥ ६२ ॥

दु० व्या०—सित—श्वेतसमुल्लसत्पक्षसदृशं शशिकला इव ॥ ६२ ॥

प्रतिहारीहारीकृतदशनकान्तिः पुनरवक्,
पुराऽभूत् सुत्रामा भुव इव जयन्तः क्षितिपतिः ।
कुलाङ्कूरः शूरः शुभति जयचन्द्रोऽस्य नृपतिः,
पुरस्तज्जन्माऽपि च विजयचन्द्रो विजयते ॥ ६३ ॥

दु० व्या०—भुवः सुत्रामा—इन्द्र इव ॥ ६३ ॥

विधत्तां क्षीरेशं सुहृदमथवा नीलवसनं,
कलाभृत्कान्ताभाः कलयतु भुजङ्गेन्द्रसखिताम् ।
दधाना स्पर्धां यद्विजितरिपुभूमीन्द्रजनिताऽ-
पकीर्तिर्यत्कीर्त्या तदपि ननु सा काकधवला ॥ ६४ ॥

दु० व्या०—यत्कीर्त्या श्वेतपदार्था मित्रीकृताः, अतोऽपकीर्तिरपि यत्कीर्त्या सह स्पर्धा दधाना सती क्षीरेशादिभिः मन्त्रं कुरुतां तदपि सा काकधवला एव एतद् हास्यवचनम्, क्षीरेशं—क्षीरश्च ईशश्च क्षीरेशं द्वन्द्वैकत्वम्, पक्षे क्षीरेशं—समुद्रम्, नीलवसनं—नीलवस्त्रं वा, कलाभृत्कान्तः, चन्द्रपक्षे कलाभृत्कान्ता—रात्रिः, तदाभाः, भुजङ्गेन्द्रः—शेषः, पक्षे महासर्पः ॥६४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ हरिणीछन्दः—

हरिरिव हरेः शृङ्गारेण स्फुरद्द्युतिशालिना,
हरतु हरिणीनेत्रे नेत्रे न कस्य नृपोऽप्यसौ ।
यदयमसमं वामभ्रूणां मनोभवविभ्रमं,
सुतनु ! तनुतेऽनङ्गत्वेनोज्झितोऽपि तदद्भुतम् ॥ ६५ ॥

दु० व्या०—हरेः—इन्द्रस्य तन्नामाङ्कत्वात् तस्य अनङ्गत्वं कृशाङ्गत्वम् ॥

अथ पृथ्वीछन्दः—

अमुं नृपतिमतल्लिकां मदनभल्लि ! भिन्द्धि स्वयं,
स्वयंवरणमालिकान्यसनदम्भतोऽभ्यर्णगा ।
किमेतदथ कौतुकं तव मृगाक्षि ! यल्लीलया,
कटाक्षविशिखैरपि क्षिपसि विष्टपान्यन्यतः ॥ ६६ ॥

दु० व्या०—विशिखैः—बाणैः, अन्यतः क्षिपसि ॥ ६६ ॥

अथ मन्दाक्रान्ताछन्दः—

मौलौ माल्यावलिसुरधुनीस्पर्धयाऽयं महेशं,
सा कालिन्दी कलयति करे चेत् कृपाणच्छलेन ।
तत् तेऽप्यस्मिन् परमहिमवत् भूभृतः संभवायाः,
स्वाङ्कं दत्त्वा सपदि विशदं गौरवं गौरि ! युक्तम् ॥ ६७ ॥

दु० व्या०—महेशं, पक्षे महेश्वरम् । कालिन्दी—यमुना । प्रकृष्टमहिमयुक्तः, पक्षे परमहिमवद्भूभृतः—हिमाचलपर्वतस्य । गौरी, पक्षे पार्वती ॥ ६७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ धृतौ जातौ कुसुमितलताछन्दः—

आक्रामन्नंह्री रिपुकरिशिरःसान्द्रसिन्दूरपूरा–
दूरीचक्रेऽस्यारुणरुचिमिभद्वेषिशौर्यस्य युद्धे ।
कास्मीरालेपैस्तव कुचपरिक्रीडनेऽमुष्य कामं,
पाणिः शोणोऽभूदिदमपि वचः प्रीतये स्तात् कनीनाम् ॥६८

दु० व्या०—अंह्रिः—चरणः, अस्य इभद्वेषी—सिंहः ॥ ६८ ॥

अथ धृतौ जातौ मेघविस्फूर्जिताछन्दः—

तपस्त्वामाराद्धुं कलयति भुवः स्वर्वधूमस्य कीर्ति–
व्रजो मुक्ताहारः श्रितकुचगिरिः शालिरोमालिवन्याम् ।
अथैनं संतुष्टा रमय नयनापाङ्गभङ्गीषु भूपं,
स च त्रैलोक्येऽपि प्रसरतु यथा वामनो वासुदेवः ॥ ६९ ॥

दु० व्या०—भुवः सर्वपृथ्वीसत्कादेव तां अस्य कीर्तिव्रजो मुक्ताहारो मौक्तिकहाररूपः, मुक्तभोजनो वा स च कीर्तिव्रजः ॥ ६९ ॥

अथ शार्दूलविक्रीडितं छन्दः—

इत्येवं प्रतिहारिकानिगदितव्याहारकादम्बिनी–
संसेकोत्पुलकच्छलेन परितः प्रोद्भूतदर्भाङ्कुरा ।
भूयिष्ठं तमरीरमत् प्रसृमरे नेत्रान्तभङ्गीभरे
सानन्दा शरदुज्ज्वलेव सरसी सा राजहंसं तदा ॥७०॥

दु० व्या०—व्याहारः—वचनम्, राजहंसम्, पक्षे, राजश्रेष्ठम् ॥७०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ कृतौ जातौ सुवदनाछन्दः—

तस्मिँल्लावण्यवार्धौ तरणिमिव दृशं तस्या मनसिजो
निर्यामो युक्तमङ्गान्यनयत विविधस्थानानि विबुधः ।
भालभ्रूनेत्रवक्त्रोरसि भुजयुगले विश्रान्ति सदनं,
नाभ्यावर्ते निमग्नाऽपि हि सपदि पुरो येनेयमचलत् ॥ ७१ ॥

दु० व्या०—मनसिजः—कामः निर्यामकः । अङ्गान्येव विविधस्थानानि । विबुधः—देवः । उरः वक्षो वा । 'नी'—धातुर्द्विकर्मकः । भाल-भ्रू-नेत्र-वक्त्रोरसि, अत्र "प्राणितुर्याङ्गाणाम्" इति पदेनैकवचनम् । येन काम-निर्यामकेन । इयं दृग् नौः पुरे अग्रे ॥ ७१ ॥

प्रकृतौ जातौ स्रग्धरा छन्दः—

उत्सार्याथ त्रपां सा चरणक्वणन्नूपुरं संचरिष्णु-
र्लीला व्यालोलहारा ललितगतिचलत्कुण्डलाशिञ्जि भूषा ।
संभिन्ना भूरिभावैस्तुमुलवति जने सम्मदेनोन्मदिष्णौ,
सोत्कण्ठं कण्ठपीठे विजयनरपतेः[1] क्षेप्तुमैहिष्ट मालाम् ॥७२॥

दु० व्या०—शिञ्जिशब्दः । अत्र काव्ये तस्याश्चापल्यं व्यञ्जितुं युक्तिं अग्रे वक्ष्यति । यथा नैषधे—"अथ भीमसुतावलोकनैः" इत्यादि ॥७२॥

अथाकृतौ जातौ भद्रकं छन्दः—

ह्रीधृततन्निरूपणपरिवराननशशी सखीमुखमथो,
स्मेरयति स्म नीरजममुं प्रतीदमपि शीतलं शुचिवचः ।
सारसुधारसं वितरति स्म सस्मितमहो ! महोत्सवभरे,
नश्यति शत्रुता ननु किमेतयोः कुतुकमञ्जयोः स्वजनयोः ॥७३॥

---

१° तेरतां निचिक्षेप मालाम् A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दु० व्या०—ह्रिया धृतं तन्निरूपणं विजयवीक्षणं यया, एवंविधसखीमुखमेव नीरजम् । अमुं कन्यामुखशशिनं प्रति इदं सखीमुखमपि वच एव सुधारसम् । अब्जशब्देन कमलं चन्द्रश्च कथ्यते ॥ ७३ ॥

अथ विकृतौ जातौ अश्वललितच्छन्दः—

नृपतिरयं रयेण ननु ते मनो हरति पश्यतोहर इव,
प्रकटभटान्वये स्वचरणस्रजा लघु बधान तं निगरणे ।
इति घटितत्रपं स्मितरसाञ्चितं नलिनवद् वधूमुखमसौ,
न यदि परं भजेति वचसो रुषाऽजनि कृताञ्जलिहुङ्कृतमपि ॥७४॥

दु० व्या०—निगरणे—गले । यदि असौ राजा, न तदा, परं भज ॥७४॥

अथ संकृतौ जातौ तन्वीछन्दः—

सुभ्रु ! भजस्व क्षितिपतिविजयं गीरिति नीरदततिरिव सख्या,
यां किल चक्रे घनरसकलितां चञ्चललोचनशफरविलासा ।
सस्मितफेना क्षितिधरवरजा संश्रितहंसगमनरुचिरेषा,
यातु नदीनं नृपममुमुचितं चेतसि वीक्षकजन इति दध्यौ ॥७५॥

दु० व्या०—इति सख्या गीः । यां कन्याम् । घनरसः, पक्षे जलम् । क्षितिधरवरजा, पक्षे नदी, एषा कन्या । नदीनं, पक्षे समुद्रम् ॥ ७५ ॥

अथाभिकृतौ जातौ क्रौञ्चपदाछन्दः—

शङ्करमानन्दादिव गौरीं स्मरपरिभवकरशुचिरुचिनिकरं,
वीक्ष्य मराली जैत्रगतिं तां विजयनृपतिमभि सरभसचलिताम् ।
चालितचञ्चत्कुण्डलचक्रं चरणकटकरवततघनविततं,
हारगणो यल्लास्यमकार्षीदुचितमुचितमिति तदकृत रसना ॥७६॥

दु० व्या०—शुचिः, पक्षे अग्निः । हारसम्बन्धी गणः । रसना—मेखला ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथोत्कृतौ जातौ भुजङ्गविजृम्भितं छन्दः—

सा रोमालिस्तम्भे तुङ्गस्तनकलश उरसि भवने निवेश्य यमस्मरत्,
तं ध्यानादध्यक्षीभूतं विजयनृपकुसुमविशिखं समीक्ष्य सुलोचना ।
स्वेदाम्भोभिः क्लृप्तस्नानेव विमलवरतरवरणस्रजा प्रमदाकुला,
चञ्चद्रोमाञ्चा तं च द्राक् समुचितमिदमिति चतुरः शशंस न तां च कः?

दु० व्या०—तुङ्गस्तनकलशे । यं अध्यक्षीभूतं—प्रत्यक्षीभूतम् । कुसुमविशिखं-कामं, आनं च । पूजयति स्म । तां कन्यां को न शशंस ? ॥७७॥

अथ चण्डवृष्टिदण्डकछन्दः—

कुलममलमिदं धरामण्डले धन्यमिक्ष्वाकु-
रत्नाङ्गदक्ष्मापतेर्बन्धुरं,
जगति खलु सुलोचना कन्यका साऽपि
धन्या वृतं सुष्ठु इत्युद्गिरन्तो गिरम् ।
हृदि विशदमुदं दधानाः सुराः किन्नरा
वीक्षकास्तत्क्षणं तत्र विद्याधराः,
प्रचुरसुरभिपुष्पवृष्टिं वितेनुस्तदा
भासुरा मौलिदेशे तयोरम्बरात् ॥ ७८ ॥

अथ चण्डकालछन्दः—

जलदरवजैत्रनिर्घोषनिर्दोषविश्वौक-
सन्तोषकृच्चञ्चरङ्गन्मृदङ्गादिवाद्यानि नेदुस्तदा,
कलितवचनैर्बुधा मागधास्ते सुधासन्निभं
सारमाशीर्वचः प्रोच्चरन्ते स्म विस्मेरचित्ता मुदा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रवणसुखकारि वीणास्वनोन्मिश्रगीतं
जगुर्गायना रागरागाङ्गभावाङ्गविज्ञानसत्कोविदाः,
रुचिररुचिपुण्यलावण्यलीलावतीभिः
समन्तादुलूलध्वनिस्तत्र तेने श्रितः श्रेयसां संपदा ॥ ७९ ॥

दु० व्या०—बुधाः—निपुणाः । उलूलः—धवलः ॥ ७९ ॥

समवृत्तप्रकरणम् ॥ अथार्धसमवृत्तादि आख्यानकीछन्दः—

आनन्दयन्नाननकैरवाणि, वरेण्यराजेन्दुनिरीक्षकाणाम् ।
निस्तन्द्रचन्द्रातपवत् प्रसस्त्रिरिति क्षणस्तत्र बभूव भूयान् ॥८०॥

दु० व्या०—निस्तन्द्रः—लक्षणया निर्मलः, चन्द्रतपः—चन्द्रज्योत्स्ना, प्रसस्त्रि—प्रसरणशीलः, क्षणः—उत्सवः ॥ ८० ॥

बालार्पिता साऽथ वरेण्यमाला, रराज कण्ठे विजयक्षितीन्दोः ।
एनं गुणाढ्या गुणिनं श्रितेव, यशोरमा क्षोणिभुजां विजय्य ॥८१॥

दु० व्या०—एनं—विजयम् ॥ ८१ ॥

अथ विपरीताख्यानकीछन्दः—

तडागवन्मण्डपमागतास्ते, सर्वेऽपि जात्याः किल राजहंसाः ।
परं स तत्राजनि शुक्लपक्षः, कादम्बका एव परे नरेन्द्राः ॥ ८२ ॥

दु० व्या०—सः—विजयः । कादम्बाः धूसरपक्षे राजहंसाः ॥ ८२ ॥

अथ पुष्पिताग्राछन्दः—

घनघुसृणवधूविभातवेलास्फुटितशुचिद्युतिमालयाऽनुपक्तः ।
रविरिव विजयस्तदाऽऽबभासे, नृपनिकरैरपि तारकैर्बभूवे ॥ ८३ ॥

दु० व्या०—द्युतिमाला—कान्तिश्रेणिः, पक्षे स्रजः ॥ ८३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथोपचित्रं छन्दः—

विजयं विपुले नृपमण्डले, भूपसुता वृणुते स्म न चित्रम् ।
सुरकोटिषु पुरुषोत्तमं, नो भजते स्म स्यात् कमलाऽपि ॥ ८४ ॥

अथ हरिणप्लुताछन्दः—

अथवा स्वकृतं सुकृतं चिरं, विजयतां रुचिरं निखिलाङ्गिनः ।
व्रियते स्वयमेव स लीलया, कमलयाऽमलयाऽपि धिया यतः ॥८५॥

अथापरवक्त्रं छन्दः—

जिनपतिचरणार्चनं चिरं, मुनिपतिदानमकारि चैतया ।
अथ विपुलतपो विनिर्ममे, यदयमभूद् विजयो वरः परः ॥ ८६ ॥

अथ द्रुतमध्याछन्दः—

प्रीतिभरोज्ज्वलमञ्जुलवक्त्रं, सकलजनोऽपि तदेति बभाषे ।
रत्नमनर्घ्यमनर्वसुवर्णे, मिलितमतीव मुदे नहि कस्य ॥ ८७ ॥
चतुर्भिः कलापकम् ॥

दु० व्या०—अनर्वः—मनोजः ॥ ८७ ॥

अथ विषमवृत्तेषु पदचतुरूर्ध्वं छन्दः—

तदा रत्नाङ्गदो राजा राज्ञी च मदनावली मुदं प्राप्तौ,
किमिदं वा कौतूहलमिद्धश्रीभाग्यसौभाग्यं,
ललिततनु क इह धत्ते सौवापत्यं विलोक्य न प्रीतिम् ॥ ८८ ॥

---

१ विषमवृत्तेषु पदचतुरूर्ध्वं, छन्दसश्चरणाक्षराणि प्रथमपदेऽष्ट ।
द्वितीये द्वादश तृतीये षोडश, चतुर्थे विंशति ज्ञेयानि ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ षट्पदीछन्दः—

अकुण्ठोत्कण्ठमप्यस्याऽऽश्लेषसौख्यं सिषेविषुः,
कण्ठे वरस्रजं न्यस्य वरस्य वलिता वधूः ।
अल्पारम्भा क्षेमकरा इति रीतिमिवास्मरत् ॥ ८९ ॥

दु० व्या०—आश्लेषः ॥ ८९ ॥

अथ विषमाक्षराछन्दः—

लावण्यरसमास्वाद्य, पुनर्वध्वां पुनर्वरेण्ये ।
तृष्णोच्छेदं जनतादृष्टिर्युक्तं नहि प्राप ॥ ९० ॥

दु० व्या०—लावण्यपक्षे लवणम्, वरण्ये वरे ॥ ९० ॥

विलोक्य त्रैलोक्यानुपमवरमाणिक्यमिति तं,
वधूरत्नं चान्तःकरणविषयं वीक्षकजनः ।
किमङ्गी हर्षोऽयं किमियममृतस्नानसरसी–
त्यसीमानं कामप्यलभत सुखायां नयनयोः ॥ ९१ ॥

दु० व्या०—अङ्गी—मूर्तिमान् । अयं नृपः । इयं—वधू । सुखायां—सुखानुभवम् ॥९१॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरि
विरचिते माणिक्याङ्के श्रीश्रीधरचरिते सप्तम-
सर्गस्य स्वोपज्ञदुर्गपदव्याख्या समाप्ता ॥

इति श्रीअञ्चलगच्छे[2] आचार्यश्रीमाणिक्यसुन्दरसूरि[3]-
विरचिते माणिक्याङ्के श्रीश्रीधरचरित्रे स्वागतादि-
समवृत्तार्ध-सम-विषमवृत्तलक्ष्यस्वयंवरवर्णनो
नाम सप्तमः सर्गः ।
आदितो ग्रन्थाग्रम् ६२९ ॥

१ किमानन्दो मूर्तिः कि° A । २° च्छे श्रीमा° B । ३° रवि° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## अष्टमः सर्गः ।

अथ आर्यादीनां प्रस्तारादयः ।

आदितः स्थापयित्वाऽऽर्यां, तद्‌गणानामधो लिखेत् ।
चतुष्कं पञ्चकं षष्ठे, द्विकं त्वेकं गलोरधः ॥ १ ॥
हताश्चतुर्भिः पञ्च स्युर्विंशतिः सा चतुर्हता ।
अशीतिरेवं गणने, या सङ्ख्या सा निगद्यते ॥ २ ॥
अष्टौ कोटय आर्याणां, लक्षा एकोनविंशतिः ।
विंशतिश्च सहस्राणि, छन्दोभेदाः प्रकीर्तिताः ॥ ३ ॥

तथाहि प्रस्तारो लिख्यते—

एषा प्रथमा ऽऽऽ ऽऽऽ ऽऽऽ ऽ। ऽ ऽऽऽ । ऽऽऽ ऽऽऽ ऽऽऽऽ। ऽऽऽ

एषा द्वितीया ऽ । ऽऽऽ ऽऽऽ ऽऽ[1]। ऽ । ऽऽऽ । ऽऽऽ ऽऽऽ ऽऽऽ ऽ। ऽऽऽ

एषा तृतीया ऽ ॥ ऽऽऽ ऽऽऽ ऽऽ । ऽ। ऽऽऽ । ऽऽऽ ऽऽऽ ऽऽऽ ऽ । ऽऽऽ

एषा चतुर्थी ॥ ॥ ऽऽऽ ऽऽऽ ऽऽ । ऽ। ऽऽऽ। ऽऽऽ ऽऽऽ ऽऽऽ ऽ। ऽऽऽ

एषा चतुर्भिर्विकल्पैश्चतस्र आर्या जाताः । अथैभिश्चतुर्भिरेव विकल्पैः सह पृथक् पृथक् पञ्च पञ्च आर्या स्युर्यथा—

एषा पञ्चमी ऽऽऽ । ऽऽऽ ऽऽऽ ऽ । ऽ । ऽऽऽ । ऽऽऽ ऽऽऽ ऽऽऽ ऽऽ ।

एषा षष्ठी ॥ ऽ ॥ ऽऽऽ ऽऽऽ ऽ । ऽ । ऽऽऽ । ऽ ऽऽऽ ऽऽऽ ऽऽऽ

एषा सप्तमी । ऽ ।॥ ऽऽऽ ऽऽऽ ऽ । ऽ । ऽऽऽ । ऽऽऽ ऽऽऽ ऽ । ऽऽऽ

एषा अष्टमी ।॥ ॥। ऽऽऽ ऽऽऽ ऽ । ऽ। ऽऽऽ ऽऽऽ। ऽऽऽ ऽऽऽ ऽ। ऽऽऽ

एवमग्रेतनैस्त्रिभिर्विकल्पैः पृथक् पृथक् चतुःप्राप्त्या आर्या ज्ञेयाः, सर्वमीलने विंशतिः २० । एवमग्रेऽपि प्रस्तरणीयम् । अन्त्यार्या सर्वलघुरिति इत्यार्याप्रस्तारः ।

---

[1] °कं त्रिकं ग° R ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**हृते विकल्पैः पृष्टाङ्के, शेषाङ्केन गणं न्यसेत् ।**
**लब्धं सैकं सति शेषे, नष्टाऽप्यार्यैवमाप्यते ॥ ४ ॥**

अस्यायं भावः—चतुरशीतितम्यार्या कीदृशी इति पृष्टे ८४ अङ्क एव स्थाप्यते, आद्यगणस्य । *चतुर्विकल्पत्वात् चतुर्भिर्भागोऽस्य, ८४ ह्रियते, लब्धं २१ शेषाभावाच्चतुर्लघुरेव लब्धः स पदे लिख्यते ।

अथ द्वितीय गणस्य पञ्च विकल्पत्वात् पञ्चभिः २१ ह्रियते, लब्धं ४, शेषं १ एकेन सर्वगुरुर्लभ्यते, अतः सोऽपि चतुर्लघोरग्रे लिख्यते ॥*

अथ यत्र कश्चिदवशिष्यते तत्र लब्धं सैकमितिवचनाच्चतुष्के एकः १ क्षिप्तो जाताः ५, अस्मिँश्चतुर्भिर्हृते लब्धं १ शेषमपि १ पुनरेककेन सर्वगुरु-लब्धः, सोऽप्यग्रे स्थाप्यः । लब्धं सैकमितिवचनात् पुनरेकमध्ये १ क्षिप्यते, जातं २ अङ्कस्य निष्ठितत्वाद् द्वितीयोऽन्तगुरुर्लिख्यते । अग्रे यथार्हं गुरवः स्थापना च ।।।। ऽऽऽऽ ।। ऽ

अथास्य प्रतीत्यर्थमुद्दिष्टम्—

**गणानुद्दिष्टगाथायाः, संस्थाप्य तदधो लिखेत् ।**
**चतुःपञ्चादिकां संख्यां, स्थानस्थानोचितां ततः ॥ ५ ॥**
**हत्वा हत्वाद्यमन्तेन, चोपरिस्थगणादधः ।**
**पृथग् धृतगणेभ्योऽथ, गणसंख्यां विशोधयेत् ॥ ६ ॥**
**हत्वा धार्योचिता तावद्, यावदाद्याङ्कसंभवः ।**
**तत्संख्यामुद्दिशेद् गाथामुद्दिष्टप्रत्यये बुधः ॥ ७ ॥**

आयार्याः सर्वगुणान् स्थापयित्वाऽधश्चतुष्कपञ्चादिविकल्पान् लिखेत्, यावदन्ते गुरोरध एकस्ततः पाश्चात्यपरिपाट्या एकेन ४ गण्यन्ते ४ एव भवन्ति । तत उपरि दृष्टिविकल्पं स्थापयित्वाऽधस्तनविकल्पांस्त्यजेत् । अत्रेदं

१ * * एतच्चिह्नान्तर्गताः पङ्क्तयः पतिता दृश्यन्ते A आदर्शे ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हृदयम्—यदि सर्वगुरोरधो ४ दृश्यन्ते तदा सर्वगुरोराद्यविकल्पस्यैव सफलत्वात् प्रस्तारानायातं शेषविकल्पत्रयमधःस्थचतुष्टत्वात् त्यजते ।

अथ एक एव स्यात्, यदि कदाचिदुपरि अन्तगुरुः स्यात् तदा विकल्पद्वयस्योपरि भुक्तत्वात् ४ मध्याद् द्वौ त्यज्येते । यद्युपरि आदिगुरुस्तदा ४ मध्यात् १ त्याज्यः, यद्युपरि सर्वलघुस्तदा न किञ्चित् त्याज्यम् । एवं पञ्चकेऽपि भुक्तविकल्पेभ्यो अधो विकल्पास्त्याज्या इति तत्त्वम् । एवमङ्कगणने विकल्पत्यागे मुख्यगणे यथोक्तं लभ्यते । तथाहि—।।।। ऽऽऽऽ ।। ऽऽऽ । ऽ। इत्याद्यैषा आर्या स्थापिता अधो विकल्पा लिखिताः । अन्त्यगुरोरधस्तनेनैकेन चतुष्को गण्यते । तत उपरि आद्यविकल्पं सर्वगुरुमेव दृष्ट्वा ४ मध्यात् ३ त्यक्ताः । तत एकके गण्यमाने यथासंभवं त्रिषु चतुर्षु एकस्मिन् त्यज्यमानेषु तावद् यावच्चतुर्थे ।।ऽ रूपेऽध एक एव १ समेतस्तेन पञ्च गणिताः पञ्च एव ५ । उपरि द्वितीयविकल्पत्वाद् ५ मध्यात् ३ त्यक्ताः, शेषं २ ताभ्यां पूर्वचतुष्के गणिते जातम् ८, अस्य मध्यतः ३ त्यक्ताः जातं पञ्च, तैः पूर्वपञ्चको गणितो जातं २५, अस्य मध्यात् ४ त्यक्ता शेषं २१, तैः पूर्वचतुष्को गणितो जातं ८४, उपरि सर्वलघुत्वादत्र त्याज्यं नास्ति, ८४ एवं एव स्थिता—एषा चतुरशीतितम्यार्या इति वाच्यम् इति आर्याप्रस्तारनष्टोद्दिष्टानि ।

**या वर्णानां भवेत् सङ्ख्या, मात्राभ्यस्तां विशोधयेत् ।**
**शेषान् गुरून् विजानीयाल्लघूनपि गुरून् विना ॥ ८ ॥**

इति गुरु-लघुपरिज्ञानम् ॥

अथाऽऽर्याधिकारान्मात्राप्रस्तारादयोऽपि लिख्यन्ते—

**गुरोरधो लघुं कुर्याद्, यथोपरि तथा पुरः ।**
**ऊने दद्याद् गुरूनेकं, पश्चादेव पुनः कलाम् ॥ ९ ॥**
**एवं सर्वलघुं यावत्, प्रस्तारं कुरुते बुधः ।**
**आद्येऽपि रूपे विषममात्रे स्यात् पृष्ठगा कला ॥ १० ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अस्यायं भावः—एकस्या मात्रायाः प्रस्तारे एक एव लः, द्वयोर्गुरुलघू ऽ— ॥ च तिसृणां लगौ गलौ त्रयो लाः ।ऽ- ऽ।-।।। एवमग्रेऽपि ज्ञेयम्, एतावता गुरोरधो लघुः क्रियते पश्चान्मात्राद्वये वीक्ष्यमाणे गुरुः स्याद् नोचेल्लः। आद्येऽपि विषममात्रे त्रि-पञ्चादिरूपे प्रस्तर्यमाणे कलां पश्चात् कृत्वा प्रस्तर्यते इति प्रस्तारः ।

**एक-द्वि-त्र्यादिकानङ्कान्, मात्रावृद्धौ समा लिखेत् ।**
**अन्त्याङ्कयुग्मसंयोगे, रूपसंख्या भवेत् पुरः ॥ ११ ॥**

अथास्य भावना—१–२–३–५–८ इत्यादि, एकस्या मात्राया एकं रूपं, द्वयोः द्वे रूपे, तिसृणां त्रीणि । कथं ज्ञायते त्रीणि इति ? एकस्य द्विक-त्रिकयोर्मीलने ५ त्रिक-पञ्चकयोर्मीलने ८ स्युः । एवं मात्रावृद्धावन्त्याङ्कद्वय-मीलनेनाग्रेऽग्रे रूपसंख्या ज्ञेया । इति रूपसंख्या ॥

**सङ्ख्याङ्कतस्त्यजेत् पृष्टान्, शेषाङ्के पङ्क्तिगे गुरुः ।**
**गुरोरग्र्यं विना शेषेष्वङ्केषु लघवः पुनः ॥ १२ ॥**
**अपङ्क्तिगेऽत्र शेषेऽङ्के, यथार्हं चाङ्कमीलनम् ।**
**तेषामधो गुरुं कुर्याच्छेषे ला नष्टमुच्यते ॥ १३ ॥**

अस्य भावना—षण्मात्राप्रस्तारे दशमं किंरूपमिति पृष्टे १–२–३–५–८ १३ एतानङ्कान् लिखित्वा सङ्ख्याङ्कतस्त्यजेदितिवचनात्, १३ मध्याद् १० त्यज्यन्ते शेषं ३, तस्य पङ्क्तिगतत्रिकस्याधो गुरुर्लेख्यः ॥ ऽ ॥ गुरोरग्र्यं पञ्चकं मुक्त्वा शेषेष्वङ्केषु लाः स्थाप्याः । दशमं रूपमीदृशमिति ॥ ऽ ॥ वाच्यम् । तथा अपङ्क्तिगे चतुःसप्तादौ शेषे सति पङ्क्तौ यथा-र्हमङ्कान् मीलयेत् । तेषामङ्कानां मध्ये गुरून् कुर्यात्, शेषं पूर्ववत् ॥ यथा यथा नवमं रूपं कीदृगिति पृष्टे, १३ मध्यात् ९ त्यक्ताः शेषं ४, ते च पङ्क्तौ न दृश्यन्ते, अत एकस्य त्रिकस्य मीलने ४ कृत्वा एकस्य त्रिकस्य चाधो गुरुर्लेख्यः । अग्र्यं विना च लघव इति नष्टम् ।

For Private And Personal Use Only

**उद्दिष्टं रूपशीर्षेऽङ्कान्, लिखित्वा तान् गुरुस्थितान्।**
**सङ्ख्याङ्कतस्त्यजेद् ग्राह्यो गुर्वङ्केनाग्रगः पुनः ॥ १४ ॥**

अस्य भावना—उद्दिश्यरूपशीर्षे एक-द्वि-त्र्यादिकान् लिखेत्। अत्र गुरुरायाति तत्र गुर्वङ्केन अग्रगो द्वि-त्र्यादिकोऽङ्को ग्राह्यः। एतावता तमङ्कं मुक्त्वाऽग्रेतनोऽङ्कोऽग्रे लेख्यः। गुरुस्थानङ्कानेकत्र कृत्वा संख्यातस्त्यजेत्। शेषमुद्दिष्टं स्यात् १–२–३–५–८–१३ इदं तृतीयं रूपम्। एवं सर्वत्र ज्ञेयमिति उद्दिष्टम्।

**एक-द्व्यादीन् लिखेदङ्कानेककोपरि चैककम्।**
**एकेन द्विगुणीकृत्य, चैकं न्यसेद् द्विकोपरि ॥ १५ ॥**
**द्विकं द्विकेन पाश्चात्यैकेन युक्तं त्रिकोपरि।**
**अग्रेऽपि त्र्यङ्कसंयोगे, प्रान्त्याङ्काभ्यां गलक्रिया ॥१६॥**

अस्य च भावना—चतुर्मात्राप्रस्तारे पञ्चरूपाणि। तेषु पञ्चस्वपि रूपेषु कियन्तो गाः, कियन्तो ला इति पृष्टे १–२–३–५ इत्याद्याङ्काः स्थाप्याः। एककोपरि एककः स्थाप्यः, एककेन द्विगुणीकृत्य एतावता द्विकं कृत्वा द्विकोपरि स्थाप्यः। द्विको मूर्धस्थेन द्विकेन पाश्चात्येनैकेन च युक्त एतावता पञ्चकं कृत्वा त्रिकोपरि न्यस्यते। अग्रेऽपि त्रिकं मूर्धस्थपञ्चकं पाश्चात्यद्विकं मीलयित्वा एतावता १० कृत्वा पञ्चकोपरि स्थाप्याः। एवमग्र्येऽप्यङ्कत्रयसंयोगेनाङ्कशीर्षेऽङ्कस्थापना ज्ञेया। प्रान्त्याङ्कशिरःस्थाभ्यामङ्काभ्यां गलक्रिया स्यात्। एकमात्राप्रस्तारे $\substack{१\\१}$ एको लः, द्विमात्राप्रस्तारे $\substack{१\ २\\१\ २}$ एको गः, द्वौ लौ, तिसृणां प्रस्तारे $\substack{१\ ३\ ५\\१\ ३\ ५}$ द्वौ गौ, पञ्च लाः। चतसृणां मात्राणां प्रस्तारे $\substack{१\\१}\ \substack{२\\२}\ \substack{५\\३}\ \substack{१०\\५}$ पञ्च गा दश लाः। एवमग्रेऽपि ज्ञेयम् ॥ इति गुरुलघुक्रिया ॥

अथ समवृत्तप्रस्तारादयः—

**वर्णसङ्ख्योऽर्धपङ्क्तिस्थान्, द्विगुणद्विगुणान् लिखेत्।**
**एकान्तरान् गलानेष प्रस्तारः समवृत्तगः ॥ १७ ॥**

Shri Mahavir Jain Aradhana Kendra　www.kobatirth.org　Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—वर्णसङ्ख्यया ऊर्ध्वपङ्क्त्या द्विगुणद्विगुणान् गुरुलघून् लिखेत् । एवं समवृत्तप्रस्तारः स्यात्, यथा एकाक्षरप्रस्तारो ऽ। द्व्यक्षरे ऽऽ—।ऽ—ऽ।—।। त्र्यक्षरे ऽऽऽ—।ऽऽ—ऽ।ऽ—।।ऽ—ऽऽ।—।ऽ।—ऽ।।—।।। एवमग्रेऽपि ज्ञेयमिति प्रस्तारः ।

**नष्टस्य या भवेत् सङ्ख्या, तदर्धेऽर्धे समे लघुः ।**
**विषमे त्वेकमाधाय, तदर्धेऽर्धे गुरुं लिखेत् ॥ १८ ॥**

स्पष्टं यथा चतुर्दशं किंरूपं पञ्चाक्षर-जाताविति पृष्टे १४ इत्यस्यार्द्धे सप्त ७ लब्धे लः, अत्रैकं क्षिप्त्वा ८ कृत्वा अर्धे कृते लब्धो गः ४, अर्धे लब्धोऽलमलम्, अर्धे लब्धो लः, अत्रैकं क्षिप्त्वा ३ कृत्वा अर्धे लब्धो गः ।ऽ।।ऽ इदं रूपमिति वाच्यम् । एवमन्यत्रापीति नष्टम् । अन्त्यलाऽधो द्विकं न्यस्य पश्चाद् द्विद्विगुणं लिखेद् गुरौ त्वेकोज्झनादाद्याङ्केनोद्दिष्टं निगद्यते, यथा—।ऽ।।ऽ इदं चतुर्दशं रूपमिति वाच्यम् । एवं सर्वत्रेत्युद्दिष्टम् ॥

१४७४२

**ऊर्ध्वश्रेणिस्थितान् सैकान्, वृत्तवर्णसमैककान् ।**
**उदूर्ध्वमूदूर्ध्वं क्षिपेदन्त्यं, मुक्त्वा सैषा गलक्रिया ॥ १९ ॥**

व्याख्या—ऊर्ध्वश्रेणिस्थितान् वृत्तवर्णसमान् एककान्—एक-सहितान् संस्थाप्य, ऊर्ध्वमूर्ध्वं क्षिपेत्, अन्त्यवर्णस्त्याज्यः, एषा गलक्रिया स्यात् । तथाहि—चतुरक्षरजातौ कियन्ति गुरुलघुरूपाणि इति पृष्टे, चत्वार एककाः सैकाः ११११ स्थाप्याः ताँश्चोर्ध्वमूर्ध्वमन्त्यं मुक्त्वा पुनः पुनः क्षिपेत्, यथा—१—४—३—२—१ पुनः क्षेपे १—४—६—३—१ पुनः क्षेपे अन्त्यत्यागे १—४—६—४—१ एतावताऽऽद्यं रूपं सर्वगुरु चत्वारि रूपाणि त्रिगुरूणि षड्रूपाणि द्विगुरूणि चत्वार्येकगुरूणि एकं सर्वलघु ॥ इति गुरुलघुक्रिया ॥

**गलक्रियाङ्कैः सङ्ख्या स्यान्मिश्रैः सा द्विगुणीकृता ।**
**एकोनाध्वाङ्गुलव्यापी, स्वधस्तादङ्गुलान्तरः ॥ २० ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्या—प्रागुक्तैर्गलक्रियाङ्कैर्मीलितैः सद्भिः सङ्ख्या स्यात्, यथा—एषां मीलने १६ चतुरक्षरजातौ १६ षोडशरूपाणि भवन्तीति वाच्यम्। सङ्ख्या द्विगुणीकृता चैकोनाध्वा स्यात्, स चाङ्गुलव्यापी, अधस्तादङ्गुलान्तरः। एतावतैकत्रिंशदङ्गुलायां भुवि चतुरक्षरजातिः प्रस्तर्यते। एकमङ्गुलं वर्णेनावष्टभ्यते। एकं चान्तरालमित्यध्वमानमित्यध्वा आर्यावद् गीतिः प्रस्तार्यते। तस्याश्च प्रथमदले द्वादशसहस्राणि अष्टौ शतानि १२८००॥ द्वितीयदलेऽपि तावन्त्यन्योऽन्यतानायां षोडशकोट्योऽष्टत्रिंशल्लक्षाणि चत्वारिंशत्सहस्राणि रूपाणि, १६३८४०००० प्रस्तारः सर्वत्र पूर्ववज्ज्ञेयः। उपगीतिप्रस्तारे पूर्वार्धे चतुःषष्टिशतानि रूपाणि ६४०० अपरार्धेऽपि तावन्त्यन्योऽन्यतानायां चतस्रः कोट्यः नवलक्षाः षष्टिसहस्राणि ४०९६०००० उद्गीत्यार्यागीत्यो रूपाणि आर्यावज्ज्ञेयानि ८१९२०००० ॥

**अथ वैतालीयादयः**—षण्मात्राप्रस्तारे त्रयोदशरूपाणि स्युरेतेषु पराश्रितकलारूपाणि त्यक्त्वा शेषाणि ८ रूपाणि वैतालीयविषमपादे ज्ञेयानि, तथाऽष्टमात्राप्रस्तारे रूपाणि चतुस्त्रिंशत् स्युः। तेषु पराश्रितकलानां निरन्तरं षट्कलानां च रूपाणि त्यक्त्वा शेषाणि त्रयोदशरूपाणि वैतालीयसमपादे स्युः। ततोऽष्टभिः त्रयोदशानां ताडने जातम् १०४। एते वैतालीयपूर्वार्द्धे भेदा भवन्ति। परार्धेऽपि तावन्त एव १०४। परस्परं गणने जातानि दश सहस्राणि अष्टौ शतानि षोडशाधिकानि १०८१६। औपच्छन्दसिकेऽपीयन्त एव १०८१६ भेदाः। श्लोकस्य प्रथमे पादे आद्यो गुरुर्लघुर्वा, अतो द्वौ विकल्पौ २, ततः षड्गणाः ६, ततोऽपि षड्गणाः २, अन्ते गुरुर्लो वा २, एषामन्योऽन्याभ्यासे जातं चतुश्चत्वारिंशदधिकं शतं १४४। द्वितीये पादे आद्यो गुरुर्लो वा, अतो द्वौ विकल्पौ, ततः पञ्च गणाः ५, ततोऽपि एको गणः, ततोऽन्ते गुरुर्लो वा प्रागुक्तस्य चतुश्चत्वारिंशदधिकशतस्य द्विकगणने ज्ञातं द्वे शते अष्टाशीत्यधिके २८८। पुनरस्य पञ्चगणने जातं चतुर्दशशतानि चत्वारिंशदधिकानि १४४०। पुनरस्य एकगणने तदेव स्यात्। पुनरस्य द्विकगणने

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जातं अष्टाविंशतिशतान्यशीत्यधिकानि २८८० । एवं द्वितीयेऽप्यर्धे २८८०, अन्योऽन्याभासे जातं द्व्यशीतिलक्षाणि चतुर्नवतिसहस्राणि चत्वारि शतानि ८२९४४०० इति श्लोकभेदानां सङ्ख्या, एवमन्यत्रापि स्वबुद्ध्या सङ्ख्या ज्ञेया ।

**अथोक्तात्युक्तादिजातीनां रूपसंख्या लिख्यते—२–४–८-१६-३२-६४–१२८–२५६–५१२–१०२४–२०४८-४०९६–८१९२–१६३८४–३२७६८–६५५३६-१३१०७२-२६२१४४–५२४२८८–१०४८५७६–२०९७१५२–४१९४३०४–८३८८६०८–१६७७७२१६–३३५५४४३२–६७१०८८६४ ॥**

**इत्येवं लक्षणं प्रोक्तं, छन्दसामखिलं मया ।**
**केवलैव कथा ज्ञेयाऽग्रतोऽद्भुतरसास्पदम् ॥ २१ ॥**

**इति प्रस्तारः ॥**

अथार्याप्रस्तारादिकं सुगमम् । द्विगुरुः, स च भाल्लौ च इति रीत्या प्रस्तार्यते । श्लोकप्रस्तारे या सङ्ख्या सा उपलक्षणं मात्रम्, यतो गणधर-पादान्ते व्रतमग्रहीद्, इति श्रीहेमसूरिकृतिदर्शनात् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमान् पार्श्वप्रभुर्जीयाज्जगत्प्रद्योतनो नवः ।
यस्य स्मरणतोऽप्याशु, प्रणश्यन्ति तमोव्रजाः ॥ १ ॥
अथ संक्षेपतो वक्ष्ये, कथामाप्तप्रथामपि ।
सुराणां गुरुरप्यस्या नान्यथा पारमाप्नुयात् ॥ २ ॥
तदा स्वयंवरे तस्मिन्नानन्दे स्वजनान् श्रिते ।
निरानन्दतया श्लिष्टाः, स्पर्धयेव नरेश्वराः ॥ ३ ॥
वृत्ते स्वयंवराम्भोधौ, जिष्णौ तत्र श्रिया तया ।
उग्रत्वं भेजिरे भूभिभुजः कोपविषग्रहात् ॥ ४ ॥

दु० व्या०—जिष्णौ—जयनशीले, पक्षे कृष्णे । श्रिया—श्रीरूपया । उग्रत्वं पक्षे ईश्वरत्वम् ॥ ४ ॥

प्रतापस्तेषु भूपालः, कोपभङ्गुरभालभृत् ।
उवाच विजयं वाचा, वाचालितदिगञ्चलः ॥ ५ ॥
बालया बालबुद्धया त्वं, वृतो वीरव्रतोज्झितः ।
माऽभिमानं विधा रत्नमालासंभूषितश्चवत् ॥ ६ ॥
दु० व्या०—माः विधाः—मा कार्षीः ॥ ६ ॥

प्रेरिताऽसौ प्रतीहार्या, भवता प्रत्यजिग्रहत् ।
बाला मालामिदं चित्रं, किं यतः प्रोच्यते जने ॥ ७ ॥
नारी नृपस्तुरङ्गश्च, तन्त्री वा सारणीजलम् ।
यथा यथा विधीयन्ते, भवन्त्याऽऽशु तथा तथा ॥ ८ ॥
नेदं सहे सहेलं त्वां, विजित्य विजयश्रिया ।
साकं कन्यां वृणोम्येष नृशृंगोऽहं रणाङ्गणे ॥ ९ ॥
सस्मितं विजेयः स्माह, प्रतापं सहते न हि ।
मत्करे करवालोऽयं[2], धाराधर इवोन्नतः ॥ १० ॥

१ °यः प्राह R । २ °यं धरा° R ।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युक्त्वोत्तिष्ठति स्फूर्जत्खड्गे श्रीविजये तदा ।
प्रतापप्रेरिताः सर्वे, सज्जीभूता रणे नृपाः ॥ ११ ॥

हया हेषारवं चक्रुर्गजा गर्जितमूर्जितम् ।
सुभटाश्च भुजास्फोटं, रथचक्राणि चीत्कृतिम् ॥ १२ ॥

प्रतापो मुख्यतां दध्रे, भूधनेष्वखिलेष्वपि ।
राजा रत्नाङ्गदो भेजे, विजयं सारसैनिकः ॥ १३ ॥

दण्डादण्डि च खड्गाखड्गि बाणाबाणि च भल्लाभल्लि ।
केशाकेशि च मुष्टामुष्टि युद्धं वृत्तं कृतसुरहृष्टि ॥ १४ ॥

प्रतापः पुरतो भूत्वा, योधयामास भूभुजः ।
तथा यथा क्षणाद् भेजुर्विजयस्य भटा दिशः ॥ १५ ॥

तद् दृष्ट्वाऽक्षय्यतूणीरधारी[1] वीरो धनुर्धरः ।
अश्वोऽस्य स्वभटान् वैरिघटाः प्रहरति स्म सः ॥ १६ ॥

ज्ञात्वा प्रतापं[2] दुर्जेयं, स च सस्मार चेटकम् ।
सोऽपि स्फुरज्जटाजुटः, कालरूप इवागमत् ॥ १७ ॥

प्रणष्टाः केऽपि तं दृष्ट्वा, केऽपि कम्प्राङ्गतां दधुः ।
धृत्वा स पाणिपादेषु, शत्रून् कांश्चिदलूलुठत् ॥ १८ ॥

कोलाहलमये जाते, विश्वे तत्र विसंस्थुले ।
व्यन्तरं सोऽपि सस्मार, प्रतापः[3] पूर्वसाधितम् ॥ १९ ॥

आयाते व्यन्तरे व्योम्नि; क्षणाच्चेटकरोधिनि ।
सप्रतापा महीपालाः, पुनर्योद्धुं डुढौकिरे ॥ २० ॥

रणतूर्यरवेणालं, जायमाने रणे ततः ।
अकालप्रलयं वीक्ष्य, दध्यौ कन्यापिता हृदि ॥ २१ ॥

---

१ °रो धीरो A । २ °तापदु° A । ३ °तापपू° A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हा ! कन्येयं कथं सृष्टा, विश्वक्षयकरी विधेः ।
यत्कृते यान्त्यमी भूपा रणवह्नौ पतङ्गताम् ॥ २२ ॥

विजयोऽचिन्तयच्चित्ते, जीवरक्षणमेकतः ।
अन्यतः शत्रुजयनं, दुर्घटं घटते द्वयम् ॥ २३ ॥

ध्यात्वेत्यवस्वापिनीं स, प्रमीलां विद्यया ददौ ।
जज्ञिरे शत्रवः सर्वे, यया निद्रावशंवदाः ॥ २४ ॥

राजा विजयचन्द्रोऽपि, सर्वेषां धरणीभुजाम् ।
शस्त्राणि पाणितो लात्वा, शस्त्रराशिं वितेनिवान् ॥ २५ ॥

सालस्याश्चक्षुरुन्मील्य, ततो भूपाः सचेतनाः ।
शस्त्ररिक्तान् करान् वीक्ष्य, वीक्षाञ्चक्रुः परस्परम् ॥ २६ ॥

स्मित्वा विजयचन्द्रोऽपि, स्माह भो भूपपुङ्गवाः ! ।
उपलक्ष्य निजास्त्राणि, गृह्यन्तां शस्त्रराशितः ॥ २७ ॥

लग्नाश्चिन्तयितुं लग्ना नृपा नूनं महात्मना ।
अनेन मुक्ता जीवन्तो, लात्वा शस्त्राणि पाणितः ॥ २८ ॥

दु० व्या०—लग्नाः—लज्जिताः ॥ २८ ॥

मान्योऽयं तत्र सामान्यो, ध्यात्वेति धरणीधवाः ।
भेजुस्तं तस्य मौलौ च, पुष्पवृष्टिं व्यधुः सुराः ॥ २९ ॥

जाते जयजयारावे, हृष्टो रत्नाङ्गदोऽवदत् ।
अहो ! भाग्यवती कन्या, यस्या वरयितेदृशः ॥ ३० ॥

इति प्रमोदतस्तेन, स्वजनीभूतपार्थिवैः ।
कन्या-विजययोश्चक्रे, पाणिग्रहमहोत्सवः ॥ ३१ ॥

भूपाः सम्मानिताः सर्वे, ययुर्निजनिजं पुरम् ।
विजयोऽपि कियत्कालं, तत्र स्थित्वाऽचलद् बली ॥३२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रत्नाङ्गदे निवृत्तेऽथ, विजयः कान्तयाऽन्वितः ।
कृत्वा प्रयाणं कान्तारे, क्वापि सैन्यं न्यवेशत् ॥ ३३ ॥
मध्याह्ने[1] पूजावसरे, कुर्वतोऽस्य जिनार्चनम् ।
चारणः[2] श्रमणः कोऽपि, तत्रागत्यास्तवीज्जिनम् ॥ ३४ ॥

तथाहि—

दूरादानन्दकन्दः किसलयकलनामाप नः पापताप-
व्यापद्व्रातो विलिल्ये कलकुशलसरस्तूर्णमापूर्णमेव ।
शोषं संसारसिन्धुः समलभत शुभध्यानभानुर्दिदीपे,
कश्चित् त्वं देव ! दृष्टो घनसमयतपस्फुर्तिमन्मूर्तिशाली ॥ ३५ ॥

दु० व्या०—घनसमयः—बह्वागमपक्षे, वर्षातपपक्षे ग्रीष्मः ॥ ३५ ॥

श्रेयःसङ्केतशाला सुगुणपरिमलैर्जैयमन्दारमाला,
छिन्नव्यामोहजाला शमदभरसरःपूरणे मेघमाला ।
नम्रश्रीमन्मराला वितरणकलया निर्जितस्वर्गिसाला,
त्वन्मूर्तिः श्रीविशाला विदलतु[3] दुरितं नन्दिता[4] क्षोणिपाला

दु० व्या०—श्रीमन्मराली—श्रीमन्मुख्या ॥ ३६ ॥

नत्वा नृपस्तमाचष्ट, कुतः साधो ! तवागमः ।
सोऽवक् सप्तावतारेषुं[5], त्वं कं पृच्छसि भूपते ! ॥ ३७ ॥
विस्मितस्तं नृपः प्राह, किमप्रस्तुतमुच्यते ? ।
नाप्रस्तुतमिदं स्वेनानुभूमिति सोऽप्यवक् ॥ ३८ ॥
पुनर्जगौ स वैताढ्यपर्वते माधवे पुरे ।
मेघविद्याधरस्तस्य, नन्दनश्चन्दनोऽभवत् ॥ ३९ ॥

---

१ °ध्याह्नपू° A । २ °रणश्र° R । ३ °विहल° A । ४ °न्दितक्षो° AB । ५ °षु स्वरकं A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स विद्याबलवाँश्चारुतारुण्यतरलेक्षणः ।
कपिलाद्रिं गतोऽन्येद्युः, काञ्चिद् विद्यामसाधयत् ॥ ४० ॥

वलमानो रत्नपुरोद्याने कामपि कन्यकाम् ।
वीक्ष्य कामातुरो हृत्वा, स वैताढ्यगिरिं ययौ ॥ ४१ ॥

यावदालापयेद् बालां, स माकन्दतरोस्तले ।
तस्य शाखास्थिता तावद्, वानरी वानरं जगौ ॥ ४२ ॥

यामोऽन्यपादपं जामिं, निजामानीय खेचरः ।
रन्तुमिच्छति निर्लज्जो, लज्जते मन्मनः परम् ॥ ४३ ॥

दु० व्या०—यामः—गच्छामः ॥ ४३ ॥

श्रुत्वेति भीतं कन्यायाः, पृच्छन्तं चरितं खगम् ।
जगौ वानर्यदूरेऽद्रौ, पृच्छ केवलिनं मुनिम् ॥ ४४ ॥

गत्वैनं सत्वरं तत्र, पृच्छन्तं केवली जगौ ।
कन्यां तामेव भो ! पृच्छ, या मुक्ताऽस्ति तरोरधः ॥४५॥

व्यावृत्तः सोऽपि तां नत्वाऽपृच्छच्चरितमद्भुतम् ।
सोऽवग् वक्ष्ये निजं वृत्तं, न पुनः तव वेद्म्यहम् ॥ ४६ ॥

रत्नाङ्गदो रत्नपुरे, पिता मे तस्य वल्लभा ।
मदना सुषुवे पुत्र-पुत्रीयुगलमन्यदा ॥ ४७ ॥

अपुत्रतायां संप्राप्ते, पुत्रे केनाप्यथो हृते ।
जातं शोकाकुलं राजकुलं जानपदैः सह ॥ ४८ ॥

चारणः श्रमणः साधुचन्द्रस्तत्र समागतः ।
प्रणतं नृपतिं प्रोचे, न शोकः क्रियतां त्वया ॥ ४९ ॥

येन जीवेन यत् कर्म, भवेऽकारि शुभाशुभम् ।
तन्नूनं तेन भोक्तव्यं, निर्जर्यं तपसाऽथवा ॥ ५० ॥

---

१ °लं जन° R ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वृत्तं युगलकस्यास्य, श्रूयतां पूर्वजन्मजम् ।
द्वीपेऽस्ति[1] जम्बूनाम्न्यत्र माकन्दीनामतः पुरी ॥ ५१ ॥

राजा दुर्ललितस्तत्र, तस्य राज्ञी मनोरमा ।
तया मनोरमाकारं, युगलं सुषुवेऽन्यदा ॥ ५२ ॥

पुत्री पुत्रश्च तौ धात्रीपालनादष्टवार्षिकौ ।
समं विद्याकलाभ्यासरम्यौ यौवनमापतुः ॥ ५३ ॥

अन्येद्युर्भूपतिः कृत्वा, तौ निजोत्सङ्गसङ्गिनौ ।
पुण्यं तद्रूपलावण्यं, दृष्ट्वा चित्ते व्यचिन्तयत् ॥ ५४ ॥

विवाहमनयोर्नूनं, विधास्येऽहं परस्परम् ।
पृथगेवंविधौ कन्यावरौ न स्तो जगत्त्रये ॥ ५५ ॥

ध्यात्वेति नृपतिः प्रातरवादीन्निजपार्षदान् ।
विवाहव्यवहारोऽभूत्, कथं वृषभवारके ॥ ५६ ॥

युगलस्येति तैरुक्ते, राजा प्रोवाच तन्मया ।
पूर्वरीतिर्विधीयेत, दातव्यं न हि दूषणम् ॥ ५७ ॥

इत्युक्त्वा पुत्रयोरेषोऽन्योऽन्यं पाणिग्रहं व्यधात् ।
धूनयन्तः शिरः सर्वे, जना निजगृहं ययुः ॥ ५८ ॥

दु० व्या०—पुत्रयोः—पुत्री-पुत्रयोः, पुत्रशब्दलोपोऽत्र ॥ ५८ ॥

पद्मश्च पद्मिनी चेति, नाम्ना तौ स्नेहनिर्भरौ ।
बुभुजाते सुखं राज्यं, पद्मोऽभूत् पितुरत्यये ॥ ५९ ॥

अन्तःपुरे पुरेऽप्यस्या जन्मस्नेहेन पद्मिनीम् ।
सम्भोगपात्रं वीक्ष्यामुं, पुरोधा हितमब्रवीत् ॥ ६० ॥

---

१ °स्ति धातकीखण्डे मा° ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनौचित्यं कृतं पित्रा, यदि ते किं ततस्त्वया ।
अथ सत्यपि शुद्धान्तेऽनया धर्मो विलुप्यते ॥ ६१ ॥

दु० व्या०—शुद्धान्ते—अन्तःपुरे ॥ ६१ ॥

सोऽवादीद् व्यवहारोऽयं, पुराणेऽपि निगद्यते ।
प्रजापतिश्चिरं रेमे, दुहित्रा चतुरोऽपि यत् ॥ ६२ ॥
अलं तच्चरितैरुक्तैर्धर्मं भज नराधिप ! ।
इति प्रकुपितः सोऽस्मै, देशत्यागमकारयत् ॥ ६३ ॥
ऊचिवान् सचिवोऽन्येद्युस्तं सुधर्माभिधः सुधीः ।
कुधीमत्वं परित्यज्य, भज धर्मं धरापते ! ॥ ६४ ॥
जन्तोर्धर्मनयभ्रंशैः, श्वभ्रे स्युस्तीव्रयातनाः ।
तप्तकस्तीरपाञ्चालीपानाश्लेषपुरःसराः ॥ ६५ ॥
शीतातपादिभिः कष्टं, स्पष्टं तिर्यक्ष्वपि ध्रुवम् ।
न्यायधर्मफलं स्वर्गो, यद् रम्यं तत् कुरु प्रभो ! ॥ ६६ ॥
भीतो मन्त्रिगिरा पद्मस्तयाऽसौ कान्तया सह ।
तापसव्रतमादाय, तपस्तेपे सुदुस्तपम् ॥ ६७ ॥
वर्षा-शीतोष्णकष्टं स, सह पत्न्याऽन्वहं सहन् ।
क्षयं निनाय दुष्कर्म, देहे दुःखं महाफलम् ॥ ६८ ॥

दु० व्या०—'सह'धातुर्युजादिकः ॥ ६८ ॥

प्रान्ते ज्योतिष्कदेवेषु, देवीभूय ततश्च्युतौ ।
कर्मणः सावशेषत्वे, जातौ केकी च केकिनी ॥ ६९ ॥
व्याधशीतादिभिर्घात्यौ, हंसी-हंसौ मृगी मृगौ ।
कपोती च कपोतश्च, भवे षष्ठे बभूवतुः ॥ ७० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यदा मिथुनं चैतत्, श्रीसङ्घं जिनमन्दिरे ।
वीक्ष्य जातिस्मृतिं प्राप्तं, स्वं निनिन्द पुनः पुनः ॥ ७१ ॥

निद्रापरायणं व्याधहतं साधुप्रबोधितम् ।
पुनर्युगलरूपेण, त्वत्कुले जायते स्म तत् ॥ ७२ ॥

पुरोधास्तदविरोधाच्च, देशत्यागेन दुःखितः ।
कृत्वा बालतपो जज्ञे, व्यन्तरो बलदुर्धरः ॥ ७३ ॥

जातमात्रममुं पुत्रं, व्यन्तरः पूर्ववैरभाक् ।
दृष्ट्वा हृत्वा स वैताढ्यशृङ्गाग्रमधिरूढवान् ॥ ७४ ॥

महाबलः स कष्टाय, तं मुमोच नभस्तलात् ।
अधः सञ्चरता मेघखगेनासौ धृतः करे ॥ ७५ ॥

रत्नकन्दुकवल्लब्ध्वा, बालं बालार्कभासुरम् ।
दत्त्वा प्रियायै चक्रेऽसौ, प्रमोदेन महोत्सवम् ॥ ७६ ॥

मुञ्च शोकं महाराज ! स सुतस्तव भाग्यवान् ।
इत्युक्तिप्रणतः पित्रा, मुनिरन्यत्र जग्मिवान् ॥ ७७ ॥

ततः सुलोचनाऽऽख्याऽपि, जनन्योद्धरितेत्यहम् ।
भाष्यमाणाष्टवर्षाम्बामपृच्छं हेतुमन्यदा ॥ ७८ ॥

मात्रा मज्जन्मवृत्तान्ते, साश्रुपातमुदीरिते ।
जातिस्मृतिरभून्मेऽद्य, हृताऽस्मि भवता पुनः ॥ ७९ ॥

श्रुत्वेति चन्दनो विद्याधरो स्वपितरौ क्षणात् ।
पप्रच्छ साग्रहं वृत्तं, तौ च तथ्यमवोचताम् ॥ ८० ॥

विरक्तश्चन्दनो दध्यौ, हा ! मूढेन मया कथम् ? ।
भवाब्धौ पातितः स्वात्मा, कार्याकार्यविवेकतः ॥ ८१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्ञापयित्वा कनीवृत्तं, पितरौ स व्यजिज्ञपत् ।
संयमश्रियमादास्ये, सर्वपापक्षयङ्करीम् ॥ ८२ ॥

तावूचतुः कथं वत्स !, वत्सलत्वेन पालितः ।
वार्द्धके दुःखवार्द्धौ तौ, नौवन्नोत्तारयिष्यसि ॥ ८३ ॥

दु० व्या०—नौ—आवाम् ॥ ८३ ॥

पितरौ दुःखभेदाय, जन्तोश्चारित्रमेव हि ।
इत्युक्ते तावपि स्थैर्यं, भेजतुर्भवभञ्जने ॥ ८४ ॥

पितरौ तां च कन्यां स लात्वा केवलिनं ययौ ।
भवोद्विग्नानि तान्याशु, संयमं च ययाचिरे ॥ ८५ ॥

उवाच केवली वोऽन्तस्त्रयाणां संयमोऽस्ति भोः ! ।
कस्य नास्तीति तैरुक्ते, कन्याया नेति सोऽब्रवीत् ॥ ८६ ॥

अस्या भोगफलं कर्मेत्युक्ते चन्दनखेचरः ।
अपृच्छद् वानरी मर्त्यगिरा वदति किं विभो ! ॥ ८७ ॥

साधुः प्राह त्वया सेयं, ह्रियते स्म यदा तदा ।
वज्रदाढखगोऽप्येनां, जिघृक्षुरभवत्तराम् ॥ ८८ ॥

त्वत्तो लातुमशक्तस्तु, स प्रायुङ्क्त प्रतारिणीम् ।
तया च वानरीवाचा, प्रेरितोऽसि मदन्तिके ॥ ८९ ॥

मया हितैषिणा पश्चात्, प्रहितोऽस्ति पुनर्भवान् ।
विलम्बं स्वं च निन्दन्ती, विलक्षाऽगात् प्रतारिणी ॥ ९० ॥

प्रहारोऽपि गुणस्तेऽभूदित्युक्ते मुनिना खगः ।
कन्यां रत्नपुरे प्रेष्य, पितृयुक्तोऽग्रहीद् व्रतम् ॥ ९१ ॥

अहं चन्दननामेति, साधुनोक्ते सुलोचना ।
भ्रातर्भ्रातरिति प्राप्ता, जल्पन्ती साश्रुलोचना ॥ ९२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नत्वा तं सादरं पृष्ट्वा, सुखसंयमतादिकम् ।
ददौ महाग्रहं तस्मै, शुद्धाहारं सुलोचना ॥ ९३ ॥

भूपो व्यचिन्तयच्चित्ते, कीदृशं भवनाटकम् ।
जन्तवो यत्र नृत्यन्ति, बहुधा निजकर्मभिः ॥ ९४ ॥

व्योम्ना गते मुनौ तत्र, निःस्नेहे पद्मपत्रवत् ।
भुक्त्वा भूपोऽपि सायाह्ने, प्रयाणमकरोत् पुरः ॥ ९५ ॥

पुरःसरो राजभीत्या, केनचित् पार्श्वयायिना ।
दुर्गायां जायमानायां, भिल्लेनावादि भूपतिः ॥ ९६ ॥

पाण्डवीयं तथा रौति, त्वरितोऽपि यथा भवान् ।
क्लेशं श्रियं च संप्राप्य, षड्भिर्मासैर्गृहं गमी ॥ ९७ ॥

सायं सैन्ये प्रयाणान्ते, स्थिते सति महीपतिः ।
संशिश्रिये पटावासं, वाजि-हस्तिघटावृतः ॥ ९८ ॥

अवार्यो दैत्य-देवेन्द्रैरुत्तार्य व्योमपादपात् ।
कालः कवलयामास, रविं पक्वफलोपमम् ॥ ९९ ॥

वसुस्वामिनि सूरेऽस्ते, तमःपूरे पुरःसरे ।
बभासे सेन्दुभिर्व्योम्नि, लुण्टाकैरिव तारकैः ॥ १०० ॥

दु० व्या०—वसु—द्रव्यं तेजश्च ॥ १०१ ॥

जाग्रद्विजयचन्द्रोऽपि, समं सुभटमण्डलैः ।
प्रियाया ह्रियमाणायाः, स्वरं सुश्राव दूरतः ॥ १०१ ॥

हृता सुलोचना केन, जल्पन्निति नरेश्वरः ।
दधावे सुभटैर्यावत्, तावत् पृष्ठेऽभवद् ध्वनिः ॥ १०२ ॥

हे नाथ ! ह्रियते सेयं, प्रिया तव सुलोचना ।
याति यात्यधमः सैष भटाः ! धावत धावत ॥ १०३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्यं पृष्टे पुरो वेति, विश्रान्तो यावदाययौ ।
प्रियां विना पटावासं, तावद् दृष्ट्वा मुमूर्च्छ सः ॥१०४॥
संसिक्तः चन्दनाम्भोभिरदम्भैः पारिपार्श्वकैः ।
कथञ्चिल्लब्धचैतन्यो, विललाप क्षमापतिः ॥ १०५ ॥
हा प्रिये ! हा कुरङ्गाक्षि !, छलिना च्छलितोऽस्मि चेत् ।
तत् किं कुर्वे पटवासः, कपटावासतामगात् ॥ १०६ ॥
स्मृतागतश्चेटकोऽवग्, वज्रदाढोऽस्ति खेचरः ।
पुर्यां चमरचञ्चायां, जह्रे तेन सुलोचना ॥ १०७ ॥
मयाऽप्यजय्यः स प्राज्यबलविद्याबलोद्धतः ।
विजेष्यते च कालेन, सत्त्वतः स त्वया स्वयम् ॥ १०८ ॥
गते तस्मिन् नृपः स्माह, धैर्यात् प्रातः स्वसैनिकान् ।
आहरामि प्रियामेष जित्वा दैवमपि ध्रुवम् ॥ १०९ ॥

दु० व्या०—आहारामि—आनयामि ॥ १०९ ॥

इत्युक्त्वा नृपतिः सत्त्वशाली शालीनमानसः ।
दत्त्वा चमूपतेः शिक्षां, प्राचालीदुत्तरां प्रति ॥ ११० ॥
स्थगीधरो धराधीशभक्तिभाग् धैर्यबन्धुरः ।
कामप्याशां द्विधाऽऽश्रित्य, चचाल करवालभृत् ॥ १११ ॥
किमप्युपायमप्राप्य, भ्रमन् गिरिवनादिषु ।
आक्रान्तस्तृषयाऽन्येद्युरपश्यद् भूपतिः सरः ॥ ११२ ॥
अखण्डं पुण्डरीकश्रि, लसच्चामरचित्तहृत् ।
यद् भूपास्थानवद् रेजे, राजहंसविभूषितम् ॥ ११३ ॥

दु० व्या०—पुण्डरीकपक्षे छत्रम् ॥ ११३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्फुल्लनालिनालीषु, निलीना यत्र षट्पदाः ।
बभुस्तमिव पश्यन्तो, नेत्रतारास्सरःश्रियः ॥ ११४ ॥

पयः पीत्वा नृपस्तत्र, छायामिच्छन्नवैक्षत ।
श्रितहल्लीसकक्रीडा, नागकन्या वनान्तरे ॥ ११५ ॥

फणीन्द्रमुकुटास्तारशृङ्गारास्ता निरीक्ष्य सः ।
भयाश्चर्यरसापूर्णः, स्थातुं गन्तुं न शक्तवान् ॥ ११६ ॥

तं वीक्ष्य तास्वपि स्वैरमागच्छन्तीषु सन्मुखम् ।
तत्स्वामिनी पुरोभूय, जगौ वत्स ! कुतो भवान् ? ॥११७॥

साश्चर्ये नृपतिः प्राह, मातस्तेऽहं सुतः कुतः ! ।
साऽवग् गजपुरेशस्य, प्रियाम्बा विजया तव ॥ ११८ ॥

गृहीतदीक्षे त्वत्ताते, तत्तादृग् धर्मतत्परा ।
जज्ञेऽहं धरणेन्द्रस्य, वल्लभा विजयाऽभिधा ॥ ११९ ॥

इमां जानीहि वैरोट्यामेनां पद्मावतीं जयाम् ।
वयं स्वपरिवारेण, विहरामो यथासुखम् ॥ १२० ॥

तां नत्वा विजयेनोक्ते, स्वचरित्रे तया रयात् ।
नागेन्द्रपार्श्वे निन्येऽसौ, स्वाङ्के तं न्यस्य सोऽवदत् ॥१२१॥

पुत्रस्त्वं विजयायाश्चेत्, तन्ममापि विशेषतः ।
त्वत्प्रियामानये तूर्णं, नैवं ते गौरवं पुनः ॥ १२२ ॥

किञ्चिद् ध्यात्वेति च प्रोचे, वैरिणं रुन्द्धि तावता ।
सान्निध्यं हि विधास्यामो, वयं तव रणाङ्गणे ॥ १२३ ॥

नागलोकं विलोक्याऽसौ, विविधाश्चर्यसङ्कुलम् ।
नित्यार्हत्प्रतिमां नत्वा, स्वं कृतार्थममन्यत ॥ १२४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पातालाद् बहिरानीय, रूपव्यत्ययहेतवे ।
गुटिकां व्यतरत् तस्मै, विजया विजयप्रदाम् ॥ १२५ ॥

विजयोऽथ भुवं भ्राम्यन् , रत्नवेश्मवने क्वचित् ।
विलोक्य विस्मितोऽपश्यत् , सिंहं तन्मार्गरोधकम् ॥१२६॥

तर्जितस्तेन हर्यक्षो, नादेन स्फोटिताम्बरः ।
धराच्छोटितलाङ्गूलो, दधावे विजयं प्रति ॥ १२७ ॥

विजयोऽबिभ्रमत् तं च, करेणाक्रम्य तत्क्रमम् ।
सोऽपि विद्युल्लताकारं, दर्शयित्वा ययौ क्वचित् ॥ १२८ ॥

साश्चर्यो मन्दिरद्वारं, प्राप्तो गीतं वधूजनैः ।
अश्रौषीच्चरितं स्वं स यद् बभूव स्वयंवरे ॥ १२९ ॥

कन्या काऽपि सखीयुक्ताऽनुरक्ताऽत्रास्ति किं मयि ।
चिन्तयन्निति चक्रेऽसौ, शुकरूपं विचक्षणः ॥ १३० ॥

आशु कोऽपि शुकोऽभ्येति, जल्पत्यस्याः सखीजने ।
मत्तवारणगामिन्याः, स भेजे मत्तवारणम् ॥ १३१ ॥

दु० व्या०—आशु-शीघ्रम्, एवं जल्पति, मत्तवारणः—मत्तगजः ॥१३१॥

शशिलेखां सखीताराबृन्दे तारुण्यशालिनीम् ।
कन्यां भद्रासनासीनां, शुको वीक्ष्य विसिष्मिये ॥ १३२ ॥

राहोरहिरिपोर्भीत्या, शशिना शेषभोगिना ।
वक्त्रवेणीनिभादेणीनेत्राऽसौ शरणीकृता ॥ १३३ ॥

सनूपुररणत्कारं, कन्याऽभ्युत्थाय तं शुकम् ।
आदाय स्वकरेऽवादीद्, वद किञ्चित् प्रियं शुक ! ॥१३४॥

शुकोऽवक् तद्वनं सौधं, यत्र स्यात् प्रियसङ्गमः ।
तत्सौधमप्यरण्यानी, न यत्र प्रियसङ्गमः ॥ १३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा निःश्वस्य शुकं माह, दूरे मे प्रियसङ्गमः ।
सोवक् का त्वं कुतोऽप्यासि, कः प्रियस्तव चेतसि ? ॥१३६॥

साऽवक् प्रतापभूपस्य, सुताऽहं प्रियलोचना ।
राज्ञे विजयचन्द्राय, दित्सिता व्यन्तरोक्तिभिः ॥ १३७ ॥

दु० व्या–दित्सिता–दातुमिष्टा ॥ १३७ ॥

तत्सङ्गमोऽत्र भावीति, मदर्थे रत्नमन्दिरम् ।
कृत्वा मृगेन्द्ररूपेण, व्यन्तरो विपिनं भ्रमेत् ॥ १३८ ॥

किं कुर्वे मन्दभाग्याऽहमद्यापि न लभे वरम् ।
अद्य प्रोक्तेऽपि नायाति, न जाने तत् कियद्दिनम् ? ॥ १३९ ॥

दु० व्या०–तद् अद्य ॥ १३९ ॥

दिनं याति जनालापैर्न याति रजनी पुनः ।
अनुरागी च रोगी च, दृश्येते सदृशो शुकः ॥ १४० ॥

प्रातर्गेहाङ्गणे नृत्यन्, मयाऽसौ मधुरस्वरः ।
क्षिप्तः प्रियागमप्रीत्या, काकोऽपि स्वर्णपञ्जरे ॥ १४१ ॥

स्वैरं विश्वे शुकः भ्राम्यँस्त्वं न जानासि तं नृपम् ।
सोऽवक् करतले तस्य, निवासो मे निरन्तरम् ॥ १४२ ॥

सुलोचनाकुचद्वन्द्वमहं वा मृगलोचने ।
तत्कोमलकरस्पर्शसुखानुभवभाजनम् ॥ १४३ ॥

साश्रं बाला स्मरव्यालदंशाकुलतयाऽवदत् ।
हृदि स्थितोऽपि किं नाथ !, न दत्से मम दर्शनम् ॥ १४४ ॥

सहसा प्रकटीभूते, विजये विस्मितानना ।
सा मुदा नरीनर्ति स्म, चकोरीव निशाकरे ॥ १४५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिंहरूपधरोऽभ्येत्य, व्यन्तरो दिव्यरूपभाक् ।
सिंहासने निवेश्यैनं, बभाषे रचिताञ्जलिः ॥ १४६ ॥

आदृत्य विरहग्रीष्मतप्ताङ्गी भूमिभृद् भुवम् ।
स्वाङ्गसङ्गसुधासारैरासिञ्च शुचिमेघवत् ॥ १४७ ॥

दु० व्या०–भूमिभृत्पक्षे शुचिः–आषाढः ॥ १४७ ॥

तावद्विवाहे नौचित्यं, यावन्नैति सुलोचना ।
विश्वास्ये वलितः सर्वमित्यसौ तं न्यषेधयत् ॥ १४८ ॥

आश्वास्य बालां सोऽचालीद्, व्यन्तरानुमतस्ततः ।
वीक्षमाणा तमङ्गुल्या, सा कथञ्चिन्न्यवर्तत ॥ १४९ ॥

पीत्वा वारि मनोहारि, नद्यास्तीरे तरुस्थितः ।
अन्येद्युः सहसाऽपश्यन्महीनाथः स्थगीधरम् ॥ १५० ॥

संभ्रान्तः सोऽपि तं दृष्ट्वा, प्रणम्य परमादरम् ।
देव्या नामाङ्कितं तस्मै, ददौ श्रवणकुण्डलम् ॥ १५१ ॥

करेण हृदि तच्चस्य, भूपः स्माह सगद्गदम् ।
गृहाण कुण्डलं देवि !, निवासोऽत्रैव तेऽधुना ॥ १५२ ॥

भूभुजा सादरं पृष्टो, जगौ वृत्तं स्थगीधरः ।
तदा स्वां चलितं ज्ञात्वा, प्राचलं प्रति पश्चिमाम् ॥ १५३ ॥

केनाऽध्वना हृता देवीत्येवं चिन्तयता पुरः ।
मयैतत् कुण्डलं लब्ध्वा, शिश्रियेऽध्वा स एव हि ॥ १५४ ॥

हा वत्स विजय ! क्वासि, हा चिरण्टि सुलोचने ! ।
हा बन्धो विजयेत्येवमश्रौषं दारुणं स्वरम् ॥ १५५ ॥

दु० व्या–चिरण्टि–हे वधु ! ॥ १५५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किमेतदिति संभ्रान्तो, यावद् यामि द्रुतं द्रुतम् ।
स्वामिजामिसुता तावद्, दृष्टा माता कलावती ॥ १५६ ॥

नत्वा किमिदमम्बेति, मयि जल्पति सा जगौ ।
वत्स ! स्थगीधराऽवाच्यं, दुश्चरित्रं दुरात्मनाम् ॥ १५७ ॥

दु ० व्या - हे अम्ब ! ॥ १५७ ॥

गवाक्षस्था सुता शीर्षे, यावद् वेणीं करोम्यहम् ।
तावत् तत्र विमानस्थः, खेटः प्रापदिति ब्रुवन् ॥ १५८ ॥
ईप्सिताऽपि मयोद्वोढुं, तेनात्ता चेत् सुलोचना ।
हरामि तर्हि तज्जामिं, ततोऽसौ विधृता करे ॥ १५९ ॥
स्नेहाद् बाहुविलग्नां मामप्यस्याः खेचराधमः ।
स विमानं समारोप्याचलत् पवनवेगतः ॥ १६० ॥
आगतः स कियद् दूरे, कान्तारे कामपि स्त्रियम् ।
पुनर्विमानमानिन्ये, क्रदन्तीं तामुवाच च ॥ १६१ ॥
मुग्धे ! विजयचन्द्राख्यमर्त्यकीटे त्यजादरम् ।
भजस्व मां भुजादण्डविडम्बितनरामरम् ॥ १६२ ॥
स्वामिन् ! विजयचन्द्रेति, क्रदन्ती पिहितानना ।
कर्णन्यस्ताङ्गुलिर्मेने, मया पुत्रवधूरिति ॥ १६३ ॥
यदर्थेऽहमुपक्रान्तः, सेयं लेभे सुलोचना ।
किमाभ्यामिति जल्पाकः, सोऽमुञ्चन्नौ विमानतः ॥१६४॥

दु० व्या०—नौ—आवाम् ॥ १६४ ॥

अनुकूले सरित्कूले, सिकतासङ्कुले किल ।
पतनाज्जीविते आवां, त्वं कुतस्तु स्थगीधर ॥ १६५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्ववृत्तं ज्ञापयित्वाऽहं, ततो मातृसुते उभे ।
सुखेन चालयन्मार्गे, नाभूवं मातृशासितः ॥ १६६ ॥

दु० व्या–मातृशासितः–मूर्खः ॥ १६६ ॥

कोमलक्रमणे ते द्वे, तृषिते च बुभुक्षिते ।
सुश्रूषयन् वने प्राप, कथञ्चित् तापसाश्रमम् ॥ १६७ ॥
गागलिस्तापसाधीशो, मद्वृत्ते च गतेऽवदत् ।
मुञ्च भद्रस्त्रियावत्र, पालयिष्यामि वत्सल ! ॥ १६८ ॥
उटजे स्थापयित्वा ते, गृहीत्वाऽहं तदाशिषम् ।
भ्रमन् वनेषु दिङ्मूढो, दैवादेव समागमम् ॥ १६९ ॥
अभाषत महीशस्तं, शस्तं यत् तव सङ्गमः ।
गमिष्यति च सा कान्ता, कान्तास्या वासरान् कथम् ? ॥१७०॥

दु० व्या०–महीशः, तम् ॥ १७० ॥

कथं मयि श्लथस्नेहा, न दत्से देवि ! दर्शनम् ।
विलपन्तमिति स्पष्टं, स्थगीभृद् भूपतिं जगौ ॥ १७१ ॥
धीरस्त्वमेधि मेधाविन् !, सति तत्रापि सा सती ।
सुवर्णे श्यामिका न स्यात्, माणिक्ये न मलः पुनः ॥१७२॥

दु० व्या०–एधि–भव ॥ १७२ ॥

स्थगीधरधराधीशाविति तत्र स्थितौ क्षणात् ।
अद्राष्टां नभसा यान्तं, पत्रिणं पत्रिकामुखम् ॥ १७३ ॥
कोऽयं केयं प्रभो ! पत्री, जल्पत्येवं स्थगीधरे ।
विहङ्गस्तरुमाश्रित्य, राज्ञोऽङ्के भूर्जिकां जहौ ॥ १७४ ॥

दु० व्या०–कोऽयं पत्री–पक्षी, केयं पत्री ? ॥ १७४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्ट्वा सुलोचना नाम, तत्र राज्ञि सविस्मये ।
पक्षिरूपं परित्यज्य, सोऽयं सिद्धिनरोऽभवत् ॥ १७५ ॥

चन्द्रांशुवसनोऽभ्येत्य, स कृत्वा वन्दनं तयोः ।
सती सुलोचना जीयादित्याचष्ट पटिष्ठगीः ॥ १७६ ॥

साश्रुनेत्रे नृपे सिद्धोऽवोचन्मुञ्च शुचं शुचे ! ।
पुर्यां चमरचञ्चायां, मयाऽलोकि सुलोचना ॥ १७७ ॥

अशोकवनिकास्थायि, शोकसङ्कुलमानसा ।
शम्भूलीवचनैर्वज्रदाढस्य विहितश्रवाः ॥ १७८ ॥ युग्मम् ॥

दु० व्या०—शम्भूली—दूती ॥ १७८ ॥

कर्पूरफालिं सागरां, सुरसिन्धुं सशैवलाम् ।
सुधां सभुजगां दूतीयुताऽजैषीत् सुलोचना ॥ १७९ ॥

तस्याहरणवृत्तान्तं, विदित्वा जनतामुखात् ।
अहं बाढतरं दूनो, वज्रदाढसभां ययौ ॥ १८० ॥

मन्मित्रजयचन्द्राख्यभूपपुत्रस्य वल्लभाम् ।
विमुञ्चेति मया प्रोक्ते, साऽभूत् प्रत्युत मत्सरी ॥ १८१ ॥

तस्योपदेशानौचित्याद्, गत्वाऽवोचं सुलोचनाम् ।
त्वद्भर्त्रे ज्ञापयाम्येष, भूर्जे किञ्चिल्लिख स्वयम् ॥ १८२ ॥

तया रुदत्या हारस्थेक्षणाञ्जनशलाकया ।
कज्जलाविलनेत्राऽश्रुजलैर्लिखितमर्पितम् ॥ १८३ ॥

दु० व्या०—ईक्षणं—नेत्रम् ॥ १८३ ॥

श्रुत्वेति भाषितं सिद्धपुरुषस्य महीपतिः ।
पत्रीं पुनः पुनर्वीक्ष्य, रोदिति स्म सगद्गदम् ॥ १८४ ॥

---

१ °स्थापि शो° A । २ साजारां A B ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धोऽवग् धीर! धीरत्वं, भज भङ्क्त्वा निजं रिपुम् ।
दिनैः स्तोकैस्तया साकं, त्वमाप्स्यसि जयश्रियम् ॥१८५॥

अथ जैनमतालापैरतिक्रम्य दिनं मुदा ।
सायंतनक्रियां कृत्वा, विश्रान्तास्तत्र ते त्रयः ॥१८६॥

सिद्धस्थगीभृतोः स्वापमाप्तयोरभवन्नृपः ।
स्मरन् विकल्पकल्पान्तमरुद्भ्रान्तमनाः प्रियाम् ॥ १८७ ॥

दु० व्या०–स्वापं–निद्राम् ॥ १८७ ॥

आर्या—

साऽभून्ननु मा रजनी, मारजनी सोऽप्युदेति मारजनी ।
रुचिनिर्जितमारजनी, न यत्र तल्पं ममारजनी ॥१८८॥

दु० व्या०–मा रजनी मा भूद्, मारोत्पादिका । मारजनी–मारवधूः । आर–प्राप । जनी–वधूः ॥ १८८ ॥

कथञ्चिल्लब्धनिद्रस्य, तस्य कश्चिन्महानिशि ।
अमोटयत् पदाङ्गुष्ठं, लघुनिद्रां स चात्यजत् ॥ १८९ ॥

आसीनः स्फारशृङ्गारां, पूर्णचन्द्रमुखीमसौ ।
देवीं सुलोचनां वीक्ष्य, वीक्षापन्नो व्यचिन्तयत् ॥१९०॥

दु० व्या०–वीक्षापन्नः–विलक्षणः ॥ १९० ॥

सम्भाव्यं सांप्रतं तस्याः, कथमागमनं ननु ।
भ्रान्तिरेषेत्यधो नेत्रे, तस्मिन् सा सस्मितं जगौ ॥ १९१ ॥

न लक्षयसि किं नाथ!, स्वप्रियां शत्रुणोज्झिताम् ।
समेतां स्मरसंतप्तां, परिरिप्साऽपरां त्वयि ॥ १९२ ॥

---

१ °थं स्वां प्रि A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खलवत् किमु निःस्नेहः, स्तोककालेन वीक्ष्यसे ।
असंभाव्यं विभाव्येति, नेक्षाञ्चक्रेऽपि तां नृपः ॥ १९३ ॥
॥ युग्मम् ॥

अपसृत्य सनिःश्वासं, लतागेहान्तरं गता ।
दीनस्वरं सा रुदती, प्राह श्रवणदुःसहम् ॥ १९४ ॥

दूरे पितृगृहं मेऽद्य, दूरे च श्वसुरालयः ।
आसन्नोऽपि ममाभाग्याद् , दूराद् दूरतरः प्रियः ॥ १९५ ॥

हृताऽऽदौ वैरिणा दैव ! यदि तेनोज्झिता च सा ।
प्रतिकूलः पतिस्तर्हि, किं करोतु सुलोचना ॥ १९६ ॥

प्राप्ते निर्दयतां पत्यौ, रे किं हृदय ! रोदिषि ।
कण्ठे पाशं क्षिपाम्येषा, सर्वदुःखच्छिदेऽधुना ॥ १९७॥

श्रुत्वेति विजयो दध्यौ, हा ! महां (म ?) म्रियतेऽङ्गना।
अतोऽसौ तत्र गत्वा द्राक्, प्रोचे मा साहसं कुरु ॥ १९८ ॥

साऽवग् बाला न दूयेत, नालापमपि चेल्लभेत् ।
भ्रान्तिस्ते चेत् ततो वच्मि, सर्वं विदितमावयोः ॥ १९९ ॥

स्वयंवरात् प्रभृत्यस्य, तत्प्रेम ललितादिकम् ।
नीचैर्विलोचनं भूपे, शृण्वति स्माह सा ततः ॥ २०० ॥

पुनः सोचे प्रिय ! भ्रान्ति, मुञ्च नो चेन्निजार्पिताम् ।
उर्मिकामपि पश्यैतां, तां दृष्ट्वा सोऽथ दध्यिवान् ॥ २०१ ॥

रूपानुकारैः सङ्केतैरपि नामाङ्कमुद्रया ।
इमां सुलोचनां मन्ये, न मन्येत मनः पुनः ॥ २०२ ॥

विमृश्य विजयः प्रोचे, वद चेत् त्वं सुलोचना ।
त्वद्भ्राता को मुनिः किञ्च, तेनोचे चरितं निजम् ॥२०३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



योषा जोषमथो भेजे, तद्वृत्तान्तमविन्दन्ती ।
विजयः प्राह धूर्तत्वं, त्यज मूर्तिं निजां भज ॥ २०४ ॥

दु० व्या०—जोषं—मौनम् ॥ २०४ ॥

हित्वा सुलोचना रूपं, सा भूत्वा खेचरी जगौ ।
धन्या सुलोचना यस्याः, पतिस्त्वं विश्वमण्डनम् ॥ २०५ ॥

वसन्ततिलकाछन्दः—

लीलाविलोलललनानयनाञ्चलेन,
येषां मनोमधुकरः परिधूयमानः ।
उन्मीलदुज्ज्वलविशालविशुद्धशील-
लीलाम्बुजं त्यजति नाशु त एव धन्याः ॥ २०६ ॥

सुलोचना च त्वं चेदृग्, द्वयमेव जगत्त्रये ।
न यत्परप्रियासक्तं, रूपस्मरकथादिभिः ॥ २०७ ॥

पत्या मे वज्रदाढेन, त्वत्प्रिया निष्कुटान्तरे ।
मुक्ताऽस्ति मुक्तावल्लीव, नैर्मल्यगुणशालिनी ॥ २०८ ॥

दु० व्या०—निष्कुटः—वाटिका ॥ २०८ ॥

मद्भर्तृप्रहिताऽनेकदूतीवचनमुद्गरैः ।
न तस्या बिभेदे शीलमिव वज्रविनिर्मितम् ॥ २०९ ॥

कृपया तदुपासिन्या वत्सलायाः स्वभावतः ।
नखामिषसमं सख्यं, तया सार्कं ममाभवत् ॥ २१० ॥

दु० व्या०—सख्यं—मैत्र्यम् ॥ २१० ॥

जपन्ती नाम मन्त्रं ते, पृच्छन्त्यां मयि सा निजम् ।
स्त्रीस्वभावात् कियत् प्रेम, ललिताचरितं जगौ ॥ २११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत् तयोक्तं हि तद् वेद्मि, न यदुक्तं न वेद्मि तत् ।
शिक्षितैश्च मितैर्यद्वा, सिद्धिः का वचनैर्व्ययैः ॥ २१२ ॥

दत्त्वोर्मिकां तयाऽऽज्ञप्ता, त्वच्छुद्ध्यै तत्र कान्तया ।
भ्रमन्त्यत्रागतां वीक्ष्य, त्वां जज्ञेऽहं स्मरातुरा ॥ २१३ ॥

दु० व्या०–'सीष्या बोलमव्या वरा नाथ बोल नही परा' इति योगिवाक्यम् ॥ २१३ ॥

मयि स्वकान्तारूपायामपि त्वं न विमूढधीः ।
का कथा परदारेषु, तत् त्वं धन्यशिरोमणिः ॥ २१४ ॥

प्रियोर्मिकां करे न्यस्य, स्वां प्रदाय प्रमोदभाक् ।
तां विसृज्य नृपः प्राप, स्वापस्थानं तरोस्तले ॥ २१५ ॥

सिद्धस्थगीभृतौ तत्राऽनवेक्ष्य हृदि शङ्कितः ।
काननान्तरसौ भ्रान्तः, श्रान्तः शाखितले स्थितः ॥ २१६ ॥

तस्मिँस्तत्र निषण्णेऽथ, तरोरुपरि संस्थितम् ।
भूतं भूतः परः स्माहागम्यतां तत्र गम्यते ॥ २१७ ॥

कुत्रेति व्याहृते तेन, पुरोऽवक् त्वं न वेत्सि किम् ? ।
इतोऽस्ति दशयोजन्यां, पुरं विजयसंज्ञया ॥ २१८ ॥

राजा चन्द्रबलस्तत्र, तस्य चैत्रः पुरोहितः ।
कृत्वा गवाश्वमेधादीन्, नृमेधं कुरुतेऽधुना ॥ २१९ ॥

दु० व्या०–'गवाश्व' 'गोर्नाम्न्यवोऽक्षे' [ सिद्धहेम० १-२-२० ] इत्यनेन अव् ॥ २१९ ॥

अष्टोत्तरशतं नृणामध्वरे वधमेष्यति ।
सप्तोत्तरशतं क्षुद्रदैवतैस्तत्र मेलितम् ॥ २२० ॥

अवशिष्टो विशिष्टस्तैः, कश्चिदात्तो वनादतः ।
यदि सूर्योदये जज्ञे, भाव्यं यज्ञेन तद् ध्रुवम् ॥ २२१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यावः कौतुकं तत्रेत्युक्त्वाऽमुत्र स्थिते परः ।
जगावीदृक्षयज्ञानां, कोऽपि वारयिता न किम् ? २२२ ॥
नैवेति गदिते तेन, परोऽवादीन्न सोऽस्ति किम् ? ।
यः श्रुतो विजयः कश्चिन्नृपो हिंसानिषेधकः ॥ २२३ ॥
सोऽप्याख्यन्नाम भोस्तस्य, वाक्छूरस्य न गृह्यते ।
ईदृशीं यः क्षितीशोऽपि, न रक्षति नरक्षतिम् ॥ २२४ ॥

दु० व्या०—नरक्षतिम्–नरक्षयम् ॥ २२४ ॥

एवं पुनः परः स्माह, कृतमेतेन भूभुजा ।
अन्योऽपि भुवने नास्ति, देवो नागो सुरोऽथवा ॥ २२५ ॥
सोऽवादीच्चिन्तयाऽलं तेऽनया यज्ञेऽथ गम्यते ।
परोऽवक् कथय भ्रातः !, तथापि यदि बुद्ध्यते ॥ २२६ ॥
सोऽवक् कर्कोटशैलेऽस्ति, कर्कोटफणिनः स्फुरत् ।
क्रीडास्थानं स आगत्य, पातालात् तत्र खेलति ॥ २२७ ॥
नागदत्तः मुनिः कश्चिदत्रागत्य स्थितोऽन्यदा ।
तं नागेन्द्रं दयाधर्मेऽऽस्थापयद् विश्ववत्सलः ॥ २२८ ॥
ततः प्रभृत्यसौ कुर्यादध्वरध्वंसमुद्धुरः ।
अयं यज्ञः सुखं भावी, कर्कोटश्चेन्न वेत्स्यति ॥ २२९ ॥
उड्डीनयोस्तयोरेव मुक्त्वा राजा व्यचिन्तयत् ।
अहो ! स्थगीभूतः कष्टं, महदेतदुपस्थितम् ॥ २३० ॥
अन्यच्च श्रूयते कीर्तिः, श्रवणाभ्यामनीदृशी ।
सत्यं वा जीवितं मे धिग्, नरमेधमरक्षतः ॥ २३१ ॥
आत्मना वा परेणापि, जन्तूनामिह रक्षणम् ।
कृतमेव वरं येन, विना सर्वं वृथा परम् ॥ २३२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स ध्यायन् किं करोमीत्यवक् स्मृतागतचेटकम् ।
मद्वृत्तं यज्ञवृत्तं च, कर्कोटाय निवेदय ॥ २३३ ॥

अथो तथाकृते तेन, नागलक्षैः परिष्कृतम् ।
कर्कोटं धावितं दृष्ट्वा, विजयोऽपि सहाचलत् ॥ २३४ ॥

बहवः पटवः पापा ऋचां पठनपूर्वकम् ।
यावन्नराहुतिं दद्युस्तावन्नागबलं ययौ ॥ २३५ ॥

पलायध्वं पलायध्वं, वदन्तस्तत्र वाडवाः ।
काकवन्नेशुरुज्झित्वोत्तरीयादित्वराकुलाः ॥ २३६ ॥

द्विवेदी च त्रिवेदी चोपाध्यायः पाठकस्तथा ।
दीक्षितो यायजूकश्च, नष्टाः पश्चाद् विलोकनैः ॥ २३७ ॥

दु० व्या०—यायजूकः—यज्ञकर्ता ॥ २३७ ॥

यूपमुन्मूलयन्मूलाद्, वह्निकुण्डं विलोठयन् ! ।
हव्यं विक्षेपयन् व्योम्नि, कर्कोटोऽभञ्जयन्मखम् ॥ २३८ ॥

एवं नागैर्मखे भग्ने, मोचितान् नृपतिर्नरान् ।
यावत् पश्यति तावद् भूकम्पः कोऽप्यभवत्तराम् ॥ २३९ ॥

कम्प्रेषु गिरिशृङ्गेषु, क्षणान्निर्घातपूर्वकम् ।
ददर्श भूमेर्निर्यातं, नृपतिर्यातुधानकम् ॥ २४० ॥

दु० व्या०—यातुधानकम्—राक्षसम् ॥ २४० ॥

दीर्घदन्तं प्रलम्बोष्ठं, रौद्रास्यं रक्तलोचनम् ।
करे धृतासृगापूर्णचषकं खड्गधारिणम् ॥ २४१ ॥

पीनकुक्षिं महाभीष्मं, नवतालप्रमाणकम् ।
तं दृष्ट्वैव पलायिष्ट, कर्कोटः सपरिच्छदः ॥ २४२ ॥ युग्मम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यज्ञमुक्ता नरास्तेऽपि, कम्प्राङ्गास्तन्निरीक्षणात् ।
स्थगीभूता युताः सर्वे, भूपालं शरणं ययुः ॥ २४३ ॥
भूपोऽपि पृष्टे तान् न्यस्य, स्थितः खड्गधरः पुरः ।
मुञ्चन् मुखेऽनलज्वालामूचे तं च निशाचरः ॥ २४४ ॥
रे दुरात्मन् दुराचार !, रे रे ! ! मानवकीटक ! ।
अध्वरं मम विध्वस्य, क्व प्रयास्यसि मूढधीः ? ॥ २४५ ॥
यज्ञे जुह्वत्यमी विप्रास्तृप्तिर्मे जायते पुनः ।
याज्ञिकान् मम वित्रास्य, क्व प्रयास्यसि मूढधीः ? ॥२४६॥
तार्क्ष्यस्येव ममालोकान्नागैः सर्वैः पलायितम् ।
त्वं काक इव दृष्टोऽथ, क्व प्रयास्यसि मूढधीः? ॥ २४७ ॥
अहं चेन्न त्वया दृष्टस्तदा नाम्नाऽपि न श्रुतः ।
महाकाला[1]भिधः कालः, कीनाशस्य सहोदरः ॥ २४८ ॥
अद्यापि मे नरान् हव्यान्, देहि पृष्टे स्थितानिमान् ।
न चेन्मौलिं लविष्यामि, खड्गेनैतेन तत्क्षणात् ॥ २४९ ॥
क्षोणीपतिस्ततः स्माह, पलादं प्रति सस्मितम् ।
ददामि जीवितं तेऽपि, नाहं शरणमागतम् ॥ २५० ॥
जल्पन्ति चाल्पं ये धीराः, कातरा बहुभाषिणः ।
इति क्रुद्धो दधावेऽथ, नृचक्षा नृपतिं प्रति ॥ २५१ ॥
खड्गखेटकभृद् भूपप्रेरितश्चेटकस्तदा ।
योद्धुं डुढौके क्रव्यादस्तं विजिग्ये च तत्क्षणात् ॥ २५२ ॥
तादृक् तुङ्गपलादेन, सह योद्धुमथोच्छ्रितम् ।
चेटकोऽपीदृशस्कन्धमारोपयदिलापितम् ॥ २५३ ॥
खड्गाखड्गि रणे जायमाने बाढं तयोश्चिरम् ।
क्षोणीपतिप्रहारेण, पृथिव्यां राक्षसोऽपतत् ॥ २५४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हा हतोऽस्मि हतोऽस्मीति, क्रन्दन्तं तं जगौ नृपः ।
निस्त्रिंशेन मया बाढं, दुःखितोऽस्ति हहा ! भवान् ॥२५५॥

तमवादीत् पलादोऽपि, त्वं दयालुशिरोमणिः ।
न छिन्नं यदि मे शीर्षं, करालकरवालतः ॥ २५६ ॥

कृपालो ! हन्तु घातेन, दुःखितश्च बुभुक्षितः ।
भक्ष्यं पेयं किमप्यस्मै, यच्छ वत्सलचेतसा ॥ २५७ ॥

भूपः प्रोचे फलं देयं, जलं वा सोऽप्यभाषत ।
नृमांसशोणितास्वादाः, पलादास्त्वं न वेत्सि किम् ! ॥२५८॥

द्वित्रान् द्वौ वा नरं चैकं, देह्येतेषु नरेश्वर ! ।
नृपोऽवक् संकथां मुञ्च, जीवहिंसापथोचिताम् ॥ २५९ ॥

सोऽवक् प्राणाः प्रयास्यन्ति, प्रहारेण क्षुधा च मे ।
परं कृपायास्ते देव !, दास्यते हि जलाञ्जलिम् ॥ २६० ॥

सत्यमेतदिति क्ष्मापस्तं जगौ तन्निजाङ्गतः ।
जाङ्गलं शोणितं किञ्चिद्, ददे रक्षस्तमब्रवीत् ॥ २६१ ॥

ममेदृक् प्रौढदेहस्य, तेन स्वल्पेन किं भवेत् ? ।
अस्माकं नरमप्येकं, विना का तृप्तिरुच्यताम् ! ॥ २६२ ॥

जगौ सत्त्वधरो राजा, सत्त्वरक्षाकरः परः ।
उत्तिष्ठ भो ! मया देहः, सकलः कल्पितस्तव ॥ २६३ ॥

तत्क्षणादुत्थितं रक्षो, जन्तुरक्षोद्यतं नृपम् ।
स्माह साहसमेतद्धि, किमर्थं क्रियते त्वया ? ॥ २६४ ॥

दत्त्वैषु नरमप्येकं, त्वं राज्यं सुचिरं कुरु ।
भूपोऽवक् किमु राज्येन, तेन जीववधो यदि ॥ २६५ ॥

रक्षो जगौ वयं देवा देवानामनलो मुखम् ।
तदूर्ध्वस्थस्य मे स्कन्धमारुह्य त्वं पताऽनले ॥ २६६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वह्निकुण्डहुतं पक्वं, त्वामश्नामि ततः स्वयम् ।
इत्युक्ते नृपतिः सिंह इव तत्राधिरूढवान् ॥ २६७ ॥

स्थगीभृति हहाकारे, यावत् पतति भूपतिः ।
तावन्नयज्ञमद्राक्षीन्न रक्षो न च तान् नरान् ॥ २६८ ॥

तस्मिन्नेव च कान्तारे, सुप्तौ सिद्धस्थगीधरौ ।
स्वापस्थानेऽस्यमूर्द्धस्थं, वीक्ष्य चासौ विसिष्मिये ॥ २६९ ॥

स्वप्नं किमिन्द्रजालं वेत्येवं चिन्तयतोऽम्बरात् ।
पुष्पवृष्टिरभूत् तस्य, शीर्षे जयरवैर्युता ॥ २७० ॥

चलत्कुण्डलहारार्द्धहारमण्डलभूषिते ।
ऊभे शुभे नभोदेशे, निरैक्षिष्ट नृपः स्त्रियौ ॥ २७१ ॥

के युवामिति तेनोक्ते, तयोरेकाऽवदन्नृपम् ।
शृणु सौधर्मकल्पेऽस्ति, सौधर्मेन्द्रसुरेश्वरः ॥ २७२ ॥

प्रेक्षणप्रेयसी प्रेक्षाप्रेङ्खा प्रेङ्खोलनादिभिः ।
लीलाविशेषैर्नो वेत्त्यनेहसं गतमप्यसौ ॥ २७३ ॥

दु० व्या०—प्रेङ्खा—हिंडोलका । अनेहसं—कालम् ॥ २७३ ॥

शतकोटिस्फुरत्पाणेः, कोटिसङ्ख्याऽप्सरःपतेः ।
हरिणीहारिणीनाम्न्यौ, तस्यावामपि वल्लभे ॥ २७४ ॥

दृष्ट्वा तमुग्रधन्वानं, धुन्वानं मौलिमन्यदा ।
शचीप्रभृतयः स्माहुः, शुद्धान्तस्थं सविस्मयम् ॥ २७५ ॥

दु० व्या०—उग्रधन्वानं—इन्द्रम् ॥ २७५ ॥

दृष्टं देव ! किमाश्चर्यं, यदेवं धूयते शिरः ।
महेन्द्रोऽवग् महाश्चर्यहेतुर्विजयभूपतिः ॥ २७६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टापदं गतेनासौ, मयाऽलोकि स्वयं प्रियाः ।
अनेकेऽपि गुणा यस्मिन्नेकस्मिन्नपि संस्थिताः ॥२७७॥

वर्ण्यते जन्तुरक्षाऽस्य, श्रितावात्सल्यमेव वा ।
सौशील्यं वेति तस्योक्तं, समस्ता मेनिरे प्रियाः ॥ २७८ ॥

अश्रद्दधाने तथावामिहागत्य दिवि स्थिते ।
खेचर्यालापमश्रौष्ट, तव सौशील्यशालिनः ॥ २७९ ॥

तस्यां गतायामावाभ्यां, सेयं माया व्यरच्यत ।
आप्तं ते चेटकं बद्ध्वा, रूपं तस्यापि दर्शितम् ॥ २८० ॥

राजन् ! संप्रत्यमी यज्ञा, न भवन्ति भुवस्तले ।
भविष्यन्ति च कालेन, भवितव्यनियोगतः ॥ २८१ ॥

धिग् धिक् कुर्वन् नृपः स्माह, कः पापस्तान् करिष्यति ।
सा जगौ शृणु विख्याता, विद्यते पूर्वाराणसी ॥ २८२ ॥

सुभद्रासुलसे तत्र, स्वसारौ वेदकोविदे ।
पारिव्राज्यधरे वादसादरे च भविष्यतः ॥ २८३ ॥

ते श्रुत्वा याज्ञवल्क्याख्यः, परिव्राड् दूरदेशतः ।
तत्राऽऽगन्ता विवादार्थी, शास्त्रं कस्येह जीर्यति ॥ २८४ ॥

लालसा सुलासा शास्त्रे, दासत्वपणबन्धतः ।
विवादं कुर्वती तेन, भूपसंसदि जेष्यते ॥ २८५ ॥

सत्यप्रतिज्ञा सा दास्यं, ततस्तस्य करिष्यति ।
तदास्यं पश्यतो नित्यमस्य चेतश्चलिष्यति ॥ २८६ ॥

दु० व्या०—तत्—आस्यम् ॥ २८६ ॥

भ्राम्यन्ती परितो वातोर्मिके वापि स्थिरं क्षणात् ।
नितम्बिनी मनक्त्येव, योगिनोऽपि मनस्तरुम् ॥ २८७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धातूनां द्रावणात् पुण्यपण्यानां दहनात् पुनः ।
कृशानुश्च कृशाङ्गी च, मन्येते द्वौ सहोदरौ ॥ २८८ ॥

इतस्तस्तः स्मराकूतस्यूतवाक्यं विलोक्य तम् ।
साऽपि चापलतामाप्ता, सुमचापसमुद्भवाम् ॥ २८९ ॥

दु० व्या०—आप्ता—प्राप्स्यति ॥ २८९ ॥

परस्परं परिष्वङ्गपरावेतौ ततः परम् ।
आत्मयोनिरसव्यग्रावात्मजं जनयिष्यतः ॥ २९० ॥

जातमात्रममुं हित्वा, बालं तत्रैव बालिशौ ।
जनानां हास्यतो भीतौ, तं देशं तौ च हास्यतः ॥ २९१ ॥

सुलसायाः स्वसा प्रातरायाता तत्र तं शिशुम् ।
वीक्ष्य तौ चानवेक्ष्यासौ चिन्तयिष्यति चेतसि ॥ २९२ ॥

स्वसुर्मुखानुसारेण, तत्पुत्रो मन्यते ह्यसौ ।
हित्वाऽमुं तौ ध्रुवं नष्टौ, ह्रीणौ कामविडम्बितौ ॥ २९३ ॥

अनङ्गेनापि हेऽनङ्ग !, त्वया विश्वं विडम्बितम् ।
तदा किं नाम जायेत, साङ्गत्वं यदि ते भवेत् ॥ २९४ ॥

पिप्पलाधः स्थितं तस्य, पिप्पलस्य फलादनात् ।
पिप्पलादेति जल्पन्ती, तं लात्वा सा चलिष्यति ॥ २९५ ॥

स्वस्थानमागता सेयं, वर्धयन्ती तमर्भकम् ।
समये सकला विद्याः, वेदाद्याः शिक्षयिष्यति ॥ २९६ ॥

क्रमात् तारुण्यमाप्तोऽसौ, पिप्पलादेति नामभाक् ।
वादीन्द्रो विश्वविख्यातो, भूपमान्यो भविष्यति ॥ २९७ ॥

निजाङ्गजमजानानौ, श्रुत्वा वादीश्वरं मदात् ।
सुलसायाज्ञवल्क्यौ तं, जेतुं तत्रागमिष्यतः ॥ २९८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विदधानौ महावादं, राजसंसदि तेन तौ ।
जेष्यते हेलया नव्यहस्तिना जीर्णहस्तिवत् ॥ २९९ ॥
विषण्णौ लज्जितौ वीक्ष्य, वक्ष्येते तौ सुभद्रया ।
किमेवं खिद्यते युष्मत्पुत्रः सैष तदोज्झितः ॥ ३०० ॥
ततस्तौ मुदितौ मूर्खौ, जनाग्रे कथयिष्यतः ।
स्वपुत्रजितयोः का नौ, त्रपा प्रत्युत गौरवम् ॥ ३०१ ॥
तच्छ्रुत्वा पिप्पलादोऽपि, क्रुद्धोऽन्तश्चिन्तयिष्यति ।
दुष्कर्म कुरुतः पापौ, पुनः कथयतः स्वयम् ॥ ३०२ ॥
दुष्कर्म कृत्वा हित्वा मां, विदेशं गतयोस्तयोः ।
अद्य सङ्गतयोः कुर्वे, प्रायश्चित्तं कथं कथम् ? ॥ ३०३ ॥
ध्यात्वेति तद्वधोपायान्, नव्यान् वेदान् विधास्यते ।
लेखयित्वा रहश्चैतान्, नृपाग्रे वाचयिष्यति ॥ ३०४ ॥
गवाश्व च्छाग मेधादीन्, नृ-मातृ पितृमेधकान् ।
स्थापयित्वा फलं वक्षत्यसौ स्वमतिकल्पितम् ॥ ३०५ ॥
नृपेणानुमतः सोऽथारप्स्यते तान् महामखान् ।
प्राप्ते चावसरे तौ स पितरौ तत्र नेष्यति ॥ ३०६ ॥
एतौ मत्पितरौ राजन् !, पितृमेधे निहन्म्यहम् ।
इत्युक्त्वा तर्जनापूर्वं, खण्डशस्तौ स होष्यति ॥ ३०७ ॥
प्रवर्तयिष्यते लोके, पिप्पलादः पलादवत् ।
मखांस्तान् केचिदज्ञाताः, प्रथयिष्यन्त्यमूनपि ॥ ३०८ ॥
इति केवलिनां पार्श्वेऽस्माभिः श्रुतमिलापते ! ।
त्वं धन्योऽसि परं यस्य, दया विश्वत्रयाद्भुता ॥ ३०९ ॥
अथ याचस्व किञ्चित् त्वममोघं देवदर्शनम् ।
सोऽवक् किं याच्यते सर्वश्रेयोहेतुः कृपाऽस्तु मे ॥३१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैवं चेदुच्यतां ज्ञानाद्, वलिता मे प्रिया कदा ।
साऽवादीदेकमासेन, त्वत्कान्ता ते मिलिष्यति ॥३११॥
पञ्चमे वासरे वैरिजयोपायं तु लप्स्यसे ।
इत्युक्त्वा तं पुनर्नत्वा, स्तुत्वा ते भेजतुर्दिवम् ॥ ३१२ ॥
अथ भूपो विशश्राम, पार्श्वे सिद्धस्थगीभृतोः ।
समये तत्यजुर्निद्रां, ते त्रयोऽपि ततः प्रगे ॥ ३१३ ॥
कृते कृत्ये प्रभातार्हे, दत्त्वाऽशीर्वादमादरात् ।
विधासिद्धोऽचलद् व्योम्ना, तौ चोत्तरदिशं प्रति ॥३१४॥
घस्रेऽथ पञ्चमेऽजस्रं, यान्तौ तौ क्वापि पर्वते ।
अपश्यतां स्फुरद्रत्नमन्दिरं क्षुद्रपत्तनम् ॥ ३१५ ॥

दु० व्या०–क्षुद्रः–लघुः ॥ ३१५ ॥

स्थगीभृता युतो यावद्, याति राजा पुरान्तिकम् ।
उत्पश्यावभ्यधावेतां, तावद् द्वौ सुन्दरौ नरौ ॥ ३१६ ॥
अहोभाग्यमहोभाग्यमागान्नागेन्द्रनन्दनः ।
तयोः प्रणमतोरेवमेकं शीघ्रं पुरं ययौ ॥ ३१७ ॥
उत्सवात् सम्मुखायातपुराधीशेन तत्क्षणात् ।
स्वसौधं विजयो निन्ये, विनयोज्ज्वलभक्तिना ॥ ३१८ ॥
रत्नौकःपत्तनं लोकं, हारकुण्डलभूषितम् ।
भक्तिं च भूयसीं प्रेक्ष्य, बाढं चित्रं दधौ नृपः ॥ ३१९ ॥

दु० व्या० -ओकः–गृहम् ॥ ३१९ ॥

गौरिभिः स्नपितो गौरगौरवेण गरीयसा ।
बुभुजे भूपतिः साररसाद् युक्तः स्थगीभृता ॥ ३२० ॥
क्षणं विश्रम्य पल्यङ्के, प्रबुद्धेऽस्मिन् पुराधिपः ।
अढौकयत् पुरश्चारुहारचीरादि भूरिशः ॥ ३२१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रोचे तं विजयः कस्माद्, भक्तिरेवं विधीयते ? ।
स जगौ गौरवं सर्वं, स्वार्थे देव ! यतः शृणु ॥ ३२२ ॥
पुरी चमरचञ्चाऽस्ति, वैताढ्ये विद्यया बली ।
पुरा महाबलस्तत्र, सुत्रामेवाधिपोऽभवत् ॥ ३२३ ॥
खेचरीणां सहस्राणि, परिणिन्ये स खेचरः ।
परं संप्राप नापत्यं, दुष्कर्म प्रति कः प्रभुः ! ॥ ३२४ ॥
इतश्च वसुधापीठे, पुरे तिलकसंज्ञया ।
महेन्द्रोऽभून्नृपस्तस्य, सुन्दरी नामतः प्रिया ॥ ३२५ ॥
अन्येद्युः पूजितो राज्ञा, तद्दिदृक्षाकुतूहली ।
आदर्शे मुखदर्शिन्या, नारदः कोपितस्तया ॥ ३२६ ॥
ततश्चमरचञ्चायां, महाबलसभां गतः ।
मुनिः सम्मानितस्तेन, प्रोचे प्राञ्जलचेतसा ॥ ३२७ ॥
अवकेशिष्विव फलं, नापत्यं खेचरीष्वहम् ।
प्राप्तं ततस्त्वया क्वापि, दृष्टा सल्लक्षणा वधूः ॥ ३२८ ॥

दु० व्या०—अवकेशिषु—अफलवृक्षेषु ॥ ३२८ ॥

धरायां तिलकपुरे, महेन्द्रस्य धरापतेः ।
प्रिया सल्लक्षणाऽस्तीति, मुनिः प्रोच्य ययौ नभः ॥३२९॥
पूरयित्वा रुषं याते, तस्मिन् दध्यौ स खेचरः ।
पुत्रार्थं तां हरिष्यामि, विद्यायां तूच्छिदा न मे ॥ ३३० ॥

दु० व्या०—उच्छिदा—उच्छित्तिः ॥ ३३० ॥

अथो विमानमारुह्य, तां प्रसह्य नृपः स्त्रियम् ।
आदाय वलितोऽयोध्यापुरोपरि चचाल सः ॥ ३३१ ॥
शक्रावतारतीर्थस्योपरिष्टाद् यानमस्खलत् ।
श्रेयो हि प्रतिबध्नाति, पूज्यपूजाव्यतिक्रमः ॥ ३३२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धरणेन्द्रस्तदा नन्तुमागतो वृषभप्रभुम् ।
सुन्दर्या रुदितं श्रुत्वा, खगं दृष्ट्वा शशाप तम् ॥ ३३३ ॥

विद्याभ्रंशोऽस्तु सन्ताने, तवान्यायविधायिनः ।
श्रुत्वा स हृष्टो दूनश्चापत्यविद्याप्तिनाशतः ॥ ३३४ ॥

दु० व्या०—अपत्याप्तिविद्यानाशः ॥ ३३४ ॥

तूर्णं विमानादुत्तीर्णस्तं चटुक्त्या मुहुर्नमन् ।
प्राञ्जलिः प्राञ्जलीचक्रे, नागं नागमतीव स ॥ ३३५ ॥

दत्तः शापोऽन्यथा न स्यात्, किन्तु मत्पुत्रतः पुनः ।
सर्वविद्याः स्फुरिष्यन्ति, सन्ताने सप्तमे तव ॥ ३३६ ॥

आकर्ण्येति फणीन्द्रस्य, वाचं किञ्चिन्मुदः पदम् ।
जिनं ननाम मोक्षारितापदं स गतापदम् ॥ ३३७ ॥

खेचरं शपतेऽहीन्द्रः, सुन्दरीं तु न रक्षति ।
जन्तोः कर्मपरीपाके, प्रभोरपि मतिभ्रमः ॥ ३३८ ॥

महाबलस्तामबलामादाय स्वपुरं गतः ।
रङ्गतः प्रेयसीं कृत्वा, भेजे प्रेमतरङ्गतः ॥ ३३९ ॥

दैवयोगादभूत् तस्याः, सुतस्तस्याथ शङ्करः ।
न्यायोऽन्धकण्टकी ज्ञेयो, ह्यन्यायेऽपि यदीप्सितम् ॥ ३४० ॥

नागशापानुभावेन, हीनविद्यं शनैः शनैः ।
सीमाश्रयो निरासैनं, वज्रदाढस्य पूर्वजः ॥ ३४१ ॥

राज्ये चमरचञ्चायास्तेनास्ते स महाबलः ।
सकुटुम्बः कदम्बाख्यशैलेऽस्मिन् वासमातनोत् ॥ ३४२ ॥

अलिखत् पुस्तके विद्याः, सर्वाः स च विचक्षणः ।
सप्तमो नीलवन्नामा, तस्य सान्तानिकोऽस्म्यहम् ॥ ३४३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बभाषेऽहं निमित्तज्ञं, किमेतदसमञ्जसम् ।
देवानां निरपत्यत्वे, भावी नागसुतः कथम्? ॥ ३४४ ॥

तेनोक्तं धरणेन्द्रस्य, प्रतिपन्नसुतो भुवि ।
राजाऽस्ति विजयो जह्नू, वज्रदाढेन तत्प्रिया ॥ ३४५ ॥

अत्रैष्यति भ्रमन्नेष वाञ्छिताप्तिस्ततो हि वः ।
तस्यागमदिने सैष सहकारः फलिष्यति ॥ ३४६ ॥

गृहाङ्गणेऽफलश्चूतः, फलितोऽद्य निरीक्षितः ।
त्वद्दर्शनेन मे देव !, फलन्त्वथ मनोरथाः ॥ ३४७ ॥

साधयाऽऽशु स्वयं विद्या एताः पुस्तकसंस्थिताः ।
ततः प्रसादयास्माकमाकलय्य यथोचितम् ॥ ३४८ ॥

इति तद्गिरमाकर्ण्य, हृदि दध्यौ महीपतिः ।
एतदर्थमहं मन्ये, नागेन्द्रेण विलम्बितम् ॥ ३४९ ॥

तैस्तैरथोपहारैर्द्राग्, नीलवन्मुख्यमेलितैः ।
अष्टोत्तरशतं विद्याः, स साद्धुं समभुद्यतः ॥ ३५० ॥

कदम्बकन्दरे कुण्डं, कृत्वाऽकृशकृशानुयुक् ।
विद्यास्ताः स्मरतस्तस्य, युगपत् समुपस्थिताः ॥ ३५१ ॥

अथ सत्त्वपरीक्षार्थं, जगुस्ता भूपमर्वताम् ।
अष्टोत्तरशतं यच्छ, वत्स ! सिद्धिं यदीच्छसि ॥ ३५२ ॥

ऊचेऽसौ जीवहिंसायां, मातरः सोऽस्मि कातरः ।
अनयाऽलं ततः कुर्वे, मधुक्षीरघृताहुतीः ॥ ३५३ ॥

ऊचुस्तानेति चेत् तर्हि, चतुर्विंशतिवाजिनः ।
द्वात्रिंशल्लक्षणं चैकं, नरं देहि मुदे हि नः ॥ ३५४ ॥

दु० व्या०–नोऽस्माकं मुदे ॥ ३५४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हर्षो यो जीवहत्याभिर्जायते तेन पूर्यताम् ।
किं तेन क्रियते हेम्ना, त्रुटतः श्रवणौ यतः ॥ ३५५ ॥

विना मांसाहुतिं चित्ते, चेन्न तृप्तिस्तदा स्वयम् ।
ददे स्वतनुखण्डानि, हुत्वा तावन्ति पावके ॥ ३५६ ॥

ओमित्युक्ते नृपस्ताभिः, स्थिताभिः परितो रयात् ।
जुहाव यावद् द्वात्रिंशत्खण्डानि ज्वलितानले ॥ ३५७ ॥

अहो ! तावन्महासत्त्वमित्युक्तिमुखराननाः ।
तदङ्गं विविशुर्विद्याः, सोऽथ सूर्य इवाशुभत् ॥ ३५८ ॥

स्थगीभृन्नीलवन्नीलनलहेमन्तकादयः ।
प्राप्य श्रीविजया विद्या दीपाद् दीपा इवाबभुः ॥ ३५९ ॥

भूरिभिर्भेरिभाङ्कारैर्जनयन् बधिरं जगत् ।
विमानाच्छादितव्योमा, सोऽचलद् वैरिणं प्रति ॥ ३६० ॥

वैताढ्यगिरिमाक्रम्य, निर्जितान्तरखेचरः ।
सैन्यं निवेश्य स प्रैषीद्, द्विषे दूतं स्थगीभृतम् ॥ ३६१ ॥

गत्वा चमरचञ्चायां, वज्रदाढमयं जगौ ।
राजा विजयचन्द्रस्त्वामाज्ञापयति मान्यगीः ॥ ३६२ ॥

सत्वरं स्वयमागत्य, प्रत्यर्पय मम प्रियाम् ।
सोढः प्रौढतरोऽप्येकस्तव मन्तुरयं मया ॥ ३६३ ॥

मायाविना त्वया जह्रे, स्वानुवृत्या प्रिया मम ।
अहं प्रत्याहराम्येतामपि विश्वस्य पश्यतः ॥ ३६४ ॥

नीलवत् पूर्वजानां च, पुर्या चमरचञ्चया ।
गर्वीयसि कथं निःस्वो यथापरविभूषणैः ॥ ३६५ ॥

राज्यजीवितयोर्वाञ्छा, हृदि ते यदि तद् ध्रुवम् ।
पुरीं नीलवते देहि, मह्यं देवीं सुलोचनाम् ॥ ३६६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वज्रवद् वज्रदाढोऽथ, वाढं स्फूर्जथुकल्पया ।
गिराऽवोचदसङ्कोचलोचनः कोपरोपतः ॥ ३६७ ॥

दु० व्या०—स्फूर्जथुः—वज्रघोषः ॥ ३६७ ॥

कोऽयं विजयचन्द्रो यः, स्थिते मद्भुजपञ्जरे ।
क्रष्टुमिच्छेत् पुरीदेव्यौ, हरिदन्तामिषं यथा ॥ ३६८ ॥
दूतोऽवग् दुष्टदैवेन, रे ! त्वं नूनं कटाक्षितः ।
विजयं धरणेन्द्रस्य, पुत्रं यदवमन्यसे ॥ ३६९ ॥
सुप्तो जागरितः सिंहो, दण्डेनोत्थापितः फणी ।
प्राप्तो विजयचन्द्रोऽयं, त्वं नूनं मलयं गतः ॥ ३७० ॥
एनं बध्नीत बध्नीतेत्येवं जल्पति वैरिणि ।
भुजाभ्यां तद्भटान् क्षिप्त्वोत्पेते दूतेन विद्युता ॥ ३७१ ॥
परासत्र परिस्फुर्जज्ज्योतिर्विद्योतिताम्बरः ।
स्वर्गीधरः क्षणादेव, क्षोणीनाथं तदूचिवान् ॥ ३७२ ॥
दूतप्रदर्शिताश्चर्यैरितश्च सचिवैः समम् ।
वज्रबाहुर्लघुभ्राता, वज्रदाढं व्यजिज्ञपत् ॥ ३७३ ॥
आतनोति परं पापं, परस्त्रीहरणं हि यत् ।
तस्याः प्रत्यर्पणादेव, देव ! तत् त्यज सांप्रतम् ॥ ३७४ ॥
तद्दूताच्चेद् पराभूतिः, पराभूतिः कुतस्तव ।
विचारय ततो बन्धो !, ततो बन्धो वधोऽथवा ॥ ३७५ ॥

दु० व्या०—पराभवः पक्षे पराकृष्टा भूतिः ॥ ३७५ ॥

फणी यथा पयः पीत्वा, विषोद्गारं विमुञ्चति ।
पीततद्वाक्पया एवं, व्यसृजद् गिरमग्रजः ॥ ३७६ ॥
शत्रुपाक्षिकमायाविन् !, मा यासीर्दृक्पथं मम ।
तुभ्यं श्रेति ससैन्योऽयं, शिश्रिये विजयं नृपम् ॥ ३७७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेन सम्मानितस्तूर्णं, सगौरवमयं जगौ ।
दर्शये शूरभूमिं ते, समराय समं परैः ॥ ३७८ ॥

विजयः कौतुकादल्पतन्त्रस्तेन सह व्रजन् ।
प्रासादं तुङ्गमद्राक्षीन्मध्ये मूर्तिं तथाऽर्हतः ॥ ३७९ ॥

एकतः साधुमूर्तिं च, क्रमलग्नैकखेचराम् ।
हेतुं पृष्टस्ततः स्माह, वज्रबाहुर्महीपतिम् ॥ ३८० ॥

इदं बालऋषेस्तीर्थं, तदैतिह्यं शृणु प्रभो ! ।
पुरे हिरण्यनाभाख्ये, सुवेगः खेचरोऽभवत् ॥ ३८१ ॥

भद्राकुक्षिभवस्तस्य, देवेन्द्र इति नन्दनः ।
मुनिचन्द्रमुनेः पार्श्वे, बाल एवाग्रहीद् व्रतम् ॥ ३८२ ॥

बालर्षिरिति विख्यातो, वैरङ्गिकशिरोमणिः ।
तपः स दुस्तपं कुर्वन्, कायोत्सर्गेऽथ तस्थिवान् ॥ ३८३ ॥

मिथ्यादृक् खेचरो हेमचूलस्तस्योपरि व्रजन् ।
स्खलितः कुपितो वीक्ष्य, मुनिं ताडयति स्म तम् ॥३८४॥

मुमुक्षोः सहमानस्योत्पेदे केवलमुज्ज्वलम् ।
बद्ध्वा सकसुरैरूचे, हेमचूलो व्यथाकुलः ॥ ३८५ ॥

प्रासादो जिनमूर्तिश्च, साधुमूर्तिः स्वमूर्तियुक् ।
विधाप्यतेऽत्र तन्मोक्षस्तव रे दुष्ट ! नान्यथा ॥ ३८६ ॥

प्रपन्ने स सुरैर्मुक्तोऽक्षामयन्मुनिपुङ्गवम् ।
तीर्थं व्यधापयच्चैतत्प्रभावोऽस्य निशम्यताम् ॥ ३८७ ॥

देवान् नत्वाऽत्र यो युद्धं, प्रस्तुतेऽस्य दिशि स्थितः ।
स नेन्द्रेणापि जीयेत, मल्लाभ्यां वा परीक्षय ॥ ३८८ ॥

दु० व्या०–प्रस्तुते–प्रारभते ॥ ३८८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परीक्ष्य सोऽथ साश्चर्यस्तत्र सैन्यं स्वमानयत् ।
चरितेऽत्र चरैरुक्ते, वज्रदाढो व्यचिन्तयत् ॥ ३८९ ॥

गृहीतं हि बलं भ्रात्राऽखिलं खलु खलेन मे ।
पशुर्वनस्पतेर्योगाच्छिनत्ति हि वनस्पतिम् ॥ ३९० ॥

अस्तु वाऽग्नियुताऽयोवत्, कुट्टयामि तमप्यहो ! ।
इति प्रकोपतः सोऽयं, रणभेरीरताडयत् ॥ ३९१ ॥

अथ तस्य बलं प्राज्यवाजिद्विपभटाकुलम् ।
वाचालीकृतदिक्चक्रमचालीत् तूर्यनिःस्वनैः ॥ ३९२ ॥

शकुनैः सचिवैश्चापि, वार्यमाणः स दुर्धरः ।
वज्रदाढोऽचलद् विद्याधरवीरविराजितः ॥ ३९३ ॥

विमानाग्रध्वजस्तोमच्छादितव्योममण्डलम् ।
चपलं तद्बलं प्राप, विजयानीकसंनिधिम् ॥ ३९४ ॥

सैन्यद्वयं रणायोत्कं, बभूव भुवनाद्भुतम् ।
सन्धिं विधातुमन्योऽन्यमक्षमेष्वथ मन्त्रिषु ॥ ३९५ ॥

शस्त्रजागरणं रात्रौ, कृत्वा सूरोदये भटाः ।
दधिरे कवचं बद्धरोमाञ्चकवचा अपि ॥ ३९६ ॥

करवालकराः केऽपि, केऽपि कुन्तधरा बभुः ।
केऽपि दण्डभृतः केऽपि, काण्डकोदण्डमण्डिताः ॥ ३९७ ॥

यावन्नृपो जिनं नत्वा, निर्याति जिनमन्दिरात् ।
नागेन्द्रं तावदद्राक्षीद्, युक्तं विजयया तया ॥ ३९८ ॥

तं प्रणम्य नृपः स्माह, वीक्ष्यं कौतुकमेव हि ।
प्राणान्तिकप्रहारस्तु, रक्ष्यस्तात ! त्वया मम ॥ ३९९ ॥

विजयाय वज्रमयं, विजया विजयश्रिये ।
तनुत्रं व्यतरद् विद्यां, हृद्यां च मृतजीवनीम् ॥ ४०० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ प्रथितवादित्रैर्वीराणां सैन्ययोर्द्वयोः ।
रणः प्रववृते देव !, नागेन्द्राकम्पकारणम् ॥ ४०१ ॥

तुरङ्गमखुरक्षुण्णोच्छलद्धूलिव्रजच्छलात् ।
काश्यपी कश्यपसुतं, सा कम्पेव तदा ययौ ॥ ४०२ ॥

दु० व्या—कश्यपसुतं—इन्द्रम् ॥ ४०२ ॥

कन्दरीवदनैस्तूर्यप्रतिध्वनितदम्भतः ।
भीरुवद् गाढदार्ढ्योऽपि, वैताढ्यो विरवं व्यधात् ॥ ४०३ ॥

रजोघने कृपाणेन, कस्यचिच्चपलायितम् ।
केनापि कातरेणाशु, हंसवच्चपलायितम् ॥ ४०४ ॥

दु० व्या०—चपला—विद्युत् तद्वदाचरितम् ॥ ४०४ ॥

कुण्डलीकृतकोदण्डकाण्डे सन्धानदम्भतः ।
शुशुभे सुभटः कश्चिज्जयलक्ष्मीकटाक्षितः ॥ ४०५ ॥

कश्चित् कुन्ताग्रभिन्नेभकुम्भोच्छलितमौक्तिकैः ।
अराजद् विजयश्रीणां, हारवल्लीं सृजन्निव ॥ ४०६ ॥

शरासारकृतः स्फारविस्फारस्फोटिताम्बरम् ।
वज्रदाढसुता हेमदन्ताद्या योद्धुमुत्थिताः ॥ ४०७ ॥

दु० व्या०—विस्फारः—धनुष्टङ्कारः ॥ ४०७ ॥

नीलवन्नीलमुख्यास्ते, लीलयैवानिला इव ।
घना घनानि घनानपि तान् दिक्षु चिक्षिपुः ॥ ४०८ ॥

अथ गाढरूपा वज्रदाढो दन्तान् निपीडयन् ।
दधावे द्विरदारूढः, शक्तिशस्त्रस्फुरत्करः ॥ ४०९ ॥

न वाजीनगजो नैव, पत्तिस्तत्पुरतः स्थितः ।
बलं विजयचन्द्रस्य, ममन्थाब्धिं स मेरुवत् ॥ ४१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थगीधरः स्थिरीकुर्वन्, स्वसैनिकभटावलीम् ।
बली बाणमिवायान्तं, शैलवत् तमचिस्खलत् ॥ ४११ ॥

चमरेन्द्रं पुराराध्यप्राप्तां शक्तिममुं प्रति ।
चिक्षेप स च साक्षेपं, वित्रस्ताखिलशात्रवीम् ॥ ४१२ ॥

नीलवज्राङ्गहेमन्ताः, कुन्ताँस्तामक्षिपन्नभि ।
वज्रबाहुगदाघातात्, परं सार्धबलाऽभवत् ॥ ४१३ ॥

इव शम्पाकृताकम्पा, सा पपात स्थगीभृतः ।
शीर्षे हाहारवे विश्वे, ज्योतिर्विद्योतिताम्बरा ॥ ४१४ ॥

टु० व्या०—शम्पा—विद्युत् ॥ ४१४ ॥

तं ज्वलन्तं नृपो वीक्ष्याकुलः कुर्यात् प्रतिक्रियाम् ।
यावत् तावच्छली शैलं, मुमोचास्योपरि क्षिपन् ॥ ४१५ ॥

छलेन घातिनीं दृष्ट्वा, राति स्फातिं फणीश्वरः ।
तूलवल्लीलया शैलमन्यतः, क्षिपति स्म तम् ॥ ४१६ ॥

विजया निजहस्ताब्जपवित्रीकृतवारिणा ।
सिक्तं शक्तिव्यथामुक्तं, क्षणाच्चक्रे स्थगीभृतम् ॥ ४१७ ॥

रणोत्थितरजोव्रातावगुण्ठित इवारुणे ।
मग्नेऽथ पश्चिमाम्भोधौ, तारकैः शीकरायितम् ॥ ४१८ ॥

सन्ध्याऽरुणप्रभापूरसिन्दूरभरभूषितः ।
उडुमुक्तालसत्कुम्भः, कालः कुम्भिकलां ललौ ॥ ४१९ ॥

दिदृक्षाऽपि न शूराणां, रणे यस्य कुतूहलात् ।
मत्वा स्वकान्ते कातर्यं, श्यामा श्यामाननाऽभवत् ॥४२०॥

वीरविध्वंसवीक्षोत्थप्रमोदमदमेदुरः ।
शनैः शनैश्च सर्वत्राभ्रमध्वान्तनिशाचरः ॥ ४२१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रणक्षुण्णशरीराणां, धीराणां स्वसुधारसैः ।
उपकर्तुमिव प्राच्यामुदियाय सुधाकरः ॥ ४२२ ॥

विद्ययाऽमृतजीविन्या, विजयः स्वपरानथ ।
कृपयोत्थापयामास, शूरान् समरमूर्च्छितान् ॥ ४२३ ॥

खेचरेन्द्रस्तदा दध्यौ, श्रुत्वा सज्जं स्थगीभृतम् ।
शक्त्याऽपि नारीसंहारः, किमाधारस्ततो मम ? ॥ ४२४ ॥

तत्पूर्वाराधितं कुर्वे, शरणं चमरासुरम् ।
निश्चित्येति चिरं रात्रौ, स्थिरध्यानस्तमस्मरत् ॥ ४२५ ॥

पीठाकम्पात्तमायातमयं प्राञ्जलिरालपत् ।
शक्तिस्तेऽप्यरिणा साऽस्ता, राहुणेव रविप्रभा ॥ ४२६ ॥

सान्निध्यं कुरु तत् तात !, शत्रुसंघातघातकृत् ।
तद्गिरेति प्रपन्नोग्रसमरश्चमरः स्थितः ॥ ४२७ ॥

उषसि द्विषतोः सैन्यद्वये सङ्ग्रामसादरे ।
असुरेन्द्रोऽसुरैर्युक्तो, डुढौके योद्धुमम्बरे ॥ ४२८ ॥

नानास्त्रधारिणो व्योम्नि, धरणेन्द्रोऽथ वीक्ष्य तान् ।
दधावे नागकोटीयुक्, सहस्रफणमण्डलः ॥ ४२९ ॥

नागानामसुराणां च त्रैलोक्येऽपि भयङ्करम् ।
रणं वीक्ष्योच्छ्रितभुजो, विजयो घोषणां व्यधात् ॥ ४३० ॥

नरो नागोऽसुरो वाऽपि, यो युद्धं कुरुतेऽधुना ।
सैष बालर्षितीर्थस्य, मान्यामाज्ञां विलुम्पति ॥ ४३१ ॥

तच्छ्रुत्वा मुक्तयुद्धेषु, वीरेषु वसुधावरः ।
वैरिणे मागधं प्रेष्याजिज्ञपत् कृपयाऽऽर्द्रहृत् ॥ ४३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं हतेन स्वसैन्येन, स्वयं जन्यं वितन्यते ।
प्रपन्ने तेन कोऽप्यासीदनयोर्दारुणो रणः ॥ ४३३ ॥

दु० व्या० -जन्यं-युद्धम् ॥ ४३३ ॥

कोदण्डकाण्डकुन्तासिशस्त्री सकवचा रिपोः ।
छित्त्वा शरैर्नृपो विश्वमपि चक्रे सविस्मयम् ॥ ४३४ ॥
खेटोऽथ विकटं प्रैसीदाग्नेयास्त्रं नृपं प्रति ।
स्वसैन्ये ज्वलति क्ष्मापो, वारुणास्त्रममुञ्चत ॥ ४३५ ॥
एवं वायव्यभौजङ्गं, गारुडं तामसं तथा ।
सौरं वैधुन्तुदास्त्रं च, तावन्योऽन्यममुञ्चताम् ॥ ४३६ ॥

दु० व्या०-सौरं-सूर्यास्त्रम् । वैधुन्तुदास्त्रं-राहवीयास्त्रम् ॥ ४३६ ॥

हीनोऽस्त्रशस्त्रैर्हीणश्च, वज्रदाढो विमूढधीः ।
दधावे बाहुयुद्धाय, क्रुधा दष्टोऽष्टपल्लवः ॥ ४३७ ॥
विश्वे सविस्मये भूपो, यावत् किमपि चिन्तयेत् ।
तावद् विमानमायासीद्, व्योम्ना विजिततापनम् ॥ ४३८ ॥
काऽपि रामाऽभिरामाङ्गी, विभूषाभिर्विभासुरा ।
मा युद्ध्येथां हहा वत्सौ !, वदन्तीति विनिर्ययौ ॥ ४३९ ॥
साश्चर्ये सकले वीरलोके सा समरक्षितौ ।
समेत्य समतासारगिरा प्राह प्रभू उभौ ॥ ४४० ॥
श्रूयतां धातकीखण्डद्वीपे वैताढ्यपर्वते ।
रत्नज्योतिःपुरे रत्नचूडाख्यः खेचरेश्वरः ॥ ४४१ ॥
तस्याहं वल्लभा रत्नमालिनी भावशालिनी ।
तीर्थङ्करं वज्रधरं नत्वाऽपृच्छं निजं भवम् ॥ ४४२ ॥
जिनोऽवादीदिह द्वीपे, दिदीपे स्वगुणैर्नृपः ।
कृपनाम्ना पुरे सुरपुरे स्वर्गपतिर्यथा ॥ ४४३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गान्धारीकुक्षिसंभूतौ, सुतौ तस्य बभूवतुः ।
चन्द्रश्च श्रीधरश्चैतौ, क्रमात् तारुण्यमापतुः ॥ ४४४ ॥

मृगयाव्यसनासक्तं, निघ्नन्तं कानने मृगान् ।
व्याघ्रो भूपं जघानैनमैनसं दर्शयन् फलम् ॥ ४४५ ॥

मन्त्रिभिर्बोधिता प्राणान्, जिहासुर्मासुरेऽनले ।
गान्धारी धर्ममर्मज्ञा, चन्द्रं राज्ये न्यवीविशत् ॥ ४४६ ॥

श्रीधरस्य प्रिया गौरी, गौरीवाभून्मनोहरा ।
सेवालनीलं गङ्गाम्बु, यस्याः शीलसमं न हि ॥ ४४७ ॥

क्रीडितुं कानने ऽन्येद्युर्व्रजन् वातायनस्थिताम् ।
चन्द्रश्चन्द्रमुखीमेतां, वीक्ष्य चित्ते व्यचिन्तयत् ॥ ४४८ ॥

कटरे रूपलावण्यस्फुटरेखामियं ययौ ।
धन्यः स मन्यते योऽस्याः, परिरभ्याधरं पपौ ॥ ४४९ ॥

भृत्याद् ज्ञात्वा वधूं बन्धोर्बन्धुराङ्गीमिमामसौ ।
स्वराज्यफलमस्यैव, मेने मलिनमानसः ॥ ४५० ॥

गत्वा वनं सभवनं, प्राप्तो व्याप्तो मनोभुवा ।
कदापि निर्जनं ज्ञात्वा, गौरी वासगृहं ययौ ॥ ४५१ ॥
साऽभ्युत्थाय तमायान्तं, ज्येष्ठं श्रेष्ठगुणाश्रया ।
विष्टरादिप्रदानेन, प्रतिपत्तिं वितेनुषी ॥ ४५२ ॥

स्माह स्मेरस्मरालापं, तं पापं सा पतिव्रता ।
न किं ते सुगुणक्षीरसिन्धोर्बन्धोरपि त्रपा ॥ ४५३ ॥
तद्गिरेति स निश्चिक्ये, निवृत्तोऽस्या निवासतः ।
नूनं मामीहते सेयं, शङ्कते किन्तु कान्ततः ॥ ४५४ ॥

सभामाशु समेत्यासौ, दम्भाद् भम्भामवीवदत् ।
तन्नादश्रवणादेव, मिमिलुः कोटिशो भटाः ॥ ४५५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगत्य श्रीधरोऽपि द्राग्, भूपमेवं व्यजिज्ञपत् ।
कोऽयं प्रयाणसंरम्भः, कस्योपरि नृपोऽब्रवीत् ॥ ४५६ ॥

समरः शबरेशोऽस्ति, सोऽस्मन्नीवृतिकण्टकः ।
तज्जयाय प्रयाणं मे, भ्रातः ! प्रोक्ते चैरर्नरैः ॥ ४५७ ॥

अनुजः प्राञ्जलीभूय, भूयः प्रायः भुवः पतिम् ।
कातरे भ्रातरे तस्मिन्, न ते भाति पराक्रमः ॥ ४५८ ॥

जेष्यामि तमहं तात !, नेष्यामि त्वदुपान्तिकम् ।
इत्यादिभक्तिभिस्तेनान्वमन्यत निजाग्रजः ॥ ४५९ ॥

अथासौ स्वगृहं गत्वा, गौरीं गौरवतो जगौ ।
यामि यात्रां कुरङ्गाक्षि !, स्थातव्यं सुखतस्त्वया ॥४६०॥

गौरी तं नाशकद् वक्तुं, नेत्राश्रुजलबिन्दुभिः ।
इयन्मात्रागमघस्त्रं, रेखास्तस्य बभार तु ॥ ४६१ ॥

टु० व्या०–घस्त्रं–दिनम् ॥ ४६१ ॥

विरोधभीत्या तज्ज्येष्ठवृत्तं हृदि दधानया ।
सगद्गदगिरा प्रोचे, कथञ्चिद् वल्लभस्तया ॥ ४६२ ॥

कौमुदी कौमुदीशेन, सौदामिन्यम्बुदेन च ।
साकं चलेत् कथं स्थातुमीहे नाथ ! त्वया विना ॥ ४६३ ॥

स जगौ निजगौरव्यगुणैस्त्वं हृदये मम ।
स्थिताऽसि कौमुदीमुख्यमेतत् किं गदितं त्वया ॥ ४६४ ॥

रुदतीमयमाश्वास्य, सुदतीमिति तां मुहुः ।
स्वसृमातृप्रदत्ताशीश्चचाल सह सेनया ॥ ४६५ ॥

मुदितो मेदिनीजानिरथ सेत्स्यन्मनोरथः ।
द्वित्रान् दिनानतिक्रम्य, चेट्या गौर्यै न्यवेदयत् ॥ ४६६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ चन्द्रोदये चन्द्रमुखि ! चन्द्रमहीपतिः ।
त्वदङ्गसङ्गभङ्गीषु, मरालायितुमेष्यति ॥ ४६७ ॥

यद् रम्यं तद् विधाताऽस्मीत्युक्त्वा चेटीं विसृज्य ताम् ।
गौरी व्यचिन्तयच्चित्तेऽतीवतीव्रसतीव्रता ॥ ४६८ ॥

हठादपि शठात्माऽसौ, शीलरत्नमलिम्लुचः ।
मम भावी ततः पत्युरेवानुगमनं वरम् ॥ ४६९ ॥

ध्यात्वेति सा निशावक्त्रे, विपक्त्रिमतमश्चये ।
पतिप्रयाणकाध्वानमाक्रामत् कोमलक्रमा ॥ ४७० ॥

रयाद् भयात् प्रयान्ती सा, निशायां वासरोऽपि च ।
अटव्यां सायमन्येद्युः, कञ्चिद् यक्षालयं ययौ ॥ ४७१ ॥

श्रान्ता सुष्वाप सा तत्र, पवित्रे यक्षसद्मनि ।
गुह्यकोऽसह्यकामश्चाभूत् तद्रूपनिरूपणात् ॥ ४७२ ॥

स कृताद्भुतशृङ्गारः, स्फारमारविकारवान् ।
व्याजहार मुखं पश्यन्नस्या निद्राणलोचनम् ॥ ४७३ ॥

अम्भोजलोचने निद्रां, मुञ्च मां द्राग् विलोकय ।
मन्मथव्यथितस्यास्य, सुभगे ! शरणं भव ॥ ४७४ ॥

निद्रादरिद्रनेत्रा सा, पश्यति स्म पुरस्सुरम् ।
विभूषाभासुरं चन्द्रवदना मदनातुरम् ॥ ४७५ ॥

स स्माहाश्लिष्य मां यक्षमुख्यमक्षतवैभवम् ।
भव भामिनि ! भूताऽपि, मनुष्येष्वमरी क्षणात् ॥ ४७६ ॥

स्मराम्भोधेस्तरी तारतारुण्यारण्यसद्मनि ।
त्वं कुरङ्गाक्षि ! कारुण्यं, कुरुष्व मयि तत्प्लुते ॥ ४७७ ॥

मन्यसे चेन्न मद्वाचमबले ! तद्बलादपि ।
एकान्ते कान्तवत् कान्तां, भजिष्ये त्वां स्ववेश्मगाम् ॥४७८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणोऽपि रूपं मे कूपं, पतत्विति विचिन्त्य सा।
संवृताङ्गी तमाह स्म, किमाचक्षेत यक्षराट् ॥ ४७९ ॥

सुराङ्गनाङ्कासारकेलीकरणलालसः ।
मनुष्यस्त्रीषु हा चुण्डीष्वमरः किमु रज्यति ? ॥ ४८० ॥

दु० व्या०—चुण्डिः—यामसरः ॥ ४८० ॥

जडेभ्यो दीयते शिक्षा, दक्षेभ्यस्तां ददाति कः ? ।
पुरः पूत्क्रियते कस्य, विबुधोऽपि त्वमीदृशः ॥ ४८१ ॥

स्मर्यन्ते स्वाङ्गरक्षायै, यक्षाद्यास्तेऽपि भक्षकाः ।
यदि हा ! तज्जगन्नष्टं, वृत्तिर्भक्षति कर्कटीम् ॥ ४८२ ॥

उवाच सचमत्कारः, स यक्षः शिक्षितस्त्वया ।
जय साध्वीशिरोरत्नशीलयत्नविशारदे ! ॥ ४८३ ॥

किङ्करः किं करोम्येष सांप्रतं सांप्रतं तव ।
सोवाच सविधं भर्तुर्मां नयस्व नयोज्ज्वल ! ॥ ४८४ ॥

दु० व्या०—सांप्रतं—युक्तम् ॥ ४८४ ॥

सोऽवक् चम्पासरस्तीरे, ससैन्योऽस्ति प्रियस्तव ।
आस्स्व मत्पाणियुगले, तत्र चेद् गन्तुमिच्छसि ॥ ४८५ ॥

दु० व्या०—आस्स्व—उपविश ॥ ४८५ ॥

सा जगाद करस्पर्शं, परपुंसः सहे नहि ।
सोऽवदत् तद्गुणं लाहि, बर्बाहो भव वारला ॥ ४८६ ॥

माननीयं वचस्तेऽस्तु, कान्तोपान्तं व्रज द्रुतम् ।
तथेति कृत्वा सोड्डीना, नभसा रभसाऽचलत् ॥ ४८७ ॥

पक्षस्वर्णं कषन्ती सा, विहायसि कषोपले ।
प्राप्य पम्पां पतिं प्रेक्षाञ्चक्रे सैन्यपरिष्कृतम् ॥ ४८८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यन्तं स्वर्णवर्णां तां, चलन्तीं लीलया पुरः ।
प्रिया प्रेमधरं चक्रे, श्रीधरं नयनद्वयी ॥ ४८९ ॥

तदादिष्टैस्ततो भृत्यैश्चिरं पृष्ठानुगैरपि ।
सा स्वं न धारयामास, चलचङ्क्रमनर्मणा ॥ ४९० ॥
तस्मिन्नथ समुत्थायानुगच्छति शनैरियम् ।
स्वयं कान्तसुखस्पर्शलालसा तत्करेऽचटत् ॥ ४९१ ॥

स तां कृत्वा कराम्भोजभूषणं त्यक्तदूषणम् ।
भेजे विष्टरमित्येषा, प्रोचे स्पष्टगिराऽचलम् ॥ ४९२ ॥

चञ्चद्राजकलारम्यविभूतिभरभूषितः ।
विभ्राजिष्णुमहासेनगौरीवर ! चिरं जय ॥ ४९३ ॥

दु० व्या०—राजपक्षे चन्द्रः, महासेनपक्षे कार्तिकेयः ॥ ४९३ ॥

अहो ! वैदग्ध्यभङ्गीति, पक्षिणामपि वीक्ष्यते ।
अस्तु वेयं कथं त्वेषा, वेद मे दयिताऽभिधाम् ॥ ४९४ ॥

विस्मितेन हृदा ध्यायन्नदस्तां श्रीधरोऽवदत् ।
पक्षिणीत्वेऽपि दक्षत्वविशेषं लभसे कथम् ? ॥ ४९५ ॥
नाविश्चिकीर्षुरात्मानं, तदा सा भङ्गितो जगौ ।
भारत्या यानहंसस्य, दयिता तेन वेद्म्यहम् ॥ ४९६ ॥

दु० व्या०—वेद—जानाति । अहं भारत्या यानहंसस्य दयिता, तेन हेतुना वेद्मि, पक्षे भारत्या वाण्या, याऽहं हंसस्य दयिता न, किन्तु ते—तव दयिता । काकूक्त्या अहं न वेद्मि किन्तु वेद्मि ॥ ४९६ ॥

श्रीधरोऽचिन्तयद् युक्तं, तत् कौशलमिहाखिलम् ।
या शृणोति सरस्वत्या, नित्यं प्रायः सरस्वतीम् ॥ ४९७ ॥
अथास्मिन् प्रश्ननिष्णाते, भवत्यूचे मरालिका ।
संपनीपद्यते चित्ते, स्वस्थ एवानवद्यधीः ॥ ४९८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदाकूतविदं कौतूहलाद् द्राक्षाफलादिकम् ।
भृत्यैरानाय्य यच्छन्तं, सा पुनस्तं समालपत् ॥ ४९९ ॥

एकाकिना न भोक्तव्यं, सारं वस्तु विवेकिना ।
कुरुष्व संविभागं मे, त्वमेते च सभासदः ॥ ५०० ॥

तथाकृते तैः कृतिभिस्तद्विवेकचमत्कृतैः ।
तद्भक्ष्यमाददे साऽपि, प्रतिपाणिस्थितं मुदा ॥ ५०१ ॥

यथेच्छमथापृच्छयाऽहं, बुधैरेवं तयोदिते ।
श्रीधरः स्माह मे तावत्, प्रश्नस्योत्तरमुद्गिर ॥ ५०२ ॥

श्रीधर उवाच—

पूजायां किं पदं प्रोक्तं, कृतज्ञो मन्यते च किम् ? ।
किं प्रियं सर्वलोकानामुपदेशो मुनेस्तु कः ? ॥ ५०३ ॥

हंसी—"सुकृतं कार्यम्" इत्युक्त्वा तमुवाच—

पश्यत्यपि जने कान्त !, कान्तावक्त्रं त्वमाकृपः ।
न लज्जा वीरलोकेऽभूत्, तव नित्यं विवेकिनः ॥ ५०४ ॥

दु० व्या०—पक्षे कान्ता कान्तिर्यस्य स तस्मिन् ॥ ५०४ ॥

श्रीधरः स्मित्वोचे—"अस्त्रम्" ।

अथ पुरोधाः प्रोचे—"यूकया गलितो गजः" ।

हंसी—

वटपत्रस्थबालस्योदरस्थं चेज्जगत्त्रयम् ।
तदाऽकस्मादिदं न स्याद्, 'यूकया गलितो गजः' ॥५०५॥

हंसी श्रीधरं प्रति—"पद्मस्योपरि सरोवरम्" ।

सोऽवादीत् श्रीधरः—

अहो ! विश्वस्य विस्तारः, सागरोऽयं महानपि ।
फणपत्रलभोगीन्द्र'पद्मोपरि सरोवरम्' ॥ ५०६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनः श्रीधरः—" विलोकयाम्यक्षरमालिकैषा " इत्याद्यं पदमाह ।

हंसो चाग्रतस्त्रीणि पदानि—

पत्री किमु प्रैपि तव प्रियेण,
नालं प्रमोदाश्रुविलोलनेत्रा ।
तद्वाचने त्वं ननु वाचयामि ॥ ५०७ ॥

श्रीधरमित्रं प्राह—" शिरोहीना सुलोचना " ।

हंसी—

क्रीडन्तीमम्बुधिक्रोडे, बेडां वीक्ष्यावदज्जनः ।
चित्रं पश्य तनौ रेखा, ' शिरोहीना सुलोचना ' ॥ ५०८ ॥

पुनः श्रीधरः स्माह—

अथात्र पाणिग्रहणक्षणं प्रति,
प्रणम्य शम्भुं जगतः पतिंवरम् ।
असातकर्मापहधर्मदेशना,

चतुर्थं पदं हंसी प्राह—

स्मरा अपीन्द्राः समयोचितं व्यधुः ॥ ५०९ ॥

दु० व्या०—शम्भुं—सर्वज्ञं ऋषभादिकम् ॥ ५०९ ॥

एवं सकौतुकं कृत्वा, कान्तयेव तया चिरम् ।
रत्नरुक्पिञ्जरे स्वर्णपञ्जरे तां न्यवीविशत् ॥ ५१० ॥

समरेरितदूतोऽथ, तत्रागत्य तमब्रवीत् ।
कुतः पूर्वमवैरेऽपि, मद्देशं क्लेशयस्यलम् ॥ ५११ ॥

स्वयं वोत्थापिते सर्पे, लभस्व समरे फलम् ।
क्रुद्धोऽथ श्रीधरः प्रोचे, प्रति दूतं महाभुजः ॥ ५१२ ॥

उत्तरं तावदाद्यं ते, वीरभोग्या वसुन्धरा ।
अन्यच्च त्वत्प्रभौ सर्पे, सर्पारातिरिहास्म्यहम् ॥ ५१३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गते दूतेऽगदन्मित्रमन्त्रिणः श्रीधरस्ततः ।
सा मतिः क्रियतां शत्रुर्जीयते लीलया यया ॥ ५१४ ॥

कार्यं सिद्धयति यद्बुध्या, तन्न प्रायः पराक्रमैः ।
वने सिंहः शशेनापि, यद् बुद्ध्यैव निपातितः ॥ ५१५ ॥

अथ तैरुच्यमानासु, नानाबुद्धिषु नो पुनः ।
यान्तीषु सङ्गतिं सम्यग्, हंसी मृदुगिराऽलपत् ॥ ५१६ ॥

अपृष्टैर्नोच्यते प्रायः, पृष्टे सति निगद्यते ।
स्वर्णकुन्तं क्षिपत्यङ्के, मतिं यच्छन् निरादरे ॥ ५१७ ॥

अपि स्त्रीणां मतिं प्राहुः, पार्ष्णिगां न विशारदः ।
शारदाऽपि यतः स्त्रीषु, विश्वस्य मतिसारदा ॥ ५१८ ॥

दु० व्या०—मतिसारं—तत्त्वम् ॥ ५१८ ॥

श्रीधरे सादरं पृच्छत्याह सा दरवर्जिता ।
कृत्वा मत्स्यगलन्यायं, निगृहाण रणे रिपुम् ॥ ५१९ ॥

गलं क्षिप्त्वा यथा मीनं, महान्तमपि मैनिकः ।
जलादाकृष्य गृह्णाति, तथाऽत्रापि विधीयताम् ॥ ५२० ॥

स्वयमत्र स्थितः शत्रोः, पल्लीं प्रति कियद् बलम् ? ।
प्रेषयस्व स तद्वीक्ष्य, निर्जेतुं निर्गमिष्यति ॥ ५२१ ॥

भग्ने पलायितुं लग्ने, त्वद्बलेऽसौ बलोद्धतः ।
श्रीधरः कुत्रकुत्रेति, जल्पन् गर्वमुपैष्यति ॥ ५२२ ॥

यावज्जिताहवंमन्यः, सैन्यपृष्ठिं करोत्यसौ ।
पूर्वं सज्जस्त्वमावेष्ट्य, क्षणात् तावद् बधान तम् ॥ ५२३ ॥

साधु साध्विति जल्पाकस्तस्याः पक्षौ स्पृशन् मुहुः ।
सभ्यैः समस्तैरप्युक्ते, तथैव कृतवानसौ ॥ ५२४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समरं समरे बद्ध्वा, दिशो रुद्ध्वा यशोभरैः ।
चचाल बलवानेष प्रतापी ग्रीष्मभानुवत् ॥ ५२५ ॥

करालीभूत उष्णर्तौ, मरालीभूषितान्तिकः ।
तस्यामेव सरस्यां स विशश्राम पटाश्रमे ॥ ५२६ ॥

ऊर्ध्वं गलज्जलामत्र जलबिन्दुनिरीक्षणात् ।
ईक्षणद्वितीयादश्रुबिन्दूनि क्षरति स्म सः ॥ ५२७ ॥

दु० व्या०—जलामत्र ॥ ५२७ ॥

हंसी स्माह तवाप्येतत्, प्रभो ! किं दुःखचेष्टिताम् ।
मयि प्रसादश्चेज्जल्प, जगौ सोऽपि सगद्गदम् ॥ ५२८ ॥

मत्प्रयाणे प्रियाश्रूणि, यान्यमुञ्चच्छुचाऽऽकुला ।
जलामत्रेण मित्रेण, तान्यद्य स्मारितानि मे ॥ ५२९ ॥

तद् दृष्ट्वा हंसीका प्रोचे, तवापि किमु दुःखिता ।
वात्सल्यं यदि मय्यस्ति, तदा कथय हे प्रभो ! ॥ ५३० ॥

भूपोऽवग् वासरे यत्र, चलितः कान्तया तदा ।
यान्यश्रूणि विमुक्तानि, तान्यद्य स्मृतिमाययुः ॥ ५३१ ॥

तमालपन्मराली तमानये मानिनीमिह ।
सोऽवग् मे जीवितं दत्तं, तच्छक्तौ किं विलम्ब्यते ॥५३२॥

अपनीय गुणं गौरगुणा, गौरी स्वरूपभाक् ।
यां मुदं विदधे पत्युस्तां, विवेद स एव हि ॥ ५३३ ॥

अम्भोरुहास्ये रम्भोरु !, परिरम्भो रतिप्रदः ।
क्रियतामिति गीस्तां स प्रशस्ताङ्गीमरीरमत् ॥ ५३४ ॥

---

१. बवले A ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिशालशीलशालिनां, शालेयं साऽलपत् प्रिये ।
पृच्छति स्वागमे हेतुं, स्नेहं न ज्येष्ठचेष्टितम् ॥ ५३५ ॥

दु० व्या०–शालेयं–शालिक्षेत्रम् ॥ ५३५ ॥

ज्ञातयक्षादिवृत्तान्तस्तदा कान्तस्तदास्यतः ।
एतया कान्तया मेने, धन्यंमन्यत्वमात्मनः ॥ ५३६ ॥

सोऽथ स्वकान्तया साकमुत्पताकमगात् पुरम् ।
प्रणमन्तं च तं चन्द्रो, मोदयन् मृदुवाक्यभाक् ॥ ५३७ ॥

प्रसन्नमनुजं वीक्ष्याग्रजश्चित्ते व्यचिन्तयत् ।
मद्वृत्तं न जगौ पत्युर्धन्या गौरी महासती ॥ ५३८ ॥

एतौ समरमुन्मोच्य, सन्मान्य प्रेष्य नीवृतम् ।
बान्धवौ पूर्ववद् राज्यस्थितिं भेजतुरञ्जसा ॥ ५३९ ॥

चन्द्रस्यावसरे क्वापि, क्वापि तु स्मरतृष्णया ।
वितेने मानसं गौर्यां, सरस्यामिव खेलनम् ॥ ५४० ॥

मुदाऽन्यदा तौ संप्राप्तमभिनन्दमुनिं वने ।
नत्वा शुश्रुवतुर्धर्मोपदेशं सपरिच्छदौ ॥ ५४१ ॥

तरणाय भवाम्भोधौ, धर्मस्तावत् तरीसमः ।
चारित्रमेव चारित्रतुलां तत्र बिभर्त्यलम् ॥ ५४२ ॥

दु० व्या०–अरित्रतुला–आयला ॥ ५४२ ॥

श्रुत्वेति भवनिर्विण्णौ, मुनिं नत्वा पुरं गतौ ।
तौ चन्द्राङ्गभुवं सोमं, राज्येऽतिष्ठिपतां महात् ॥ ५४३ ॥

तौ भ्रातरौ तथा गौरी-गान्धार्यौ जगृहुर्मुदा ।
संयमं सुगुरूपान्ते, तपस्तीव्रं च तेपिरे ॥ ५४४ ॥

गौरी साकं प्रवर्तिन्या, व्रजन्त्यन्येद्युरध्वनि ।
नावा रेवानदीं तीर्त्वा, कायोत्सर्गं तटे व्यधात् ॥ ५४५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आगात् तत्र प्रौढपुत्रपुत्रीयुक् कापि वारला ।
दृशा स्नेहस्पृशा वीक्ष्य,यच्छन्ती चूर्णिमेतयोः ॥ ५४६ ॥
तदेव युगलं दृष्ट्वा, तदैव रतिलालसम् ।
साध्वी गौरी दधौ दैवात्, तद्दर्शनकुतूहलात् ॥ ५४७ ॥
पश्यन्ती तत्कृताश्लेषविशेषान् विस्मितानना ।
कायोत्सर्गच्युतध्यानमानसा सा व्यचिन्तयत् ॥ ५४८ ॥
धन्यत्वं मन्यतेऽनन्यसदृक्षप्रेमशालिनोः ।
पक्षिणोरेतयोरेतैर्विलासैः सह जन्मनोः ॥ ५४९ ॥
चिन्तयन्तीति साध्वीभिराहूता सा पुरोऽचलत् ।
नैतच्चालोचयाञ्चक्रे, चरित्रे निश्चलाऽपि सा ॥ ५५० ॥
चन्द्रश्च श्रीधरश्चैतन्माताऽपि समयेऽभवत् ।
सौधर्मदेवो देवी च, गौरी श्रीधरनाकिनः ॥ ५५१ ॥
मेरौ कल्पद्रुदोलास्थामन्येद्युश्चन्द्रनिर्जरः ।
पूर्वं संस्कारतोऽभ्येत्य, तां ययाचे रतं चटुः ॥ ५५२ ॥
तया निषिध्यमानेऽस्मिन्नाययौ श्रीधरामरः ।
तं दृष्ट्वाऽसौ पलायिष्ट, निराशः सारमेयवत् ॥ ५५३ ॥
अथ स्वर्गाच्च्युता गौरी माकन्दीनगरीपतेः ।
सुता मनोरमादेव्याः, सुता युगलजाऽभवत् ॥ ५५४ ॥
सहजातं पतिं प्राप्ता, हंसक्रीडानुमोदनात् ।
सेयं सप्तभवान् भ्रान्त्वाऽधुना जज्ञे सुलोचना ॥ ५५५ ॥
गान्धारीजन्तुरेषा त्वं, त्वत्पुत्रौ चाद्य भारते ।
विजयो वज्रदाढश्च, नरविद्याधरेश्वरौ ॥ ५५६ ॥
पूर्वं समरबन्धाय, बुद्धिदानोत्थकर्मणा ।
पूर्वानुरागभाग् जह्रे, वज्रदाढः सुलोचनाम् ॥ ५५७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतदर्थे च तौ युद्धं, कुरुतः सांप्रतं द्रुतम् ।
श्रुत्वेति धाविताऽस्म्येषा, वत्सौ वारयितुं रणात् ॥५५८॥ युग्मम्॥

मानवं भवमासाद्य, सद्यः कल्पद्रुमोपमम् ।
कामक्रोधादिदायिभिः, पीड्येथे किं युवां हहा ! ॥ ५५९ ॥

श्रूयतां तीर्थनाथोक्तमुपदेशचतुष्टयम् ।
स्पष्टं भवविषं दुष्टं, मन्त्रवद् यन्निवारयेत् ॥ ५६० ॥

तथाहि—प्रश्नम्—

जाग्रतामपि का निद्रा, पश्यतामपि काऽन्धता ? ।
श्रुते सत्येऽपि किं जाड्यं, प्रकाशेऽपि च किं तमः ॥ ५६१ ॥

अथोत्तराणि—

यया जगदिदं मूढं, सुरासुरसमन्वितम् ।
जाग्रतामपि सा निद्रा, मोहरूपा निवार्यताम् ॥ ५६२ ॥

उत्तराणि—

यया जीवा न पश्यन्ति, स्त्रीषु विण्मूत्रपात्रताम् ।
कामानुरागितावश्यं, पश्यतामपि साऽन्धता ॥ ५६३ ॥

उत्तराणि—

दृष्टिरागकृता येन, न युक्तायुक्तचिन्तनम् ।
श्रुते सत्यपि तज्जाड्यं, विदुषामपि दुस्त्यजम् ॥ ५६४ ॥

यत्र मग्ना न बुध्यन्ते, गुरुदीपे स्फुरत्यपि ।
विचार्यमाणमज्ञानं, प्रकाशेऽपि च तत् तमः ॥ ५६५ ॥

श्रुत्वेति खेचरीवाचं, वज्रदाढो विरागवान् ।
आहृत्य सर्वविरतिं, कायोत्सर्गे व्यधाद् द्रुतम् ॥ ५६६ ॥

साऽश्रुदृक् क्षमयामास, विजयस्तं तथास्थितम् ।
ध्यानान्मेरुमिवाचालीन्न चासौ विश्वचित्रकृत् ॥ ५६७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽथ स्थगीधरं प्रेष्यानैषीत् तत्र सुलोचनाम् ।
मलिनाङ्गीं वियोगेनाधिकं शीलेन शोभिताम् ॥ ५६८ ॥

इतश्च सर्पमार्जारकपिमूषककेकिभिः ।
विविधैर्वाहनैस्तत्राऽऽविर्बभूवुर्दिवः सुराः ॥ ५६९ ॥

किमेतदिति साश्चर्यं, जने व्यन्तरनिर्जरः ।
विजयं प्राञ्जलिर्नत्वा, प्रोचे मञ्जुलया गिरा ॥ ५७० ॥

स मत्सरायतेऽनङ्गो, वासरो वत्सरायते ।
अतुच्छरायते दुःखं, पद्मायाः किं वरायते ! ॥ ५७१ ॥

दु० व्या०–रायते–दीयते । वरा आयतिर्यस्य तस्य सम्बोधनम् ॥

बालां त्वद्विरहज्वालावलीढां वीक्ष्य वायुवत् ।
घनोदयं त्वामाह्वातुमागां विविधरूपभाक् ॥ ५७२ ॥

श्रुत्वेदं मेदिनीकान्तः, सम्मान्य व्यन्तरामरम् ।
व्यसृजद् विजया नागनाथादीन् बहुमानतः ॥ ५७३ ॥

तेऽपि क्रियाश्चिरं राज्यमित्याशीःपूर्वमूचिरे ।
चरोऽस्त्वसौ त्वदाज्ञायां, जन्तुघातकरो नहि ॥ ५७४ ॥

पूर्यां चमरचञ्चायां, नीलवन्तं निवेश्य सः ।
वज्रदाढसुतेभ्योऽदाद् , देशांशाञ्नतवत्सलः ॥ ५७५ ॥

खेचर्यपि महीशेन, महिता साऽचलत् ततः ।
वज्रदाढमुनिः षष्टिदिनैः सर्वार्थमाश्रयत् ॥ ५७६ ॥

विमानस्थः स्वप्रतापदूताहूतखगैर्वृतः ।
सप्रियो ववले सोऽथ, व्यन्तरेणाग्रयायिना ॥ ५७७ ॥

तस्मिन्नरण्ये तारुण्यानिले नोच्छृङ्खले खलु ।
स कामबाधौ मज्जत्याः, पद्मयाः करमग्रहीत् ॥ ५७८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदङ्गसङ्गमे रङ्गत्तरङ्गरतिभङ्गिभिः।
अनङ्गतापनिर्वापमाप सा पद्मलोचना ॥ ५७९ ॥

मातरं च स्वसारं च, गागलेराश्रमान्नृपः।
अनीकिनीं च कान्तारात्, खगैः स्वान्तिकमानयत् ॥५८०॥

नवज्योतिश्चक्रभ्रममथ विमानैर्वियति स
सफुरज्ज्योतिर्जालैर्जनमनसि तन्वन्नु दिशम्।
महानन्दोत्साहोत्सवमयमहो ! मङ्गलपुरं,
प्रविश्य प्राणंसीत् पितृचरणपद्मौ प्रमुदितः ॥ ५८१ ॥

पिताऽऽश्लिष्य स्वाङ्गैश्चिरविरहदावानलशम-
क्षमं सूनुं नूनं नयनजलधाराजलधरम्।
मुदश्रूणां श्रावं सपदि विदधानः स्वयमपि,
प्रतेने नाश्चर्यं क्षितिधरवरः कस्य हृदये ॥ ५८२ ॥

तस्मिन्नेव मुहूर्त एष विजयं माणिक्यसिंहासने,
न्यस्य श्रीजयचन्द्रभूपतिरदात् प्राज्यं स्वराज्यं मुदा।
श्रीक्षेमङ्करसद्गुरुक्रमतले कृत्वा तपो निर्मलं,
सिद्धिश्रीपरिरम्भसम्भवसुखं भेजे स्वयं केवली ॥ ५८३ ॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरिविरचिते
माणिक्याङ्के श्रीश्रीधरचरिते विजयकथायां
सुलोचनाहरण-प्रत्यानयनवर्णनो नाम
अष्टमः सर्गः समाप्तः ॥ ग्रन्थाग्रम् ५६९ अ० २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## नवमः सर्गः ॥

पैतृकं पदमासाद्य, रेजेऽथ विजयोऽधिकम् ।
रत्नमौलिर्यथा मौलिमूलं सर्वत्र सुन्दरः ॥ १ ॥

रुचाऽतपत्रमप्यस्य, विजिग्ये राजमण्डलम् ।
करालकरवालस्य, कः करोतु पराभवम् ॥ २ ॥

प्रतापतपने तस्य, विश्वोद्योतविधायिनि ।
सप्तापि तिमिराणीव, व्यसनानि तिरोदधुः ॥ ३ ॥

वरानुभावतो नागराजादीनां न नागराः ।
जना जनपदाश्चापि, जज्ञिरे जन्तुघातिनः ॥ ४ ॥

मृगारयो मृगारित्वमुलूकाः काकशत्रुताम् ।
दधिरे नाममात्रेणाऽन्योन्यं मित्रत्वमागताः ॥ ५ ॥

तद्राज्यकमले तस्थौ, कमला निश्चलं तथा ।
समदुःखा यथाऽभूवन्, पद्म-श्रीपति-सिन्धवः ॥ ६ ॥

पट्टदेवीपदे न्यस्य, विजयोऽथ सुलोचनाम् ।
नानाविलासैस्तां भेजे, गौरीं गौरीवरो यथा ॥ ७ ॥

पूर्वजन्मद्वयप्रेम, तथा तस्यां व्यजृम्भत ।
क्ष्मापः क्षणमपि प्राप, तां विना न यथा धृतिम् ॥ ८ ॥

विद्याविरचितैः रूपैः, परमन्तःपुरं ययौ ।
परिरेभे परं स्वप्नेऽप्येनामेव नृपः स्वयम् ॥ ९ ॥

सभास्थानं क्षणं मेने, स वत्सरशतोपमम् ।
तदङ्गसङ्गमास्वादसादरे हृदि सर्वदा ॥ १० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मौलौ बबन्ध धम्मिल्लं, स्वयं तस्याः कदापि सः ।
कदाचिल्लिलिखे तेन, कपोले पत्रवल्लरी ॥ ११ ॥

भुजोपपीडं भेजे तां, व्यक्तरागधरामिव ।
शीतकाले स कालेयपङ्कालेपपरां भृशम् ॥ १२ ॥

तपर्त्तौ वर्तुलव्यक्तमुक्ताप्रालम्बशीतले ।
शिश्येऽसौ चन्द्रशालासु, तस्याः काम्यकुचस्थले ॥ १३ ॥

स नाभीदघ्ननीरासु, दीर्घाक्षीं दीर्घिकासु ताम् ।
कदापि रमयामास, मराल इव वारलाम् ॥ १४ ॥

दु० व्या०—नाभीदघ्नं—नाभीप्रमाणम् ॥ १४ ॥

रेजे कदाचिद् दोलास्थस्तयाऽसौ काञ्चनद्युता ।
घनसात्त्विकघर्माम्बुर्विद्युत्वानिव नीरदः ॥ १५ ॥

तेन सा रतरङ्गाऽऽढ्या, प्रेङ्खत्कङ्कणहारिणी ।
मन्ये सिषेवे सानन्दं, सरसी स्वप्रिया धिया ॥ १६ ॥

दु० व्या०—सा पक्षे सातपूर्वकम् ॥ १६ ॥

लसद्घनरसस्फार्ति, सुमनोभवशालिनीम् ।
मालतीमिव तां भृङ्गः, स भेजे वनकेलिषु ॥ १७ ॥

दु० व्या०—घनरसम्, पक्षे जलं सुष्ठु । कामपक्षे पुष्पोत्पत्तिम् ॥१७॥

अयं घनागमोदीर्णरागो नवरतोद्यतः ।
तन्नितम्बं गुरुं गौरगौरवाद्युक्तमैक्षत ॥ १८ ॥

दु० व्या०—घनागमेन उदीर्णरागः, पक्षे दीर्णं विदारिता ॥ १८ ॥

मन्त्रिषु न्यस्तसाम्राज्यभारस्य क्रीडतस्तया ।
एकरात्रिसमा तस्य, समा दशशती ययौ ॥ १९ ॥

दु० व्या०—समा—वर्षा ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतृप्तस्तद्विलासानां, कलाकौशलशालिभिः ।
चिरत्नयत्नतः क्ष्मापो रत्नसौधमकारयत् ॥ २० ॥

अतुच्छभित्तिविच्छित्तिविचित्रोल्लोचसुन्दरम् ।
विशालशालभञ्जीभिर्भ्राजिष्णुस्तम्भमण्डलम् ॥ २१ ॥

तया दयितया साकमाकुलः कामपत्रिभिः ।
शुभे स भेजे तद्वेश्मवासरे विस्मयप्रदम् ॥ २२॥ युग्मम् ॥

अन्योऽन्यमङ्गुलीलग्नौ, तौ मग्नौ प्रेमसागरे ।
तत्राऽलोकपरौ कामरती इव विरेजतुः ॥ २३ ॥

एणीनेत्रे सुमश्रेणी, प्रहिता सुमपत्रिणा ।
त्वज्जितं वीक्ष्य मां व्यर्था, किमियं भुवि पेतुषी ॥ २४ ॥

वितानोल्लम्बिता मुक्तावली कान्ते ! विलोक्यताम् ।
सुदतीदशनस्पर्धाऽपराधादिव दण्डिता ॥ २५ ॥

सौन्दर्यगर्वमाबिभ्रत्, किमिदं मन्दिरं परम् ।
स्वतुल्यं वीक्षते विश्वे, वातायनविलोचनैः ॥ २६ ॥

हरिन्मणिघृणिस्फारस्फटिकद्युतिदम्भतः ।
किमेतौ तिमिरोद्योतावत्र मित्रत्वमागतौ ॥ २७ ॥

दु० व्या०—घृणिः—किरणः ॥ २७ ॥

विज्ञानं बहिराकारं, लभते सौगते मते ।
भित्तिचित्रं त्विदं चैत्तविज्ञानं चित्रतां नयेत् ॥ २८ ॥

दु० व्या०—सौगते—बौद्धे । चैत्तविज्ञानं—नीलादिज्ञानं बाह्यवस्तुनो घटादेराकारम् । इदं भित्तिचित्रं—चित्रसम्बन्धि ज्ञानम् । चित्रतां, पक्षे आश्चर्यरूपताम् ॥ २८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चारुचन्द्रोदया मुक्ता, तारकेयं किमीक्ष्यते ? ।
गौरि ! त्वदङ्गगौरत्वं, राका शिक्षितुमागता ॥ २९ ॥

एकान्ते रजनीकान्तकान्तकान्तिभिरावृताः ।
कान्ताऽपास्तांशुकाः कान्ता नात्र यान्ति त्रपालुताम् ॥ ३० ॥

एवं सविस्मयं वेश्मस्थानान्यस्याः प्रदर्शयन् ।
अतन्द्रं चन्द्रशालां स चन्द्रमुख्या समं ययौ ॥ ३१ ॥

स्फुरन्मणिप्रदीपास्ततमिस्रातिमिरावलिम् ।
आस्तीर्णवर्यपर्यङ्कां, तां दृष्ट्वोचे प्रियः प्रियाम् ॥ ३२ ॥

नवभिः कुलकम् ॥

कान्ते ! विभाव्योऽवसरानुभावो
रक्तो रविस्तावदगात् प्रतीचीम् ।
निशाऽपि धत्ते शशिनोपगूढा,
ताराच्छलात् स्वेदपयःपृषत्कान् ॥३३॥

विहायसि च यं पश्य, ताराणामुदितं प्रिये ! ।
परिरेभे स तामेव, वक्रोक्त्या सस्मितत्रपाम् ॥ ३४ ॥

रमणो रमणीयाङ्गीं, रममाणो रमामयम् ।
रमारमणवन्मेने, रमणीनां मणिमिमाम् ॥ ३५ ॥

तस्यामथ रतिश्रान्तेर्निद्राणायां नरेश्वरः ।
पतिष्यामि पतिष्यामीत्यकस्मादशृणोद् गिरम् ॥ ३६ ॥

किमेतदिति संभ्रान्तः, स दध्यौ किं पतत्यधः ।
सौधं तत्कान्तया साकं, द्रुतं कुर्वे पलायनम् ॥ ३७ ॥

निःसत्त्वचेष्टितेनालं, मम वाऽनेन वल्लभा ।
नितम्बगुर्वी निद्रालुश्चपलं न चलत्यपि ॥ ३८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उचितं वच्मि तत् किञ्चिदिति ध्यानन् पुनर्ध्वनौ।
जायमाने नृपोऽवादीदद्य मा पत मा पत ॥ ३९ ॥

ततः शब्दे स्थिते स्थैर्यशाली शालीनमानसः।
प्रातर्मन्त्रिणमाहूय, निशावृत्तं नृपो जगौ ॥ ४० ॥

सोऽवादीद् भूमिशल्यादिशुद्धिं कृत्वा सुकोविदैः।
कुतः पतत्यदः सौधं, सुमुहूर्ते विनिर्मितम् ॥ ४१ ॥

इदमित्थं परं तावदहं विज्ञापयामि यत्।
तदाकर्ण्य सकर्णानां, वर्णनीययशोभर ! ॥ ४२ ॥

मित्रेण मन्त्रिणा पूर्णं, किं विनेयेन तेन वा।
हितं न वक्ति यः काले, मित्रे राज्ञि तथा गुरौ ॥४३॥

त्वामन्तःपुरवर्षाभ्रपटलच्छन्नमर्कवत्।
अविलोक्य चिरं लोकाः, क्लिश्यन्ते कमला इव ॥ ४४ ॥

दु० व्या०—कमलं पुं नपुंसकम् ॥ ४४ ॥

नाथेयं वनिता वह्निज्वालेव किल तापकृत्।
सुचिरं सेविता साऽतः, स्वल्पं सेव्या सुधीजनैः ॥ ४५ ॥

वल्भादिकानामथ कामिनीनामतिप्रसक्तिर्न सुखं व्यनक्ति।
कलेवरान्तः करिणः प्रविष्टः, काकस्तथा यज्जलधौ विनष्टः ॥४६

दु० व्या०—वल्भा—भोजनम् ॥ ४६ ॥

अश्रद्दधानस्तद्वाचमाचख्यौ सस्मितं नृपः।
मन्त्रिन्नप्रस्तुतेनालं, पृष्टस्योत्तरमुद्गिर ॥ ४७ ॥

अहो ! कामस्य वामत्वं, वामनेत्रा शरेण यः।
सुरासुरासुरारीणां, रीणत्वं कुरुते रणे ॥ ४८ ॥

दु० व्या०—असुरारिः—इन्द्रः ॥ ४८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाण्डित्यलीलाभिरिलावतंसा,
ये ये विवेकेन च राजहंसाः ।
मीनध्वजाज्ञाध्वजवृद्धिदीनाः,
स्त्रीवारिधौ तेऽपि भवन्ति मीनाः ॥ ४९ ॥

दु० व्या०—मीनध्वजः—कामस्तस्याज्ञा । स्त्रीवारिधौ मीनवृद्धिहेतवे जातास्तेन दीनाः ॥ ४९ ॥

इदं चिन्तयता चित्ते, मन्त्रिणाऽवादि भूपतिः ।
वेश्मनः पतनस्यास्ति, सम्भवः कोऽपि न प्रभो ! ॥ ५० ॥
त्रिभिर्विशेषकम् ॥

विशेषस्तु यथा ज्ञातः, पुनर्विज्ञपयिष्यते ।
अथ भूपो विसृज्यामुं, प्रियोपान्तमुपागमत् ॥ ५१ ॥

तया महेलया कामहेलया नीतवासरः ।
पुनस्तत्रैव सुष्वाप, निशि भूपः प्रियासखः ॥ ५२ ॥

देव्यां प्राप्तप्रमीलायां, ध्वनिर्जज्ञेऽम्बराध्वनि ।
विस्मृता ह्यस्तनी गीश्चेत्, तदद्य प्रयतः शृणु ॥ ५३ ॥

तस्योपरि पतिष्यामि, निश्चितं शयिताऽत्रपः ।
रिक्ते मुक्ते त्विह स्थाने, राज्यत्यागं करोमि ते ॥ ५४ ॥

पतितव्यं त्वया नाथ, गदित्वेति नृपस्ततः ।
धैर्यमेरुर्निशां नीत्वा, प्रातराह्वास्त मन्त्रिणः ॥ ५५ ॥

चतुर्णां चतुराणां स पुरस्तेषामभाषत ।
तदाकूतं विजिज्ञासुर्निशावृत्तोक्तिपूर्वकम् ॥ ५६ ॥

दु० व्या०—आकूतं—अभिप्रायम् ॥ ५६ ॥

शून्ये सौधेऽत्र मे राज्यभ्रंशोऽस्मिन् शायिनो मृतिः ।
उच्यतां का मतिर्व्याघ्रदुस्तटीन्याय एष यत् ॥ ५७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाटूपटमतिः प्रोचे, तं मन्त्री मतिसागरः ।
साध्येऽस्मिन् सुखसाध्येऽपि, किमेवं बाध्यते मनः ॥ ५८ ॥

दु० व्या०—पाटूपटः—अतिपटुः ॥ ५८ ॥

यं वा तं वा निजं भृत्यं, नित्यं स्थापय वेश्मनि ।
तस्योपरि पतत्वेतन्नेतुश्चेतः सुखायताम् ॥ ५९ ॥

दु० व्या—पततु । सुखायताम्—सुखमनुभवतु ॥ ५९ ॥

बृहस्पत्याख्यया मन्त्री, द्वितीयोऽप्यद्वितीयधीः ।
युक्तमुक्तमिति प्रोचे, तावथोवाच भूपतिः ॥ ६० ॥

परप्राणापहारेण, यन्निजप्राणरक्षणम् ।
जीवितव्यार्थिनः पुंसस्तन्नूनं विषभक्षणम् ॥ ६१ ॥

तृतीयो बुद्धिचन्द्रोऽवक्, सचिवः शुचिवाक् ततः ।
अरा इव नरा नाभौ, नाथ ! सज्जे घनास्त्वयि ॥ ६२ ॥

तुर्योऽपि चारुचातुर्यो, धीरचन्द्रोऽवदन्नृपम् ।
ऐन्द्रं पदं जयत्येतत्, प्राज्यं राज्यं प्रभो ! तव ॥ ६३ ॥

त्वया विना विनाथेयं, मेदिनी न दिनस्थितिः ।
किं हतेन प्रभो ! दैवहतकेन च केनचित् ॥ ६४ ॥

त्यज मा तन्निजं राज्यमित्यूचानेऽत्र भूपतिः ।
उवाच बद्धरोमाञ्चकञ्चुको धैर्यचञ्चुरुक् ॥ ६५ ॥

दु० व्या०—मा त्यज । चञ्चुः—मनोज्ञः ॥ ६५ ॥

यथा मयि प्रियाः प्राणास्तथा सर्वेषु जन्तुषु ।
यथा मृत्योर्भयं कीटे, तथा कैटभवैरिणि ॥ ६६ ॥

संपद्यन्ते च धर्मेण, प्राज्यराज्यादिसंपदः ।
तन्नाशे जन्तुहिंसादेस्ताभ्यो दत्तो जलाञ्जलिः ॥ ६७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आबाल्यसञ्चितं किञ्च, धनं घातनिषेधनम् ।
धनस्य तस्य लोपेऽद्य, सद्यो राज्येन तेन किम् ? ॥ ६८ ॥

पुरमन्तःपुरं पृथ्वी पृतना च परिच्छदः ।
तत् कृपा न कथं नाथ !, क्रियते करुणाम्बुधे ! ॥ ६९ ॥

अवधेहि धियं धीराऽस्माकमाकुलचेतसाम् ।
इति मन्त्रिकुले जल्पत्युदस्थान्नृपतिस्ततः ॥ ७० ॥ युग्मम् ॥

मन्त्रिणोऽन्योऽन्यमाचक्षुर्दक्षत्वं धिग् निजं ननु ।
अपायरक्षणोपायः, प्रभोर्येन न जायते ॥ ७१ ॥

धीरचन्द्रोऽवदत् प्रायो भाव्यं भवति नान्यथा ।
तथापि श्रेयसां हेतुः, पुरे धर्मो विधाप्यते ॥ ७२ ॥

विश्वम्भरा निराधारा, धर्मात् तिष्ठति निश्चला ।
न मुञ्चन्ति स्वमर्यादां, धर्माद् रत्नाकरा अपि ॥ ७३ ॥

हृष्यन्ति स्वजना धर्माद्, धर्मात् तुष्यन्ति देवताः ।
धर्मादन्यत् परित्राणं, नास्ति विश्वत्रयेऽप्यहो ! ॥ ७४ ॥

तथेति प्रतिपद्यैते, चतुष्के चत्वरे त्रिके ।
इत्येवं कारयामासुः, पुरे पटहघोषणाम् ॥ ७५ ॥

आप्रभातं प्रभोः स्वस्य, कश्चित् क्लेशोऽस्ति दुस्तरः ।
पुण्यं कुरुध्वं भो पौराः ! श्रेयसे परमादरात् ॥ ७६ ॥

श्रुत्वेति लोकास्त्यक्तान्यकृत्याः स्वस्वामिभक्तितः ।
देवार्चास्मरणाद्येषु, पराः सर्वेऽपि जज्ञिरे ॥ ७७ ॥

प्रियातोऽप्यधिकप्रीत्याऽऽश्रित्य सत्त्वश्रियं स्यात् ।
सायं प्रापदथ क्ष्मापः, सौधवर्यशिरोगृहम् ॥ ७८ ॥

रवौ तद्वीरतां ख्यातुमिव द्वीपान्तरं गते ।
दोषामुखे स निर्दोषस्तत्र शय्यामशिश्रयत् ॥ ७९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नीते जाग्रत एवास्य, निशायाः प्रहरेऽम्बरे ।
पतिष्यामि पतिष्यामीत्यकस्मादुत्थितं वचः ॥ ८० ॥

हसन्निव नृपः मोचे, साहस्येकशिरोमणिः ।
पतित्वा पूरय स्वेच्छां, वाक्छूरत्वं तु दूरय ॥ ८१ ॥

जगर्ज गगनं कर्णकटुभिर्गर्जितैस्ततः ।
नेत्रे निमीलयन्नस्य, तेजःपिण्डः पपात च ॥ ८२ ॥

सौधं न पतितं किञ्चित्, त्वन्यदेवेति कौतुकी ।
आलोकते स्म भूपालः, पुरः किमिति चिन्तया ॥ ८३ ॥

कान्तिविद्युल्लताभ्रान्तिकारिणीं तारहारिणीम् ।
चन्द्रास्यां शुभ्रशृङ्गारां, चलत्कङ्कणकुण्डलाम् ॥ ८४ ॥

शुकहस्तां श्रितस्कन्धमरालद्वयशालिनीम् ।
काञ्चित् काञ्चनगौरीं स वशां वीक्ष्य विसिष्मिये ॥ ८५ ॥
॥ युग्मम् ॥

स्फुरन्नूपुरझङ्कारा, कृतनृत्तक्षणात् क्षणम् ।
गण्डूषं व्यसृजद् बाला, भुवि भृङ्गारवारिणा ॥ ८६ ॥

अंसतो हंसयुग्मं तदुत्तीर्य जलसीकरान् ।
चुणित्वा मौक्तिकीभूतानाजगाम निजस्थितिम् ॥ ८७ ॥

दु० व्या०—अंसः—स्कन्धः ॥ ८७ ॥

किमिदं शुक-हंसादि, केयं किं काऽपि देवता ! ।
भूस्पृक्त्वानुमानवीं मन्ये, खेचरी वा पराऽस्तु वा ॥ ८८ ॥

इति ध्यायन्नसौ यावत्, काऽसि त्वमिति पृच्छति ।
तावद् गन्तुमनाः साऽभून्नृपो भर्तुमनाश्च ताम् ॥ ८९ ॥

यावदुत्तिष्ठति क्ष्मापः, पर्यङ्काद् वर्यधैर्यभाक् ।
तावत् पश्यत एवास्य, सा जगाम विहायसा ॥ ९० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नाशकत् पृष्ठतो गन्तुं, सविद्योऽपि नृपः पुनः ।
तस्य तच्चिन्तनेनैव, विभाति स्म विभावरी ॥ ९१ ॥

मन्त्रिणश्चिन्तयाऽतीतरात्रयस्तत्र सङ्गताः ।
जयवन्तं नृपं वीक्ष्य, महोत्सवमकारयन् ॥ ९२ ॥

पौरपुण्यप्रभावेणान्तरायस्ते व्यलीयत ।
प्रभासय सभामद्य, प्रद्योतन इव प्रभो ! ॥ ९३ ॥

मन्त्रिणामिति विज्ञप्त्या, महोत्सवपुरस्सरम् ।
विभुर्विभूषयामास, सभामिव नभः शशी ॥ ९४ ॥

मौलिमौलिस्थमालाभिरानम्रा तत्पदद्वयम् ।
पूजयामास सामन्तमण्डलेश्वरमण्डली ॥ ९५ ॥

पौरा दूरादपि प्रीतिं, दधिरे तन्निरीक्षणात् ।
व्योमस्थोऽपि नवाम्भोदो, नानन्दयति केकिनः ! ॥ ९६ ॥

राजादिमानसद्दानप्रेक्षणादिक्षणोत्क्षणैः ।
क्षणदाकान्तवत् क्षोणीविभुर्विश्वमुदेऽभवत् ॥ ९७ ॥

हृदि स्मरन्निशावृत्तमेवातिक्रम्य वासरम् ।
नृपस्तत्रैव शिश्ये तत्कन्यालोकनकौतुकी ॥ ९८ ॥

कन्याऽपि पूर्ववत् तत्रागत्य नृत्यं विधाय सा ।
ग्रहीतुमुत्थितं भूपं, वीक्ष्य व्योम्ना ययौ क्षणात् ॥ ९९ ॥

च्युतफाल इव द्वीपी, तदनासादसादरः ।
तृतीयनिश्यपि क्ष्मापस्तत्रागत्य व्यचिन्तयत् ॥ १०० ॥

दु० व्या०—अनासादः—अप्राप्तिः ॥ १०० ॥

विज्ञाता लक्षणैस्तावन्मया कन्यैव साऽङ्गना ।
नाङ्गभावादपि प्रायो, यो न वेत्ति स ना पशुः ॥ १०१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धन्यः स कृतपुण्यश्च, पुण्यलावण्यवाहिनी ।
यं वरं याति सा कन्या, भाग्यसौभाग्यसागरम् ॥ १०२ ॥

यथा तथा मया ग्राह्या, विवाह्यासाद्य सुन्दरी ।
ध्यात्वेति भूधनो दीप्रदीपच्छायामशिश्रयत् ॥ १०३ ॥

अत्रासा तत्र सा यावद्, बाला वाचालनूपुरा ।
भवेद् भुवि भुजामस्या भूपतिस्तावदग्रहीत् ॥ १०४ ॥

दु० व्या०–अत्रासाः–अभीः ॥ १०४ ॥

मुञ्च मुञ्च महाराज!, जल्पन्तीमिति कोमलम् ।
तामाश्वास्य नृपः प्रोचे, का त्वं किमिति खेलसि ? ॥ १०५ ॥

किं हंसयुग्ममंसस्थं, तव हस्ते शुकस्तु कः ? ।
दीपसाक्ष्यमुरीकृत्य, कन्ये ! त्वं मां कृतार्थय ॥ १०६ ॥
॥ युग्मम् ॥

साऽवग् देवाधिदेवस्य, सुता सिद्धिपुरीशितुः ।
नाकिनामपि मान्याऽहं, विज्ञेया विज्ञकन्यका ॥ १०७ ॥

न रुजा न भयं किञ्चिन्न मृत्युर्न जराऽपि मे ।
विश्वे नाम्नैव पाञ्चाली, सत्याऽहं नित्ययौवना ॥ १०८ ॥

दु० व्या०–पाञ्चाली–द्रौपदी, तस्या नित्ययौवना नाम ॥ १०८ ॥

वाच्या तु मानवी नाहं, नाऽमरी न च किन्नरी ।
नरं वरं वृणोम्येषा, परं मे संगरं शृणु ॥ १०९ ॥

दु० व्या०–संगरं–प्रतिज्ञा ॥ १०९ ॥

यः स्याद् वृत्तचतुःशैलः, सलीलं ब्रह्मविद् द्विजः ।
मद्वृत्तज्ञेन तेनाहं, वरं वृण्वे पुरोधसा ॥ ११० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चेन्मां विवोढुं वाञ्छा तत्, कार्यस्तादृक् पुरोहितः ।
सत्येतस्मिन् वृणोमि त्वामधुनाऽपि न संशयः ॥ १११ ॥

वृत्तं मदंसहंसादेर्ममापि च स वक्ष्यति ।
तस्मिन्नवसरे त्वं मामाविर्भूतां विलोकयेः ॥ ११२ ॥

इत्युक्त्वाऽस्यां गतायां स तच्चरित्रं स्मरन्मुहुः ।
कोमलेऽपि हि पल्यङ्के, कथञ्चित् प्राप संलयम् ॥ ११३ ॥

दु० व्या०—संलयं—निद्राम् ॥ ११३ ॥

प्रातरास्थानमास्थाय, विज्ञपश्चशतीं नृपः ।
अपृच्छत् क्वापि कस्यापीदृक् पुरोधाः श्रुतो न वा ॥ ११४ ॥

नैवेत्युक्ते तया भूपो, मन्त्रिदूतवरान् नरान् ।
लिङ्गिनोऽपि हि षौद्रादीन्, पप्रच्छैकैकशोऽनिशम् ॥११५॥

भूपे पृच्छति देवाधिदेवत्वं केशवे शिवे ।
इन्द्रे ब्रह्मणि विप्राद्याः, प्राहुर्बुद्धे च सौगताः ॥ ११६ ॥

ऊचे सिद्धिपुरीत्वेन, वैकुण्ठः कुण्ठबुद्धिभिः ।
कैश्चिदन्यैश्च कैलासः, परैर्वाणारसी पुरी ॥ ११७ ॥

देवाधिदेवपुत्रीत्वे, जयन्ती-भारतीमुखाः ।
ऊचिरे त्रिकयोगस्तु, क्वापि साङ्गत्यमाप न ॥ ११८ ॥

पुरोधसश्चतुःशैलधरत्वं धीरचेतसा ।
केनापि क्वापि वाङ्मात्रेणापि नो घटितं पुनः ॥ ११९ ॥

एवं प्रश्नपरस्यास्य, विस्मृता परकर्मणः ।
अकान्ता नर्मणस्त्रिंशद्वासरा व्यतिचक्रमुः ॥ १२० ॥

एकत्रिंशेऽह्नि स प्रातर्विदास्थानमास्थितः ।
शुश्राव तावता दिव्यदुन्दुभिध्वनिमद्भुतम् ॥ १२१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रूत्क्षेपं तन्वति क्ष्मापे, तत्स्वरूपबुभुत्सया ।
मन्त्री विज्ञाय वृत्तान्तं, प्राञ्जलिस्तं व्यजिज्ञपत् ॥ १२२ ॥

वने मुनेर्जयन्तस्योत्पेदे केवलमुज्ज्वलम् ।
सेवाहेवाकिनो देवा देवाऽमुं कुर्वते महम् ॥ १२३ ॥

दु० व्या–हे देव ! ॥ १२३ ॥

तच्छ्रुत्वा भूपतिर्दध्यावथ सिद्धा मनोरथाः ।
लोकालोके न तद् वस्तु, यन्न पश्यति केवली ॥ १२४ ॥

तदैवानन्दपूरेण, पूरितः पृथिवीपतिः ।
महर्द्धिभिर्वनं प्राप, नन्तुं केवलिनं मुनिम् ॥ १२५ ॥

खड्गचामरकोटीरच्छत्रवाह्यानि कौशलात् ।
विहाय राजचिह्नानि, विरेजे तत्र सोऽधिकम् ॥ १२६ ॥

सचित्तवस्तुनस्त्यागादचित्तात् त्यागतस्तथा ।
उत्तरासङ्गतः साधुदर्शनेऽञ्जलियोजनात् ॥ १२७ ॥

मनः स्थिरीकृते श्चासौ, पञ्चाप्यभिगमानिमान् ।
प्रपञ्चयन्मुनिप्रष्ठदृक्पथेऽजनि हृष्टहृत् ॥ १२८ ॥ युग्मम् ॥

दु० व्या०–प्रष्ठः–मुख्यः ॥ १२८ ॥

संशयध्वान्तविध्वंसिकैवल्यद्युतिभासुरम् ।
तं स्वर्णपद्मे सोऽद्राक्षीद्, यथा पूर्वाचले रविम् ॥ १२९ ॥

रविर्मेरुमिव स्थैर्यधैर्यादिगुणमन्दिरम् ।
अमरैः सेवितं भूपः, प्रदक्षिणयति स्म तम् ॥ १३० ॥

भक्त्या तच्चरणौ नत्वा, संप्राप्य च तदाशिषम् ।
मुदितो मेदिनीभर्त्ता, निःषसाद मुनेः पुरः ॥ १३१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सोऽयं सितासुधास्वादपराजयनलालसम् ।
पपौ भृङ्गवदस्यास्याम्भोरुहाद् देशनारसम् ॥ १३२ ॥

तथाहि—

भो भो भव्याः ! भवेऽनादौ, नानायोनिपरिभ्रमात् ।
केऽपि द्वि-त्रि-चतुः पञ्चेन्द्रियत्वं यान्ति जन्तवः ॥ १३३ ॥

ततस्तिर्यक्षु दुःखानि, सहन्तस्ते कथञ्चन ।
दुर्लभं दशदृष्टान्तैर्लभन्ते मानवं भवम् ॥ १३४ ॥

आर्यदेशादिसामग्र्यां, प्राप्तायां प्राणिनः पुनः ।
तत्रापि जिनधर्मस्याचरणं दुर्लभं यतः ॥ १३५ ॥

एके मुक्त्वा विवेकेन, मिथ्यारथ्यापतिष्णवः ।
न कुर्युः सदसद्देव-गुरु-धर्मविचारणाम् ॥ १३६ ॥

नश्वरीणामपि श्रीणामर्जनाय महाम्बुधिम् ।
तरन्ति केचित् कान्तारं, क्रामन्ति सुकृतेऽलसाः ॥ १३७ ॥

जीवाः पीवादराः प्रायः, परे विषयविभ्रमे ।
प्रेर्या मदनमोहाद्यैः, कृत्याकृत्यं न जानते ॥ १३८ ॥

जडाशयास्ते धावन्ति, विस्मेरस्मरतृष्णजः ।
मृगतृष्णास्विव मृगा मृगाक्षीषु सुखार्थिनः ॥ १३९ ॥

वेत्ति वै तरुणीं मूर्खः, किं न वैतरणीं नवाम् ।
दृष्ट्वाऽपि यस्या लावण्यत्रपुतापमुपैत्यसौ ॥ १४० ॥

दु० व्या०—वै—निश्चितम् ॥ १४० ॥

कान्ताऽरं किल कान्तारं, किं न वेत्तीति मन्दधीः ।
यद्बाहुबल्यां तं बद्ध्वाऽनङ्गभिल्लो न मुञ्चति ॥ १४१ ॥

दु० व्या०—अरं—अत्यर्थम् १४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरः पूत्क्रियते कस्य, सदा कारा वधूरियम् ।
वदन्तोऽपीति तत्सङ्गमीहन्ते हन्त ! बालिशाः ॥ १४२ ॥

दु० व्या०—कारा–गुप्तिगृहम् ॥ १४२ ॥

योषिज्जघनरोमालिगोदण्डे पतयालवः ।
न विदन्तीति हा ! मूर्खा भ्रमिष्यामो भवाटवीम् ॥ १४३ ॥

पुरीषमूत्रमूषासु, योषासु जडताभृतः ।
मुह्यन्ति मोहनव्यग्रा महामोहविमोहिताः ॥ १४४ ॥

अत्यक्तकामास्ते मृत्वा, सहन्ते हन्त ! यातनाः ।
कुदेवेषु कुमर्त्येषु, तिर्यक्षु नरकेषु च ॥ १४५ ॥

अतः प्रमादमुत्सार्य, धर्मः कार्यः सचेतनैः ।
पश्चादपि यो धर्मं, संधत्ते सोऽपि शस्यते ॥ १४६ ॥

यस्तु शाश्वतसौख्येच्छुरुद्वोढुं संयमश्रियम् ।
ईहते मोहजैत्रोऽसौ, धन्य एव यदुच्यते ॥ १४७ ॥

दुर्लभं जगति जन्म मानुषं,
तत्र जैनवचनं सुदुर्लभम् ।
कश्चिदेव लभते च भाग्यवान्,
सिद्धिनायकसुताङ्गसङ्गमम् ॥ १४८ ॥

स्वचित्तानुगतं श्रुत्वा, मुदितो मेदिनीपतिः ।
मुनीन्दुं प्राञ्जलिः प्राह, किञ्चिद् विज्ञपये प्रभो ! ॥ १४९ ॥

केयं सिद्धिरिति ख्याता, कश्च तन्नायकस्तथा ।
केयं तस्य सुता यस्या दुर्लभः सङ्गमः स्मृतः ॥ १५० ॥

मुनिर्जगाद देवाधिदेवः सिद्धिपुरीप्रभुः ।
धन्यमूर्द्धन्यतत्कन्यां, जानीयाः संयमश्रियम् ॥ १५१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्या अंसद्वये हंसद्वयं हस्ते शुकस्तथा ।
यन्मुक्तो जलगण्डूषो, व्यक्तं मुक्ताफलायते ॥ १५२ ॥

परं पुरोहितस्तस्या विवाहे दुर्लभो हितः ।
वर्ण्यते सैव याऽलोकि, त्वयाऽपि नवमन्दिरे ॥ १५३ ॥

न चेत् प्रतीतिस्तत् पश्य, प्रतिज्ञापूर्तिहेतवे ।
तद्रूपामेव तां कन्यां, विहायसि समागताम् ॥ १५४ ॥

प्रभो ! किमेतदाश्चर्यमित्युक्ते भूभुजा मुनिः ।
ऊचे सर्वमिदं राजन्नन्तर्दृष्ट्या विचारय ॥ १५५ ॥

देवाधिदेवः सर्वज्ञ एव राजाधिगम्यताम् ।
तुष्टः प्रदत्ते भव्येभ्यो यो हि सिद्धिपुरे स्थितिम् ॥ १५६ ॥

लोकाग्रे च पुरी सिद्धिरुत्तानच्छत्रसन्निभा ।
साद्यनन्ता वसन्त्यत्र, सिद्धा नित्यसुखास्पदम् ॥ १५७ ॥

एतां सर्वज्ञकन्यां च, मन्येथाः संयमश्रियम् ।
या मान्या मानवेन्द्राणां, देवानामपि दुर्लभा ॥ १५८ ॥

तथा च—

यदाननं निर्मलभाव एव, जयत्यहो ! पार्वणचन्द्रबिम्बम् ।
अष्टाङ्गयोगेन यदीयमङ्गमष्टाङ्गशोभाभिरलं शुभंयुः ॥ १५९ ॥

उपाङ्गकान्तिं दधते च यस्या दशाधिकाः संयमसप्तभेदाः ।
विभूषणत्वं दशधा प्रणीतः, प्रयाति धर्मः सततं यदङ्गे ॥१६०॥

यातो यदंसद्वयहंसलीलां, ध्याने चिरं निर्मलधर्मशुक्ले ।
हस्ते विवेकं च शुकं दधाना, सेयं कनी राजति संयमश्रीः ॥

गण्डूषीकृतसिद्धान्तामृतं मुक्ताकणायते ।
परावर्तनया स्पष्टं, तच्चास्या ध्यानपुष्टये ॥ १६२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिन्त्यते न पुं-क्लीव-स्त्रीरूपं संयमश्रियाः ।
एका चानेकरूपा च, सेयं श्लिष्यति चेतनम् ॥ १६३ ॥

पुरोधा ब्रह्मविज्ञानाद् , ब्राह्मणस्तद्विवाहयुक् ।
चतुर्यामहाशैलधरः सुगुरुरेव च ॥ १६४ ॥

सेयं दिवि स्थिता कन्या, पुरो हितः पुरोहितः ।
वर त्वं च धराधीश !, भज त्वं यदि वाञ्छसि ॥ १६५ ॥

दु० व्या०—पुरः—अग्रे ॥ १६५ ॥

धृत्वाऽप्यलक्ष्यरूपायाः, सारूप्यं संयमश्रियः ।
भाग्यदेवतयाऽवारि, भवान् विषयविभ्रमात् ॥ १६६ ॥

इत्युक्ते गुरुभिर्भाग्यदेवी तद्रूपडम्बरम् ।
हित्वाऽविशन्नृपस्याङ्गं, साश्चर्यं वार्धिवन्नदी ॥ १६७ ॥

मुदा भूपो मुनिं प्राह, प्रबुद्धहृदयस्तदा ।
प्रभो ! त्वया स्यान्मज्जन्नुद्धृतोऽस्मि भवार्णवात् ॥ १६८ ॥

अनङ्गपन्नगविषं, विनिरस्य भवद्गिरः ।
सुधां विधुरयन्त्येता मधुराणां धुरं श्रिताः ॥ १६९ ॥

अक्षैः केलिकृता कामकितवेन समं कथम् ? ।
नारीनितम्बफलके, हा ! मया जन्म हारितम् ॥ १७० ॥

दु० व्या०—पाशकैः, इन्द्रियैर्वा ॥ १७० ॥

कान्ताङ्गदेशं रोमालिकाननं नाभिकन्दरम् ।
व्रजता विषयस्तेनैः, हा ! मया जन्म हारितम् ॥ १७१ ॥

नाथ ! स्वर्गमपीच्छामि, यतस्तत्रापि नाकिनः ।
विषयान्धाः सदेवेन्द्र-हरि-ब्रह्म-पिनाकिनः ॥ १७२ ॥

दु० व्या०—नाकिनः—देवाः ॥ १७२ ॥

२२

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



केवलं परिरिप्सेऽहं, सोत्कण्ठं संयमश्रियम् ।
ईहे सिद्धिपुरे वासमजय्ये विषयारिभिः ॥ १७३ ॥

मा प्रमादीरिति प्रोक्ते, मुनिनाऽथ महीपतिः ।
तं नत्वा सपरीवारः, पौरैः साकं पुरं ययौ ॥ १७४ ॥

कृत्वा पार्श्वप्रभोः पूजां, भोजनादनु मन्त्रिणः ।
आहूय चतुरो भूपश्चतुरोक्त्या जगाद तान् ॥ १७५ ॥

पिशाचकीव मे जीवः, पातकी वातकीव हा! ।
मूढचेता इयत्कालमभून्मोहविमोहितः ॥ १७६ ॥

अद्य सद्यस्तिरस्कृत्य, तं मोहं केवली मुनिः ।
तत्त्वमार्गं मयि प्राचीकटत् पटुवचस्त्विषा ॥ १७७ ॥

उदारा इति विन्यस्ताः, पूर्वं दारा मया हृदि ।
उदारा एव सञ्जाताः, विवेकस्य विदारणात् ॥ १७८ ॥

टु० व्या०—उत्कृष्टा आराः—शस्त्रिकाः ॥ १७८ ॥

स्पृहयामि ततो नाहं, बाह्यराज्याय सर्वथा ।
अथामी मेनिरे चित्ते, विषया विषवन्मया ॥ १७९ ॥

भवाम्बुधेस्तितीर्षा मे, बुभूर्षा संश्रमश्रियः ।
मारमोहादिशत्रूणां, संजिहीर्षा च सांप्रतम् ॥ १८० ॥

यावत् प्रत्युत्तरं किञ्चिदुच्चरन्तेऽथ धीसखाः ।
सखीयुताऽऽययौ तावत्, तत्र राज्ञी सुलोचना ॥ १८१ ॥

भद्रासने निषण्णा सा, भद्रदन्तीन्द्रगामिनी ।
साश्रुनेत्रा सनिःश्वासा, भूपं स्माह सगद्गदम् ॥ १८२ ॥

किमियं श्रूयते कान्त! संयमग्रहसंकथा ।
श्रुतयाऽपि यया जज्ञे, बाढं मनसि मे व्यथा ॥ १८३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अद्यापि नाथ ! तारुण्यमरण्यमिव दुस्तरम् ।
बाधतेऽनङ्गभिल्लोऽत्र, स्वल्पेऽप्येकाकिनं जनम् ॥ १८४ ॥

नव्यं रत्नमयं सौधमिदं च तनुते मुदम् ।
भजस्व तदलङ्कृत्य, पूर्ववद् भोगसंपदम् ॥ १८५ ॥

सरसीदीर्घिकादोलावापीमुख्यानि वल्लभ ! ।
क्रीडास्थानानि दुःस्थानि, मया सह विधेहि मा ॥ १८६ ॥

तीते वयसि तारुण्ये, त्वयाऽऽहत्यापि संयमम् ।
स्वेप्सितं साधयेः स्वामिन् !, समये शोभतेऽखिलम् ॥१८७॥

अथ भूपः प्रियां स्माह, शृणु सुन्दरि ! मद्वचः ।
विवेकवर्जितो जन्तुः, किं किं कुर्यान्न तादृशम् ? ॥ १८८ ॥

ममाऽद्योन्मीलयामास, साधुर्वाक्यसुधाञ्जनैः ।
विवेकलोचनं तेन, तत्त्वातत्त्वं व्यलोकयम् ॥ १८९ ॥

ध्वजाञ्चलाब्धिकल्लोलचपलागोलवच्चलः ।
असार एष व्यापारः, सारो धर्मश्च निश्चलः ॥ १९० ॥

तपःखड्गधरो जित्वा, स्मरारिं सति यौवने ।
संयमं संजिघृक्षामि, प्रवयाः किं करिष्यति ? ॥ १९१ ॥

नानिलैः पूर्यते व्योम, सागरः सलिलैर्न च ।
नेन्धनैस्तृप्यति शिखी, जन्तुश्च विषयैस्तथा ॥ १९२ ॥

विमानवनवापीषु, पुरा स्वर्गे सुखायितम् ।
मया चेत् तर्हि वेश्माद्यैः, किं सौख्यं मानवे भवे ? ॥१९३॥

महोराशिमयीष्वेव, ललितं स्वर्वधूषु चेत् ।
तन्मूत्रविण्मयस्त्रीषु, किं सौख्यं मानवे भवे ॥ १९४ ॥

गते वयसि चात्तस्य, संयमस्य क्रियाऽपि न ।
क्षणं न चायुर्विश्वासो, दृष्टं तत् केन वार्धकम् ॥ १९५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति प्रत्युत्तरं प्राप्य, पुना राज्ञी प्रियं जगौ ।
सत्यमेतत् परं नाथ !, चारित्रमपि दुष्करम् ॥ १९६ ॥

कार्या केशोद्धृतिः सह्याः, क्षुत्-तृषादिपरीषहाः ।
नित्यं चैव तपःक्लेशस्तां पुनः क्ष्मापतिर्जगौ ॥ १९७ ॥

तिर्यग्योनिगतः स्वात्मा, वध-बन्धादिकं भवे ।
परहस्तगतः सेहे, किं दुःखं देवि ! संयमे ॥ १९८ ॥

नरकेष्वपि कुम्भीषु, पाकच्छेदभिदादिकम् ।
परहस्तगतः सेहे, किं दुःखं देवि ! संयमे ॥ १९९ ॥

कुमर्त्येष्वपि दौर्गत्यकारावास-वधादिकम् ।
परहस्तगतः सेहे, किं दुःखं देवि ! संयमे ॥ २०० ॥

आकामनिर्जरैवाभूत्, तत्र जीवस्य दुःखिनः ।
सम्यग्मोक्षसुखोपायः, संयमः किमु दुःखदः ! ॥ २०१ ॥

इति प्रबुद्धा तद्वाचा, सा प्रोचे नाथ! तन्मया ।
प्रतिज्ञातं विरक्तस्य, या गतिस्ते ममापि सा ॥ २०२ ॥

मन्त्रिणस्ते नृपं स्माहुः, प्रियया सह संयमे ।
सज्जोऽभूस्त्वं परं देव !, राज्यं कस्मै प्रदास्यसि ॥ २०३ ॥

भूपोऽवग् मा भवत्पुत्रस्तावन्मे दैवयोगतः ।
यस्मै कस्मै तथापीदं, राज्यं देयं मया प्रगे ॥ २०४ ॥

चिन्त्यं राजाऽर्हता कस्येत्युक्त्वा तान् व्यसृजन्नृपः ।
शुद्धाशयधरा प्राप, शुद्धान्तं च सुलोचना ॥ २०५ ॥

कृती सुकृतकृत्येषु, कृतसायंतनक्रियः ।
समये शिश्रिये तल्पमसंकल्पमना नृपः ॥ २०६ ॥

प्रमीलायामपि क्ष्मापः, संयमैकमनोरथः ।
शर्वरीमतिचक्राम, भावयन् भवभावनाम् ॥ २०७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रातस्तूर्यरवे जाते, यावत् पर्यङ्कमुज्झति ।
तावत् त्वराकुलाऽगत्य, प्रोचे तं काऽपि चेटिका ॥ २०८ ॥

दिष्टया त्वं वर्धसे पुत्र !, जन्मना देव ! ते प्रिया ।
गूढगर्भाऽसूत सुतं, निशीथे पद्मलोचना ॥ २०९ ॥

उचितज्ञस्ततश्चेट्यै, दत्वाऽसौ पारितोषिकम् ।
कृत्वा प्रभातकृत्यानि, सभामृद्धया व्यभासयत् ॥ २१० ॥

निजं सयुक्तिकं सैष संयमस्य मनोरथम् ।
सेत्स्यन्तं हृदये ध्यायन् , सुतजन्मोत्सवं व्यधात् ॥ २११ ॥

प्रमोदपूरः पौरेषु, प्रससार प्रथीयसा ।
रंहसा प्रेरितः शीघ्रं, चलध्वजपटाञ्चलैः ॥ २१२ ॥

आलोच्य मन्त्रिभिर्भूपस्तत्रानाय्य तमर्भकम् ।
नेत्रानन्दकरं राज्ये, सुमुहूर्ते न्यवीविशत् ॥ २१३ ॥

तं सिंहासनपूर्वाद्रिस्थितं बालार्कवन्नृपः ।
वीक्ष्य बालार्क इत्याख्यां, चक्रे विश्वाभिनन्दितम् ॥ २१४ ॥

विरेजे शिरसि छत्रं, परितश्चारुचामरे ।
बालार्कं बहुमानेन, सामन्ताश्च सिषेविरे ॥ २१५ ॥

कृतकोशव्ययः पुण्यक्षेत्रेषु विदधे द्रुतम् ।
अथाखिलामिलानाथः, सामग्रीं संयमोचिताम् ॥ २१६ ॥

चत्वारो मन्त्रिणस्तेऽपि, भारमारोप्य सूनुषु ।
वैराग्यं वीक्ष्य भूपस्याभूवन् संयमसादराः ॥ २१७ ॥

जातदीक्षाभिषेकादिमहोत्सवभरो नृपः ।
याप्ययानाधिरूढोऽथ, प्रचचाल प्रियान्वितः ॥ २१८ ॥

तदाऽऽतोद्यरवं श्रुत्वा, वीक्ष्य चास्याभिषेणनम् ।
मोहस्य सेनया त्रस्तमनङ्गेन पलायितम् ॥ २१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरान्तराऽसौ पौराणां, पुण्यभावं विवर्धयन् ।
गत्वा वनं केवलिनं, ववन्दे युक्तिपूर्वकम् ॥ २२० ॥

इतश्च धरणेन्द्रोऽपि, तज्ज्ञात्वा विजयान्वितम् ।
प्रमोदपूरितश्चक्रे, तच्चारित्रमहोत्सवम् ॥ २२१ ॥

व्यजिज्ञपच्च हे पूज्याः !, ममात्मा सैष सत्वरः ।
भवोद्विग्नो भवत्पाणिनेहते संयमश्रियम् ॥ २२२ ॥

वीरत्वे गीयमानेऽस्य, नारीभिर्निपुणं ददे ।
देवी मन्त्रियुता याऽस्मै, सुगुरुः संयमश्रियम् ॥ २२३ ॥

संयमीति नते सर्वजनैः सार्वजनीनवाक् ।
तेनेऽस्मिन् सुगुरुः शिक्षां, द्विविधां विबुधाश्रितः ॥ २२४ ॥

भव्यक्षेत्रेषु सद्धर्मबीजं मोक्षफलप्रदम् ।
इत्यारोप्य ततोऽन्यत्र, विजहे केवली मुनिः ॥ २२५ ॥

राजर्षिमुख्यास्तद्भक्तिदक्षास्तेऽपि तमन्वगुः ।
सर्वे गुणा इवौचित्यं, सूत्रं वा वार्त्तिकादयः ॥ २२६ ॥

बाह्यान्तरङ्गभेदेन, निर्ममे निर्मलं तपः ।
राजर्षि-मन्त्रि-मुनयः, साध्वी चापि सुलोचना ॥ २२७ ॥

विरराज स राजर्षिर्गृह्णन् गुरुमुखाम्बुजात् ।
श्रुतं मरन्दवन्नित्यमिन्दिन्दिरसहोदरः ॥ २२८ ॥

गुरुप्रतिष्ठाऽधिगतप्रशंसः, सद्वादशाङ्गी जलकेलिहंसः ।
क्षमां वधूं भूषयति स्म हारैर्यथा विहारैः सह साधुवारैः ॥

इतश्च मङ्गलपुरे, बालो बालार्कभूपतिः ।
राजा राजावलीवन्द्यो, ववृधे बालचन्द्रवत् ॥ २३० ॥

तं वीक्षाश्चक्रिरे भूपाः, शोणांह्रिकरपल्लवम् ।
अशोकद्रुमसंकाशं, कौतुकेन पुनः पुनः ॥ २३१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बाल्यं क्रमादतिक्रम्य, द्विधा शास्त्रविशारदः ।
चक्रे द्विधाऽपि धीराणां, चमत्कारमयं हृदि ॥ २३२ ॥

शक्तः शिशुरपि प्रौढमहेलां भोक्तुमन्वहम् ।
किं चित्रं तरुणः सैष, शिश्रियेऽनेकशो वधूः ॥ २३३ ॥

दु० व्या०—महा इलां—पृथिवीम् ॥ २३३ ॥

बालार्कः प्रसरत्प्राज्यप्रतापः पृथिवीतले ।
चित्रं यैः सेवितस्तेषु, श्रेयोऽभून्नापरे पुनः ॥ २३४ ॥

कदाचिदेष विज्ञाततातसंयमसंकथः ।
तदंह्रियुगलं नन्तुमभूदुत्कण्ठितस्तराम् ॥ २३५ ॥

तं चान्यदाऽवनीपालं, वनीपालो व्यजिज्ञपत् ।
वनं पुनन्ति राजर्षितातपादास्तव प्रभो ! ॥ २३६ ॥

दत्वाङ्गभूषणान्यस्मै तत्क्षणं मुदितः पुरम् ।
तोरणध्वजमुख्यैः स भूषयामास पूरुषैः ॥ २३७ ॥

शृङ्गारिताश्च दन्तीन्द्रः, शृङ्गारितमहापथः ।
अपत्राह्याधिरूढोऽयं, तातं नन्तुमथाचलत् ॥ २३८ ॥

परिधाप्य तरून् मार्गे, स्वस्तिकान् पुरयन्नधः ।
इत्याद्युत्सवपुरेण, स प्रापत् पावनं वनम् ॥ २३९ ॥

तातं गुरुं ततः साधु-साध्वीव्रातपरिष्कृतम् ।
विवेकवान् ववन्देऽसौ, मुदश्रुप्लुतलोचनः ॥ २४० ॥

एकं गुरुः परं तातस्त्रिजगत्ख्यातकीर्तिभाक् ।
किं चित्रं यन्मुदे सोऽस्य, स्वर्णमेकं सुगन्धि च ॥ २४१ ॥

धर्मबीजाधिरोपाय, मेघधारोपमां गुरुः ।
उद्ग्रीवं भव्यसारङ्गैरास्वाद्यां देशनां व्यधात् ॥ २४२ ॥

दु० व्या०—सारङ्गैः—चातकैः ॥ २४२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आहत्य स पितुः पार्श्वे, श्रद्धाऽर्हं धर्ममार्हतम् ।
पुनर्नत्वा तमापृच्छ्य, मुदितः स्वपुरं ययौ ॥ २४३ ॥

न्यायधर्मधुरीणस्य बालार्कस्याभवद् भुवि ।
प्रजानुरागविभ्राजः, साम्राज्यमुदितोदितम् ॥ २४४ ॥

अथो विजयराजर्षिर्विश्वविश्वम्भरासरः ।
चिरं हंस इव स्वैरविहारेण व्यभासयत् ॥ २४५ ॥

चत्वारो मन्त्रिमुनयश्चारुचारित्रनिश्चलाः ।
केवलज्ञानमासाद्य, सिद्धिसौख्यं सिषेविरे ॥ २४६ ॥

साध्वीषु मुख्यतां प्राप्ता, साध्वी साऽपि सुलोचना ।
तपसा कर्ममर्माणि, भित्त्वा शिवपुरं ययौ ॥ २४७ ॥

एवं सेवधिसारसंयमशमध्यानामृतप्रीणितः,
स्वान्तस्तान्तभवान्तकारिकरुणाकेलिगृहं सस्पृहम् ।
भव्येषु द्विविधं निवेश्य विशदं धर्मं धरामण्डले,
पुर्णायुर्विजयो विमानममलः सर्वार्थसिद्धिं ययौ ॥ २४८ ॥

दु० व्या०–सेवधिः–निधानम् । तान्तः–विस्तीर्णः ॥ २४८ ॥

च्युतश्चम्पापुर्यामथ परमदेवक्षितिपतेः,
कुलोत्तंसः कंसद्विषत इव सोऽरिष्टमथनात् ।
प्रभुश्रीमत्पार्श्वाचरणसुरमाणिक्यलभना–
च्चिरं भेजे सौख्यं शिवपदगतः सम्मदमयम् ॥ २४९ ॥

इति श्रीअञ्चलगच्छे आचार्यश्रीमाणिक्यसुन्दरसूरिविरचिते
माणिक्याङ्के श्रीश्रीधरचरिते विजयचन्द्र-
सिद्धिगमनो नाम नवमः सर्गः समाप्तः ॥
॥ ग्रन्थाग्रम् २५८ अ० २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## ग्रन्थकर्तुः प्रशस्तिः ॥

श्रीअश्वसेनस्य कुलावतंसः, कल्याणकासारविलासहंसः ।
चिन्तामणीवज्जनचिन्तितानि, चिन्तामणिपार्श्वजिनो ददातु ॥

श्रीमेदपाटदेशे, ग्रन्थो माणिक्यसुन्दरेणायम् ।
देवकुलपाटकपुरे, गुणरसवार्धीन्दुवत्सरे (१४६३) व्यरचि ॥२॥

गद्य-पद्यमयी हृद्या, चम्पूश्चातुर्यशालिनी ।
अस्य ग्रन्थस्य विज्ञेया, चतुःपर्वीकथा स्वसा ॥ ३ ॥

अकारि शुद्धा श्रीपूज्यगच्छाधीशैः प्रसद्य सा ।
पुरे सत्यपुरे पौरमण्डिते मेरुमण्डले ॥ ४ ॥

द्यौरेषा रमते यावच्चारुतारककन्दुकैः ।
वाच्यमानो जनैस्तावद् ग्रन्थोऽयं भुवि नन्दतात् ॥ ५ ॥

सहस्रमेकं सर्वाग्रसंख्ययाऽनुष्टुभामिह ।
एकोनया नवत्या च, शतषट्कं समन्वितम् ॥ ६ ॥

एवं ग्रन्थाग्रम् १६८९ ॥

पण्डितः-श्रीमेरुविजयगणिसतीर्थ्यगणिश्रीशान्तिविजयगणि-शिष्यसत्यविजयगणिना पत्तनचित्कोशे प्रतिरियं मुक्ता ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## व्याख्याकर्तुः प्रशस्तिः ।

दु० व्या–माणिक्याङ्काभिधग्रन्थे सूरिमाणिक्यसुन्दरः ।
एवं दुर्गपदव्याख्यामकार्षीत् कविवल्लभाम् ॥ १ ॥

अष्टाशीत्यभिधे वर्षे, चतुर्दशशतान्विते ।
अभ्यर्थनादियं व्याख्या, कृता श्रीपत्तने पुरे ॥ २ ॥

अलिखत् प्रथमं चेतां, विनेयः कीर्तिसागरः ।
ग्रन्थो व्याख्यायुतो जीयाद्, वाच्यमानो निरन्तरम् ॥३॥

इति श्रीअञ्चलगच्छे श्रीमाणिक्यसुन्दरसूरिविरचिते माणिक्याङ्के नवमसर्गस्य स्वोपज्ञदुर्गपदव्याख्या समाप्ता ॥

संवत् १४८९ वर्षे दीपोत्सवे श्रीअणहिलपुरपत्तने विश्वरूपेण लिखिता ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



For Private And Personal Use Only